ISSN-2231-0800

# गोमती
# GOMATI
## (A JOURNAL FOR INDOLOGICAL RESEARCH)

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः), लखनऊ-परिसरः
NAAC द्वारा 'ए' श्रेण्यां प्रत्यायितः
विशालखण्डः-4, गोमतीनगरम्, लखनऊ-226010 (उत्तरप्रदेशः)
दूरभाषः 0522-2393748, फैक्स- 0522-2302993
सन् 2018

2.jpg
Type: JPG File
Size: 3.71 MB
Dimension: 4558 x 3208 pixels

राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद

विश्वविद्यालय अनुदान आयोग का स्वायत्त संस्थान

NATIONAL ASSESSMENT AND ACCREDITATION COUNCIL

An Autonomous Institution of the University Grants Commission

# *Certificate of Accreditation*

*The Executive Committee of the*
*National Assessment and Accreditation Council*
*on the recommendation of the duly appointed*
*Peer Team is pleased to declare the*
*Rashtriya Sanskrit Sansthan (Deemed to be University)*
*Institutional Area, Janakpuri, New Delhi as*
*Accredited*
*with CGPA of 3.25 on four point scale*
*at A grade*
*valid up to July 04, 2017*

*Date : July 05, 2012*

*Director*

ISSN-2231-0800

# गोमती

# GOMATI

## A JOURNAL FOR INDOLOGICAL RESEARCH

**संरक्षकः**

**प्रो. परमेश्वरनारायणशास्त्री**

कुलपतिः

**प्रधानसम्पादकः**

प्रो. विजयकुमारजैनः

प्र. प्राचार्यः

**सम्पादकाः**

प्रो. भारतभूषणत्रिपाठी

डॉ. पवनकुमारः

डॉ. गुरुचरणसिंहनेगी

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः) लखनऊपरिसरः

विशालखण्डः-4, गोमतीनगरम्, लखनऊ-226010 (उत्तरप्रदेशः)

ISSN-2231-0800

# गोमती

# GOMATI

(A JOURNAL FOR INDOLOGICAL RESEARCH)

© Rashtriya Sanskrit Sansthan (Deemed University),
Lucknow Campus, Lucknow

**संरक्षकः** प्रो. परमेश्वरनारायणशास्त्री, कुलपतिः

**प्रधानसम्पादकः** प्रो. विजयकुमारजैनः, प्राचार्यः

**सम्पादकाः** प्रो. भारतभूषणत्रिपाठी
डॉ. पवनकुमारः
डॉ. गुरुचरणसिंहनेगी

**प्रकाशकः** प्रो. विजयकुमार जैनः, प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मानित-विश्वविद्यालयः)
लखनऊ-परिसरः, विशालखण्डः-4, गोमतीनगरम्,
लखनऊ-226010, उत्तरप्रदेशः

**Publisher:** Prof. Vijay Kumar Jain, Principal
Rashtriya Sanskrit Sansthan (Deemed University)
Lucknow Campus, Vishal Khand-4, Gomti Nagar,
Lucknow-226010 (U.P.)

मुद्रकः माहेश्वरी एंड संस, मोतीनगर, लखनऊ

# प्रधान-सम्पादकीयम्



प्रो. विजयकुमारजैनः, प्राचार्यः

'गोमत्यङ्कं' दृष्ट्वा मोमुद्यते मे चेतः। इयं पत्रिका छात्राणां प्राध्यापकानां चास्ति, अतो युवलेखकानां यत्र प्रोत्साहनं भवति तत्रैव प्रौढ़लेखकानामालेखैः पाठकानामुपकारोऽपि भवत्येव, तत्र न कश्चन सन्देहः। अस्यां पत्रिकायां विविधशास्त्राणामपि सङ्कलनं दृश्यते वेद - व्याकरण - साहित्य - ज्योतिष - बौद्धदर्शन-शिक्षाशास्त्रप्रभृतिपरम्परागतशास्त्रैः सह आधुनिकविद्या-सङ्गणकादीनामालेखा अपि वर्तन्ते। गोमतीपत्रिका लखनऊपरिसरस्य प्रतिभाया दिग्दर्शनं करोति तथा लखनऊनगरेण सह उत्तरप्रदेशस्य गौरवमपि वर्धयति।

भूरिपरिश्रमाणां परिणामरूपैवास्तीयं गोमतीति। अतो लेखकान् प्रति कृतज्ञोऽस्मि सम्पादकमण्डलेभ्यश्च साधुवादं वितरामि। पुनः पुनः सर्वान् प्रति मङ्गलकामनाः करोमि।

''भवतु सब्ब मंगलं''

**- विजयकुमारजैनः**

# सम्पादकीयम्

**येनेरिताः प्रवर्तन्ते प्राणिनः स्वेषु कर्मसु,**
**तं वन्दे परमात्मानं स्वात्मानं सर्वदेहिनाम्।**

समग्रमपि चिन्तनं, कार्यं जनकल्याणाय भवेदिति विचिन्तयति यः खलु स एव विविधप्रकल्पनां रचयति। तस्याः सर्वमङ्गलभावनायाः परिकल्पनायाः परिणामभूतैवेयं परिसरीया 'गोमती' इत्याख्या पत्रिका वर्तते।

शाश्वतरूपेण प्रतिष्ठिता सुरभारती सर्वत्र प्रसरेत् तस्मादत्र प्रामुख्येन देववाण्यां निबन्धाः दरीदृश्यन्ते। देववाण्या सह अन्यभाषायां समागता विचारा अपि दृष्टिपथे समागच्छेयुः अत एव हिन्दी-आंग्लभाषायामपि निबन्धा विद्यन्ते।

आचार्यै रुच्यते यद् बहुविचिन्त्यैव किञ्चिल्लिखेत् शिष्टोक्तिरपि वर्तते ''शतं वद मा लिख'' यदा प्रौढत्वं भवेत् तदैव लेखनीयम्। तच्च प्रौढत्वं कीदृशम्? तत्र प्रौढमनोरमायाश्शब्दरत्ने लिखितम् ''सकलदर्शनार्थज्ञानपूर्वकमहाभाष्यगूढार्थज्ञानवत्वमिति''। एतादृशं चेत् प्रौढत्वं न भवेत् तथापि लेखकस्य कश्चन शास्त्रप्रवेशः अवश्यमेवापेक्ष्यते।

वस्तुतो लेखनेन शास्त्रस्य संस्कृतवाङ्मयस्य यस्य कस्यापि विषयस्य महती समृद्धिर्जायते। तस्मान् नूतनविकासः, नवसर्जना, नवमार्गश्च विकसति। अत एव भारतसर्वकारेण संस्थानद्वारा सर्वस्मिन् परिसरे एतादृशी व्यवस्था व्यधायि यया समेषां लेखने अध्ययनेऽध्यापने चाभिरुचिः स्यात्। तस्मात् लखनऊपरिसरेण प्रतिसत्रमिव अस्मिन् सत्रेऽपि पत्रिकेयं प्रकाश्यते। अस्याः पत्रिकायाः संरक्षकाः राष्ट्रियसंस्कृतसंस्थानस्य यशस्विनः कुलपतयः प्रो. परमेश्वरनारायणशास्त्रिवर्याः प्रणम्या येषां सन्मार्गदर्शने पत्रिकेयं प्रकाशनतां भजते।

परिसरप्राचार्याः प्रो. विजयकुमारजैनवर्याः अभिनन्द्याः ये अस्मिन् कर्मणि अस्मान् प्रैरयन्। येषां प्राप्तप्रेरणयैव अस्माभिः कार्यमिदं प्रारम्भि। अस्माकं परिसरीयाः समेपि आचार्याः, उपाचार्यः, सहाचार्याः अतिथिप्राध्यापकाः, संविदाध्यापकाः, परियोजनारताः गवेषकाः, कर्मचारिणः, शोधच्छात्राः, छात्राध्यापकाः समेपि परिसरीयाः छात्राश्च धन्यवादार्हाः येषां समेषां पत्रिकायाः प्रकाशने प्रत्यक्ष-परोक्षरूपेण सहभागिता वर्तते। भवतां समेषां सम्मुखीनेयं पत्रिका समुल्लसेत् संवर्धेत प्रसरेत् शास्त्रज्ञानप्रवेशाय च भवेदिति भगवन्तं प्रार्थयामहे।

अज्ञानवशाद्, अनवधानाद् मुद्रणदोषाद् वा बह्व्यः अशुद्धयः सम्भाविताः स्युः तदर्थं गुणैक-पक्षपातिभिः सुधिभिः क्षन्तव्याः।

इत्थम्
सम्पादकाः

# विषय-सूची

## संस्कृत-खण्डः


| | | |
|---|---|---|
| 1. लोके सर्वाशब्दव्यपाश्रया | डॉ. ग़ज़ाला अंसारी | 1 |
| 2. रसानन्दबोधः | डॉ. मनमोहन तिवारी | 7 |
| 3. व्याकरणशास्त्रे महाभाष्यकारपतञ्जलेर्योगदानम् | श्रीप्रमोदकुमारशुक्लः | 13 |
| 4. शब्दरत्नदिशा समीप्यषष्ठ्यर्थनिराकृतिः | डॉ. यदुवीरस्वरूपब्रह्मचारी | 16 |
| 5. साहित्यशिक्षणे अलङ्कारशिक्षणम् | डॉ. बिचित्ररंजनपण्डा | 22 |
| 6. साहित्यशास्त्रीयालङ्कारशिक्षणम् | डॉ. रुद्रनारायणनरसिंहमिश्रः | 25 |
| 7. मेयाधीना मानसिद्धिः | कृष्णा कुमारी | 28 |
| 8. स्फोटतत्त्वविमर्शः | डॉ. प्रवीणकुमारचौधरी | 33 |
| 9. स्कन्दपुराणीयमानसखण्डे वर्णितयागीश्वरस्य (जागेश्वर) माहात्म्यं तीर्थानि च | डॉ. सुमनचन्द्रपन्त 'सुमन्तः' | 36 |
| 10. संस्कृतकाव्यशास्त्रीयप्रमुखलक्षणग्रन्थेषु सौन्दर्यतत्त्वविमर्शः | मञ्जूत्रिपाठी | 43 |
| 11. कालिदासनाटकेषु प्रेमतत्वम् | सुमेरीलालः | 47 |
| 12. ज्योतिषशास्त्रे अरिष्टविचारः | शत्रुघ्नपाण्डेयः | 51 |
| 13. द्वैतदर्शनसिद्धान्तः | रामप्रवेशत्रिपाठी | 54 |
| 14. शब्दतत्त्वसमासशक्त्योर्विवेचनम् | अंकुशकुमारः | 57 |
| 15. उपनिषद्वाङ्मये ब्रह्मचिन्तनम् | मंजूलता | 64 |
| 16. अर्वाचनीयसंस्कृतकाव्येषु "राष्ट्रभावना" | अनुपमदेवी | 68 |
| 17. मुनित्रयमते शिक्षाव्यवस्था | प्रदीपचन्द्रढौंडियालः | 72 |
| 18. विद्यालयीयपरिवेशे व्यक्तित्वम् | गोकुलानन्दतिवारी | 75 |
| 19. उपनिषद्वाङ्मये सृष्टि-क्रमवर्णनम् | नीलम | 80 |
| 20. पुराणवाङ्मयेषु सृष्टिः | बृजेशचन्द्र उपाध्यायः | 83 |

## हिन्दी-खण्डः


| | | |
|---|---|---|
| 21. भाषा शिक्षणशास्त्र के सन्दर्भ में कौशल विकास के उदीयमान मुद्दे एवं चुनौतियाँ | प्रो. लोकमान्य मिश्र | 87 |
| 22. मानवतावाद और शिक्षा | प्रो. देवीप्रसाद द्विवेदी | 97 |
| 23. भारतीयसंस्कृति में संस्कारों का वैशिष्ट्य | डॉ. राम बहादुर दूबे | 102 |
| 24. श्रीमद्भागवत में भक्ति की अवधारणा | डॉ. हेरम्ब पाण्डेय | 114 |
| 25. वर्तमान सन्दर्भ में मूल्य आधारित शिक्षा का स्वरूप | डॉ. चन्द्रश्री पाण्डेय | 119 |
| 26. वेदों में ''वाक् ब्रह्म का स्वरूप'' | डॉ. प्रदीप कुमार दीक्षित | 123 |
| 27. बौद्ध शिक्षा पद्धति में वर्णित गुरु-शिष्य सम्बन्ध | डॉ. प्रियंका | 128 |
| 28. हितोपदेश में निहित नैतिक शिक्षा | राधा तिवारी | 134 |
| 29. राष्ट्रवाद एवं साम्यवाद की समानविचारधारा | पतञ्जलि त्रिपाठी | 138 |
| 30. काव्य के विविध भेद | सीता देवी | 140 |


## अंग्रेजी-खण्डः


| | | |
|---|---|---|
| 31. Application Basic Principle of Learning in Sanskrit Language Learning | Prof. Avneesh Agrawal | 143 |
| 32. CYBER CRIME : ATTACKING THE VIRTUAL BODY | Vinay Kumar Dwivedi | 144 |
| 33. VIRUS-A DEVIL OF COMPUTER | SHATKSHI MISHRA | 151 |

# लोके सर्वाशब्दव्यपाश्रया

– डॉ. ग़ज़ाला अंसारी

व्याकरणशास्त्रं शब्दशास्त्रमप्युच्यते। तत्र 'व्याक्रियन्ते असाधुशब्देभ्यः साधुशब्दाः पृथक् क्रियन्ते येन तद् व्याकरणम्'[1] करणाधिकरणयोश्च इति सूत्रेण करणल्युडन्तव्याकरणशब्दः निष्पद्यते। तस्यार्थो भवति असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिपूर्वकसाधुशब्दविषयकज्ञानकरणं व्याकरणम् इत्यर्थो लभ्यते। यथा गावी, गोणी, गोता इत्येवमादिभ्यो असाधुशब्देभ्यो 'गो' इति साधुशब्दस्य पृथक्कृतिपूर्वकं बोधनं व्याकरणादेव सम्पद्यते। पृथक्करणञ्चेदं गच्छतीति गो 'गम्' धातो[2] औणादिकः कर्तरि डो प्रत्यय इत्येवं प्रकृतिप्रत्ययविभागपुरस्सरम्प्रायेण भवति।

एवं साधुशब्दज्ञापकशास्त्रत्वं शब्दनिष्ठसाधुज्ञानजनकशास्त्रत्वं वा व्याकरणलक्षणं बोद्धव्यम् अन्यत्सर्वम् असाधुशब्दज्ञानं प्रकृतिप्रत्यादिज्ञानञ्च प्रत्यायकमात्रं न तु लक्षणस्वरूपे प्रविशते।

वैयाकरणः परावाग्रूपशब्दब्रह्मणि व्याकरणजन्यसाधुशब्दज्ञानजन्यदृढतरसंस्काररूपोपासना-जन्याद्वैतभावनया परावाचमुपासते। तदुक्तं ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।[3] शब्दसाधुत्वप्रकारदृढतर-संस्कार एव शब्दब्रह्मात्मनः सिद्धिः। तदुक्तम्–

**तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।**
**तस्य प्रवृत्तितत्त्वज्ञः स ब्रह्मामृतमश्नुते।।**[4]

इति शब्दाद्वैतमेव व्याकरणदर्शनस्य मूलम्।[5]

वाक् च परा-पश्यन्ती-मध्यमा-वैखरीभेदेन चतुर्विधा। तत्र परा वागेव ब्रह्म। तस्या एव विवर्तभूतं पश्यन्त्यादिनिखिलं जगत्। अत एव परावागेव स्फोटपदेनाभिधीयते 'स्फुटत्यर्थो यस्मात् स स्फोट' इति परावाचोऽन्वर्थसञ्ज्ञा सर्वञ्चैतत्–

**चत्वारिवाक्यरिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः।**
**गुहा त्रीणि निहिता नेङ्णयन्ति तुरीयं वाचो मनुष्या पदन्ति।।**[6]

इति वेदमन्त्रे स्पष्टम्। महाभाष्यकारैश्च व्याकरणप्रयोजनकथनावसरे समाहितञ्च। परावाचं हृदि निधायैवभर्तृहरिणा उक्तम्–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**[7]

शब्दतत्त्वमुद्दिश्य भर्तृहरिणा स्वोपज्ञवृत्तौ तत्तु भिन्नरूपाभिमतानामपि विकाराणां प्रकृत्यन्वयिच्छब्दोप-

ग्राह्यतया' शब्दतत्त्वमित्यभिधीयते।

श्रीहरिवृषभदेवेन अस्याष्टीकायां शब्दब्रह्मणः स्वरूपं निर्णीतम्-

**ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।**

**विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते।।**[8]

वागेव ब्रह्म। तत एव च दृश्यं जगत्। ''वागेव विश्वाभुवनानि जज्ञे''। इत्यादि श्रुतिप्रामाण्यात्। दर्शनान्तरप्रतिष्ठितब्रह्मणि यद् ब्रह्मत्वं तत्सर्वं वाच्येवोपपद्यते। द्रव्यगुणकर्मादयो ये पदार्थास्तथा-प्रतिष्ठितब्रह्मणः स्वप्नविषयप्रतिभासवद्विवर्ताः स्वीक्रियन्ते, ते वस्तुतः पदस्य (शब्दस्य) अर्थाः सन्ति। अतो वैशेषिकैः 'पदार्थ नाम्ना स्वीकृता वेदान्तिभिश्च ब्रह्मणो विवर्तरूपेणाङ्गीकृता यावन्तो भावास्तेशब्दस्यैव विवर्ता इत्येव स्वीकर्तुमुचितम्।[9]

मुण्डकोपनिषद्यपि,

**तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः।**

**तथाक्षराद्विविधाः सौम्यभावाः प्रजायन्ते तत्र चैवापियन्ति।।**[10]

वाक्यपदीयकारेण शब्द एव ब्रह्मतत्त्वपदेन निर्दिष्टः। तथाहि-

**सत्यामाकृतिसंहारे इदं यदन्ते व्यवतिष्ठते।**

**तन्नित्यं शब्दवाच्यं तच्छब्दतत्त्वं न भिद्यते।।**[11]

महाभाष्येऽपि इदमेव शब्दतत्त्वम्-

चत्वारिश्रृङ्गाः त्रयो अस्यपादा द्वे शीर्षे सप्तहस्ताशोऽस्य। त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्याम् आविवेश, इति ऋङ्मन्त्रव्याख्यानावसरे[12] महान् देव इत्यनेन न शब्दः स्फुटं प्रत्यपादि उद्योतकृता श्रीनागेशेन च महान् देवः शब्दः इत्यस्य महान् परब्रह्मरूपी देव इति व्याख्या कृता। महान् परब्रह्मरूपो देवोऽन्तर्यामिरूपः शब्दो मर्त्येषु आविष्टः इत्यर्थः। प्रत्यक्षानुमानोपमानशब्दप्रमाणादिजन्यं सर्वविधं ज्ञानं जगति शब्दमविषयं कृत्वा न सम्भवति शब्दं विषयीकृत्यैव भवति। यतो हि सर्वविधं ज्ञानं शब्देनानुस्यूतमिव शब्देन प्रकाशितं भवति। तथा च जातिव्यक्तिलिङ्गसंख्याकारकैः सहशब्दोऽपि प्रतिपादकार्थो भवति।

नाम जात्यादियोजनासहितस्य सविकल्पज्ञानस्य नित्यस्वरूपा वाग्रूपता यदि ततो निर्गच्छेत्तदा प्रकाशात्मकं ज्ञानं विषयं नावधारयेत्। यतो हि वाग्रूपता, सविकल्पकज्ञानप्रख्यापिका वर्तते। वाग्रूपतैव न भवति तर्हि ज्ञानमपि न स्यात् इत्यादि प्रवर्तना।

**इतिकर्त्तव्यता लोके सर्वा शब्दव्यपाश्रया।**

**यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते।।**[13]

व्याकरणदर्शने वाग्ब्रह्मणो (शब्दब्रह्मण:) विभुत्वं व्यापकत्वम् तदीयदर्शनतत्त्वस्य सर्वातिशायि बीजम्। लोके सर्वेऽपि व्यवहार: शब्दाधीन एव। अत एवोक्तं भर्तृहरिणा–

**न सोऽस्ति प्रत्ययो लोक य: शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।**[14]

लोकेऽस्मिन् यान्यपि ज्ञानानि भवन्ति तत्सर्वाणि शब्दानुविद्धान्येव। यथा मणय: सूत्रानुविद्धा एव हाराकारस्वरूपं धारयन्ति तथैव सर्वमपि ज्ञानं शब्दानुविद्धं सत् ज्ञानाकारेण प्रतीयते। शब्दानुवेधं विना न ज्ञानस्य प्रतिष्ठा। तथा हि–

**वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।**

**न प्रकाश: प्रकाशेत सा हि प्रत्यवमर्शिनी।।**[15]

वाग्रूपता ज्ञानस्य शाश्वतो धर्म:। यदि सोत्क्रामेत् ज्ञानं ज्ञेयवस्तुज्ञापने सर्वथासमर्थ: स्यात्। ज्ञापनाभावे ज्ञानं नास्त्येव। सा वाग्रूपता सर्वासां विद्यानां सर्वेषां शिल्पानां कलानाञ्चोपनिबन्धिनी कारणभूताऽस्ति–

**सा सर्वविद्याशिल्पानां कलानां चोपबन्धनी।**

**तद्वशादाभिनिष्पन्नं सर्वं वस्तु विभज्यते।।**[16]

जगति खलु प्राकृतिकं कृत्रिमं च वस्तुजातमुपलभ्यते। तत्र प्राकृतिका: पृथिव्यप्तेज: प्रभृतय: पदार्था: शब्दतत्त्वस्य विवर्तभूता: सिद्धान्तिता:। विवर्तभूतानामपि तेषां प्रकाशापकाशौ वाग्रूपतायामुपनिबद्धौ इति। परं सन्ति हि वस्तूनि कृत्रिमाण्यपि, तेषां च कर्तार: कारणान्यपि प्रत्यक्षेण समुपलभ्यन्ते। तेषां कार्ये व्यवहारे च वाच: क उपयोग:। अद्यत्वे वायुयानादीनामुत्पादने संचालने च वाच: कतरत्कर्तृत्वं कारणत्वं वा सम्भाव्यते। अत्रोच्यते वागेव सर्वासां विद्यानां कारणम् सर्वेषां शिल्पानां कारणम् सर्वासां कलानां च कारणमिति प्रत्यक्षेण सर्वे जानन्त्येव। तद्विद्याशिल्पकलावशादभिनिष्पन्नमभिनिष्पादितं च विभिन्नं घट-पटादिकं वायुयानोपग्रहादिकं च वस्तुजातं वाग्रूपत्तोपनिबद्धं भवत्येवेति क: शङ्कावसर:।

विद्याशिल्पादयो हि वाग्रूपतायामुपनिबद्धा: वाग्रूपतावशाच्च सर्वाणि लौकिकानि वैदिकानि च कार्यजातानि निष्पद्यन्ते। पश्वादीनामपि सवाचां मनुष्याणां प्रवर्तनया कार्यजातानि निष्पद्यन्त इति। उक्तप्रकारेण च सर्वोऽपि वस्तुविभागो वाग्रूपतावशादेव।

प्रतिभात्मके जगति सर्वोऽपि वस्तुविभागो, भेदरूपेण प्रतीतिश्च, शब्दशक्तिमूलक:। घटोऽयम् पटोऽयम् इति वस्तुगतो भेद: शब्दैरेव निरूप्यते। शब्द एव संसारिणां संज्ञा–

**सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते।**

**तन्मात्रामनतिक्रान्तं चैतन्यं सर्वजातिषु।।**[17]

वागेव सर्वास्ववस्थासु व्यवहारनिबन्धिनी–

**प्रविभागे यथा कर्त्ता तथा कार्ये प्रवर्तते**

**अविभागे तथा सैव कार्यत्वेनावतिष्ठते।।**[18]

श्रुतिरेवार्थप्रकल्पयति संस्करोति चेति सत्यम्–

**स्वमात्रा परमात्रा वा श्रुत्या प्रक्रम्यते यथा।**

**तथैव रूढ़तामेति तया ह्यर्थो विधीयते।।**[19]

शब्देष्वाश्रिता शक्तिर्विश्वस्यास्य निबन्धिनी।

इति सुप्रसिद्धं सुप्रतिष्ठितञ्च। श्रुतिरसतोऽप्यर्थसत्तां प्रकल्पयति–

**अत्यन्तमतथाभूते निमित्ते श्रुत्युपाश्रयात्।**

**दृश्यतेऽलातचक्रादौ वस्त्वाकारनिरूपणा।।**[20]

सर्वं जगत् शब्दस्य विवर्तरूपम्। प्रलये तत्रैव लयं गच्छतीति। शब्दो न केवलं जगदुत्पत्तिकारणमपितु सर्वविधव्यवहारस्यापि कारणमपि भवति वृद्धव्यवहारदर्शनेन प्रबुद्धसंस्कारः शिशुवर्गः मातापित्रादिशिक्षणं विनाऽपि स्वतः एव वयः क्रमेण 'तात' 'अम्बेति वक्तुं प्रक्रमते इति सर्वो लोकव्यवहारः शब्दान्वयव्यतिरेकभावं शब्दसमनुगत इति। इमामेव प्रक्रियां सङ्केतग्रहमुच्यन्ते काव्यशास्त्रिणः। विश्वनाथमते उत्तमवृद्धेन मध्यमवृद्धमुद्दिश्य 'गामानय' इत्युक्ते ते गवानयनप्रवृत्तमुपलभ्यश्च बालोऽस्य वाक्यस्य सास्नादिमत्पिण्डानयनमर्थः इति प्रथमं प्रतिपद्यते अनन्तरं च 'गां बधान' 'अश्वमानय' इत्यादावावापोद्वापाभ्यां गोशब्दस्य 'सास्नादिमानर्थः' आनयन पदाय च आहरणमर्थः इति संकेतमवधारयति। क्वचिच्च प्रसिद्धपदसमभिव्याहारात् यथा– इह प्रभिन्न कमलोदरे मधूनि मधुकरः पिबति इत्यत्र। क्वचिदाप्तोपदेशात् यथा– अयमश्वशब्द वाच्यः इत्यत्र।[21] काव्यप्रकाशेऽप्युक्तम् मम्मटेन–

'इहागृहीतसंकेतस्य शब्दस्यार्थप्रतीतेरभावात् संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन संकेतो गृह्यते स तस्य वाचकः।[22]

शास्त्रे अर्थात्मकस्य जगतः सत्ता प्रातिभासिकी विवर्तसिद्धान्तस्वीकारत्, परं लोकेऽपीतिकर्त्तव्यता व्यवहर्तव्यस्य वस्तुनः सत्ता न वास्तवी दृश्यते अपि तु शब्दव्यपाश्रया सा। न हि कश्चिदर्थ सत्तात्मकेन गवादिना व्यवहरति, शब्दपरिच्छिन्नेन तु तेनैव पुनर्व्यवहरति। शशविषाणादाविदं नितरां स्पष्टम् असतोऽपि शशविषाणपदप्रकल्पितेन वाचा समुत्थाप्यमानेन लोको येन हेतुना व्यवहरति तेन ज्ञायते सर्वा अपि इति – कर्त्तव्यता शब्दव्यापाश्रयैव।

काव्यनाटकादौ रसनिष्पत्तिः साधारणीकरणञ्च शब्दव्यापाश्रयैव। स्वशयनीये शयानस्य काव्यपाठकस्य रामादीनां नदी–वन–निर्झराणां च विभावानुभावादीनां शब्दव्यापाश्रयैव प्रतीतिरतत्कृतकारुण्यादिना वाष्पविमोक्षणादि व्यवहतिश्च बलं बन्ध्यति, कंसं घातयतीत्यादौ नाट्ये अभिनेतृणां बन्धवधानुभवस्तथा प्रतिक्रिया च।

भावोऽयं यत् शब्दं विना न कोऽपि व्यवहारो लोके सम्भवति। यत्रापि शब्दं विना बालस्य दृश्यते तत्रापि पूर्वजन्माहितसंस्कारः कल्पयते इति। काव्यादर्शे दण्डिना उक्तम्–

**इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**[23]

अतः शब्दब्रह्मब्रह्मणः व्यापकता स्फुटमेव प्रतीयते।

यच्च बहुभिर्विद्वद्भिः शङ्क्यते इक्षुक्षीरगुडादीनां माधुर्यस्य महान् भेदः शब्दो बोधयितुन्न शक्यते–

**इक्षुक्षीरगुडादीनां माधुर्यास्यान्तरं महत्।**

**तथापि न तदाख्यातुं सरस्वत्यापिशक्यते।।**[24]

एवमेव सर्वस्यापि मनोगतस्य भावस्य शब्दमाध्यमेन प्रकाशनमति दुष्करम् अपि च निर्विकल्पकज्ञाने क्व शब्दानुबोधः। तत्र इदमुच्यते यद् इक्षुरसादीनां माधुर्यस्य प्रकाशने विशेषतः शब्दानामभावेऽपि सामान्यतः शब्दाः सन्त्येव। अन्यथा महान् भेद इति भवता कथमुच्येत। न हि व्यवहारजनकज्ञानमात्रे शब्दव्यापकत्वं वदतः एव नियमः, यद् विशेषरूपेणैव शब्दानां तत्रानुबेधलक्षणं व्यापकत्वम्। द्वितीयपक्षे तु न ईषदपि समाधिप्रयासः। काठिन्यं भवतु नाम। सिद्धान्तस्तु तावताऽपि सुस्थिर एव चकास्ति। अत एव महाकविना कालिदासेन तादृशस्यात्मगतस्य च भावस्य प्रकाशयिता 'शिक्षकाणां धुरि प्रतिष्ठापयितव्य'।[25] इत्येव समादृतः।

महाकविभारविणा च 'उपपन्नैपुणा' इति शब्देन गम्भीरार्थस्य प्रकाशकः इति सम्मानं प्रापितः तृतीयपक्षेऽपि स्थूलरीत्या वैखरीशब्दानामभावेऽपि सूक्ष्मशब्दानां सत्ता तत्राप्यस्त्येव। एवं पशुपक्ष्यादीनां ज्ञानेऽपि तदीयाः शब्दाः व्याप्ता एव। एवञ्चाभिप्रायप्रकाशनार्थं शब्दाद् ऋते न किमप्युत्कृष्टतमं साधनं प्रतीयते खलु। तत्र क्रियाकारकपदघटितो वाक्यात्मक एव शब्द इत्यापि सिद्धम् अतएव व्याकरणशास्त्रे वाक्यास्फोटो एव निष्कर्ष नीतः। एवञ्च आचार्याः भाषाया मूलतो वाक्यात्मकत्वेऽपि लाघवेनतज्ज्ञानाय वाक्येषु पदानि पदेषु प्रकृतिप्रत्ययादीनि च विभाजयामासुः।

वाग्वै पराव्यवकृता वदत्। ते देवा इन्द्रं अब्रुवन् इमां नो वाचं व्याकुर्वन्ति। तान्निन्द्रां मध्यतोऽवक्रम्य व्याकरोत्।[26]

एवमेव वाक्यार्थे पदार्थकल्पना पदार्थे च प्रकृतिप्रत्ययार्थकल्पना अपरञ्च नहि शब्दानुविद्धेनैव शब्दानां तदनुशासनस्य वा महत्त्वम्, अपि तु समस्ताय प्रपञ्चाय मूलमपि 'अनादि निधनं शब्दतत्त्वमेव' इति पदार्थभावे उपादानतयाऽपि तच्चानुबेधः समादृतः। एतत्सर्वम्–

**सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।**

**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।।**[287]

एवञ्चैतत् सिद्धान्तितं यत् सकलव्यवहारसम्पादकज्ञानं शब्दानुविद्धम्। शब्दं विहाय न कोऽपि लोकव्यवहारे प्रवर्त्तितुम् शक्नोति इति निश्प्रचम्।

संदर्भग्रन्थसूची–


1. पाणिनीयसूत्रम् 3/2/11
2 गमेर्डो:, उणादिसूत्रम् धातुपाठ:–456
3. सर्वदर्शनसंग्रह: पृ. 13, पृ. 274
4. वाक्यपदीयम् 1/131
5. पाणिनिव्याकरणम्, प्र.सं. पृ. 14
6. ऋग्वेद: 1/1/4/45
7. वाक्यपदीयम् 1/1
8. वा.प.1/1 पृ.1
9. वाक्यपदीयम् (ब्रह्मकाण्डम्), चौखम्बा कृष्णदास अकादमी, पुनमुद्रित सं. 2004 वाराणसी–2007
10. मुण्डकोपनिषद् 2/1/1
11. वा.प.11
12. ऋ. 4/58/3 म.प.भा.
13. वा.प. 1/121
13. वाप.1/1
14. वा.प. 1/123
15. वा.प. 1/124
16. वा.प. 1/125
17. वा.प. 1/126
18. वा.प. 1/127
19. वा.प. 1/128
20. वा. प. 129
21. साहित्यदर्पण: चतुर्थकारिकाया वृत्ति:
22. काव्यप्रकाश:, द्वितीय उल्लास:, 7 सप्तकारिकाया: वृत्ति:
23. काव्यादर्श: 1/4
24. काव्यादर्श: 1/102
25. मालविकाग्निमित्रम् 1/16
26. म. भा. 1/3/1
27. मनुस्मृति: 1/21



– सहायकाचार्या–साहित्यविभाग:,

राष्ट्रियसंस्कृतसंस्थानम्, लखनऊपरिसर:


****

# रसानन्दबोधः

- डॉ. मनमोहन तिवारी

भारतवर्षं देवभूमिरिति निगद्यते। प्रभातायां रजन्यां भगवतो भास्वरस्य देदीप्यमानाः रश्मयः यदैव अवनितलं स्पृशन्ति, तदा जनानां चेतस्सु नवचेतनायाः सञ्चारो भवितुं प्रारभ्यते। तडागेषु कमलानि विकसन्ति। उपवनेषु नूतनकिसलयानां विकासः, पुष्परसं पातुमावर्तनं विवर्तनञ्च मधुकराणां, विहगानां कलरवः तत्रैव भगवत्याः भागीरथ्याः प्रवाहश्च नितरामस्माकं चित्तं हरति। मन्दिरेषु भगवतः नित्याभिषेकः क्रियमाणः भवति। तत्रैव भगवतः कृष्णस्य लीला-जनितरसमाधुरीं रसिकाः भक्ताः आत्मना साक्षात्कुर्वन्ति अनेन परमात्मसाक्षात्कारेण जानेषु परमानन्दमयी आध्यात्मिकी चेतना प्रवहन्ति जायते। सुधीभिरिदमेव आध्यात्मिकं सुखम्, आध्यात्मिकमानन्द वेति कथ्यते। विहायाध्यात्मिकमानन्दं सुसम्पन्नमपि जीवनम् अपूर्णं दृश्यते एतावता मानवैः आध्यात्मिकोन्नत्यै सदैव प्रयासः विधीयते।

**न धर्मपरता नैव धर्ममार्गे मनोगतिः।**
**न भक्तिर्ज्ञानवैराग्ये वृथा तज्जन्म भूतले॥**

-कण्ठाभरणे जन्मवैफल्यनिरूपणाष्टकम् 4.104

**न नीता वार्तया घस्राः साधवो नैव सेविताः।**
**न गोविन्दगुणा गीता वृथा तज्जन्म भूतले॥**

-कण्ठाभरणे जन्मवैफल्यनिरूपणाष्टकम् 4.101

अयमेवालौकिकानन्द अनिर्वचनीयः ब्रह्मानन्दो रसानन्दः काव्यानन्दः आत्मानन्दश्चेति नानानामभिः व्यवह्रियते। आनन्दपदं विस्तरेण परिभाषयदुपनिषद् प्रतिपादयति यथा- आनन्दो ब्रह्मेति व्यजानात्। आनदाद्ध्येवेमानि खलु भूतानि जायन्ते, आनन्देन जातानि जीवन्ति आनन्दं प्रत्यभिसंविशन्तीति। सच्चिदानन्दं ब्रह्मेति स्वरूपतटस्थलक्षणाभ्यां श्रुतयः आत्मानमेव लक्षयन्ति। अयमात्मा ब्रह्म इदमेव सत्यं शिवं सुन्दरमिति परमप्रीतेरास्पदत्वात्। यद् वस्तु त्रिकालाबाधितं स्यात् यस्मिन् सकलञ्च जगत् तिष्ठति, यस्मादुत्पद्यते, यत्र निलयं याति तदेव सत्यमस्ति। यथोदयं प्राप्नुवन् भास्करः सत्यः तथैव अस्तं गच्छन् विधुरपि, सदृशी स्थितिरस्य मानव-जीवनस्य विद्यते। शिवं नाम श्रद्धा, विश्वासः, प्रेमानुरक्तिश्च, श्रीहरिचरणकमलयोः। यया कश्चित् पाषाणखण्डोऽपि भगवान् इति विरच्यते। समस्तञ्च जगत् तस्मिन् भगवद्रूपतामेवानुभवति। सुन्दरता अर्थात् मनोज्ञप्रतीतिः कुत्र जायते? वस्तुनि द्रष्टुः मनसि वा आत्मनः सत्य-शिव-सुन्दरस्वरूपात् पाषाणखण्डोऽपि सत्यं, शिवं, सुन्दरमिति भावमासादयति।

**चिदानन्दाकारं श्रुतिसरससारं समरसं**
**निराधाराधारं भवजलधिपारं परगुणम्।**
**रमाग्रीवाहारं व्रजवनविहारं हरनुतं**
**सदा तं गोविन्दं परमसुखकन्दं भजत रे॥**

– कण्ठाभरणे गोविन्दस्तुति: 4.71

आत्मा आनन्दरूप:। इह लोके यत्रापि प्रीति: अनुरागश्च दृश्यते तत्र सर्वत्र आत्मसम्बन्धादेव जायते यथा स्वीये सन्ताने धने वा न तु गुणवत्यपि शत्रौ स्नेहाभावात् विद्वेष एव अभीष्यते। यावन्तोऽपि पदार्था: बुद्धिविषयीकृता: सन्त: ते आत्मसम्बन्धादेव रूचिकरा: प्रतीयन्ते। आत्मप्रकाशादेव भासमानानां सकलविभावानुभावसञ्चारिरूपकाव्यार्थानां प्रतिपत्ति: जडात्मिकायां बुद्धौ जायते। सामाजिकानामात्म-संस्पर्शादनुभूयमाना: परस्था: अपि रत्यादय: स्थायिभावा: आस्वादविषयका: सम्भवन्ति तथा तदीयानन्दसंवलनाच्च शोकदयोऽपि स्थायिन: सर्वान् प्रतिपत्तॄनाह्लादयन्तीति अग्रे निरूपयिष्यते। तात्पर्यं तमेव भान्तम् आत्मानमेवानुप्रकाशितं सर्वाणि चन्द्रतारकादीनि प्रकाशन्ते आत्मन: भासा सर्वमिदं विश्वं विभाति तथा अयमात्मा यमेव स्वात्मानं प्रार्थयते तेनैवात्मना स्वयमात्मा ज्ञायते।

**तमेव भान्तमनुभाति सर्वं।**
**तस्य भासा सर्वमिदं विभाति॥** – कठोपनिषद् द्वितीयोध्याय: द्वि.व. 15

आत्मन: स्वरूपं यथा–

**यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।**
**यच्चास्य संततो भावस्तस्मादात्मेति कीर्त्त्यते॥** – लिङ्ग-1-70-98

आत्मन: स्वरूपप्रतिपादनविषये दार्शनिकानां परस्परं भवतु विप्रतिपत्तिरितिनात्र संशय: तथापि।

यथा उपनिषद् चिदानन्दं प्रतिपादयति तथैव काव्योपनिषद् रसानन्दं बोधयति। वस्तुत: आत्मैव रस:, रसो वै स:, चिदेव रस:, चैतन्यमेव रसो वा इति श्रुतेरनुसारं आत्मा चात्र परब्रह्मादिपर्याय:। यं रसं ह्येवाय लब्ध्वा आनन्दीभवति इति श्रुते: तात्पर्यं यत् सच्चिदानन्दरूपात्मा वै निश्चयेन रस: हि अयमात्मा रसं लब्ध्वा=आस्वाद्य एव न त्वन्यथा आनन्दीभवति अर्थात् आत्मा आत्मन: स्वरूपमनुभूय परमाह्लादरूपतां प्रतिपद्यते। वस्तुतस्तु अभिनवगुप्त-मम्मटभट्टादिग्रन्थस्वारस्येन भग्नावरणाचिद्विशिष्टा: रत्यादि: स्थायी भावो रस इति, अर्थात् चैतन्यविषयभूतरत्यादिस्थायिभाव एव रस: इति सारम्। वक्ष्यमाणश्रुतिस्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेवरस:।

यद्यपि रसस्तु परमानन्दबोध एव अत: सर्वेषु दर्शनेषु परमतत्त्वमिवास्यस्वरूपनिर्णय: कृतो विद्यते। पाश्चात्यमते त्वयं सौन्दर्यरूप: स्वीकृतोऽस्ति। अर्थात् रमणीयतत्त्वबोध एव रसो भवति। सौन्दर्यानुभूतिरेवरसानुभूति:। प्रीते: आत्मा रस: उताहो रस: मानसिको बोध: भवति। आचार्यभरतमुनेरारभ्य

पण्डितराजपर्यन्तं सर्वैराचार्यैः काव्ये रसस्य निरतिशयं महत्त्वमङ्गीकृतम्। अथचालङ्कारसम्प्रदायप्रवर्तकाः भामहदण्डिप्रभृतयः आचार्याः रसवदलङ्काररूपेण रसं स्वीकृत्य सर्वाण्यपि चमत्काराधायकतत्त्वानि अलङ्काररूपतया स्वीकुर्वन्ति।

**रसैश्च सकलैः पृथिगिति निगदन्तः तथा**

**कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चतु।** - आचार्य दण्डी (काव्यादर्शे) 1/62

**रीतिसम्प्रदायेऽपि-काव्यं ग्राह्यमलङ्कारादिति।** -काव्यालङ्कारसूत्रवृत्तिः 1/1/1

वक्रोक्तिसम्प्रदायेऽपि काव्यामृतरसेनान्तश्चमत्कारो वितन्वते आचार्यभरतोऽपि नहि रसादृते कश्चिदर्थः प्रवर्तते इत्युक्त्या रसस्य महत्त्वमङ्गीचक्रे। अग्निपुराणेऽपि वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्। इत्थं काव्यस्य मुख्यं प्रतिपाद्यं रस एवेति। लोकवर्णनानिपुणकविकाव्योपनिषद्भूतस्य रसस्य किं स्वरूपं? कथं निष्पतिरस्य? कथं वा साक्षात्काररूपः रसः दुष्यन्त-शकुन्तलादीनां विषयकत्वात्। इत्यनेके प्रश्नाः उद्यन्ति। क्रमशः समाधानमत्र विधीयते।

**रसपदार्थबोधः**

रस्यते आस्वाद्यते इति रसः आस्वाद्यमानत्वात्। रसः सर्वथा व्यङ्ग्य एव न चाभिधावृत्तिबोध्य वाच्यः। शृङ्गारादिरसादिशब्दप्रयोगे वा सति रसस्य प्रतीतेरभावात्। रस-रस इति कथनेन न च चमत्कारानुभूतिः। काव्येनाभिधया उपस्थापिताः विभावादयोऽर्थाः रजस्तमसी निगीर्य्य सत्वावस्थायां बुद्धौ प्रविश्य वासनात्मकं स्थायिनमुद्बोधयन्तीति। अतः व्यक्तः सन् स्थायिभावः रसतां याति। आचार्यानन्दवर्धनोऽपि ध्वन्यालोके प्रतिपादयति यथा- न च सर्वत्र तेषां स्वशब्दनिवेदितत्त्चम्। यत्राप्यस्ति तत्र विशिष्टविभावादिप्रतिपादनमुखेनैवैषां प्रतीतिः स्वशब्देन सा केवलमनूद्यते।

तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्याक्षिप्तत्त्वमेव रसादीनाम् अतएव विभावानुभावसञ्चारिणां व्यङ्ग्यव्यञ्कभावसम्बन्धाद्रसस्य प्रतीतिर्जायते।

**विभावानुभावव्यभिचारि-संयोगाद्रसनिष्पत्तिः।** - नाट्यशास्त्रे, षष्ठाध्याये, रसनिरूपणे

**कारणान्यथ कार्याणि सहकारीणि यानि च**

**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।**

**विभावानुभावस्तत् कथ्यन्ते व्यभिचारिणः**

**व्यक्तस्तैर्विभावाद्यैः स्थायिभावो रसस्मृतः॥** -काव्यप्रकाशे, चतुर्थोल्लासे 27,28

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः**

**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।**

**लोकोत्तरचमत्कारः प्राणः कैश्चित् प्रमातृभिः**

**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥** - साहित्यदर्पणे, तृतीयपरिच्छेदे 2,3

रसास्वादनम्-

**अखण्ड वस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पकानन्दास्वादनं रसस्वादः।**

– वेदान्तसारे निर्विकल्पसमाधौ विघ्नचतुष्टनिरूपणम्

रससूत्रघटकसंयोगनिष्पत्तिपदे अधिकृत्य दार्शनिकाचार्याणां, विवेचनप्रक्रियाभेदः लक्ष्यते। तेषु भरतमुनिप्रणीतरससूत्रस्य भट्टलोल्लटशङ्कुकभट्टनायकाभिनवगुप्तप्रभृतिभिराचार्यैश्च कृतव्याख्याः क्रमशः अभिनवभारत्यामुत्पत्तिवादानुमितिवाद-भुक्तिवादाभिव्यक्तिवादेति संज्ञया नितरां प्रतिष्ठामलभन्त। तत्र भवान् पण्डितराजः जगन्नाथः स्वप्रणीतरसगङ्गाधरे रसस्य साक्षिभास्यत्वं ज्ञानविशेषत्वं, चमत्कारत्वञ्च प्रतिपादयामास। इतराणि च मतानि अन्तर्भूतानि सन्ति।

वस्तुतः प्रस्तोष्यमाणं पण्डितराजस्य रसविषयकं दार्शनिकं समीक्षणमेतद् विद्वन्मनोग्राहि अपूर्वञ्च विद्यते यथा-

रत्यादिप्रतीत्यनुकूलमनोरमपदबन्धयुक्तेन काव्येनोद्भावितैर्विभावानुभावव्यभिचारिभिः तत्र शकुन्तला-प्रभृत्यालम्बनकारणैरुद्यानादिवदुद्दीपनकारणैरश्रुपातादिभिः कार्यैः चिन्तादिभिः व्यभिचारिभावैश्चेति काव्यार्थैर्मिलित्वा उत्पादितेन भावनाविशेषकारणेन रसानुभूतिसमये अपसारितेन आनन्दांशावरणाज्ञानेन एतावता परिमितत्वादिना निजत्वेन च रहितः यो हि प्रमाता तेन स्वप्रकाशतया अर्थात् आत्मप्रकाशरूपेण आत्मानन्देन सह अनुभूयमानः रत्यादिविषयकसंस्कारविशेषः रत्यादिस्थायी एव रसः भवति।

यथा अनवच्छादितो दीपः स्वयञ्च प्रकाशते तथा सन्निहितान् पदार्थान् प्रकाशयति तथैवात्मचैतन्यम् अपसृते आवरणे अर्थात् अज्ञाने निवृत्ते सति काव्यनाटकविषयकान् पदार्थान् रत्यादिस्थायिभावांश्च आस्वादविषयी करोति इति। एवञ्च परस्थानां विभावादिनामपि आत्मनाभास्यत्वमविरूद्धं यथा स्वप्नावस्थायां तुरगादीनां प्रतीतिर्जायते। रङ्गे यथा रजतप्रकारकं ज्ञानं स्यात् भ्रमात्। इति अभिनवगुप्तपादाचार्यः।

भुक्तिवादं विवेचयन् पण्डितनरेन्द्रः प्रतिपादयाञ्चकार यथा- काव्यस्य श्रवणात् नाटकस्य अवलोकनात् वा अभिधया बोधिताः प्रत्यक्षविषयीकृताः विभावानुभावव्यभिचारिरूपकाव्यार्थाः भावकत्वव्यापारेण साधारणोपायबलाद् उपस्थाप्यन्ते। अनेन उपस्थाप्यमानेषु विभावादिषु काव्यार्थेषु अगम्यात्वप्रकारकज्ञानस्य अपसारणं भवति तथा तेषां कान्तात्वादिसाधारणतयोपस्थित्यां जातायां भोगकृत्व-व्यापारेण रजस्तमसी निगीर्य्य प्रादुर्भूतेन सत्वगुणेन जनिता चित्स्वभावा या निर्वृतिः आनन्दं वा वेद्यविषयान्तरपरिहारेण अवस्थितिः यस्य तस्य साक्षात्कारेण विषयीकृतः रत्यादिः स्थायी एव रसः। अत्र भोगपदमानन्दबोधकमिति। भोगविषयीभूतरत्यादिः रत्यादिविषयकभोगश्चेति उभयमेव रसः। अयं काव्यजन्यः भोगः विषयसंवलनात् ब्रह्मास्वादसविधवर्ती इत्युच्यते।

पण्डितराजः जगन्नाथः आत्मनः तृतीयं नव्यमतं विवृण्वन् प्रत्यपादयत् यत्- रसादिप्रतीत्युनुकूले काव्ये नाट्ये च कविना नटेन बोधितेषु अभिनयैः प्रतिपादितेषु दुष्यन्तशकुन्तलाविषयकरत्याद्यर्थेषु, तत्र व्यञ्जनया दुष्यन्तादौ शकुन्तलाविषयकरतौ ज्ञातायां सत्यामनन्तरं सहृदयानां सहृदयतया पोषितस्य

भावनाविशेषरूपस्य दोषस्य प्रभावेण (भ्रमकारणेन) आत्मनि असदपि सत्त्वेन ज्ञातं यत् अवास्तविकं दुष्यन्तत्त्वं तत्प्रकारकज्ञानस्यैव भ्रमत्वाभ्युपगमात् सहृदयस्य स्वात्मनि शक्तिखण्डे वास्तविकरजतत्वा-भाववत्यपि रजतत्वेन ज्ञायमाने इव यथा समुत्पद्यमान: प्रातिभासिकसत्ताश्रितत्वाज्जायमान: अन्त:करणविषयत्वात् साक्षादात्मभास्य: शकुन्तलादिविषयकरत्यादिरेव रस:।

अत्र चतुर्थमते व्यञ्जनाव्यापारस्य अनिर्वचनीयख्यातेश्च कारणता नाङ्गीक्रियते। भावनादोषमहिम्ना अथवा भ्रमकारणेन सहृदयानां मानससन्निकर्षजन्मा दुष्यन्ताद्यभेदविषयक: शकुन्तलादिविषयकरत्यादि-मदभेदबोध:, अस्वाद:, स एव रसो भवति।

भट्टलोल्लटमते तु साक्षात्सम्बन्धेन अनुकार्यगतेयं प्रतीति: भवति। सहृदयसामाजिकास्तु कमनीयविभावाद्यभिनयप्रदर्शनेन नटे अर्थात् दुष्यन्ताद्यनुकर्तरि रत्यादिविषयकं रसं समारोप्य साक्षात्कुर्वन्ति। यत् दुष्यन्तोऽयं शकुन्तलाविषयकरतिमान् इति आरोपं कुर्वन्ति।

शङ्कुकमते तु दुष्यन्तत्त्वेन ज्ञात: नट: पक्ष: स च अनुमितिसामग्र्या अभिनयकाले विविध भावान् अभिव्यनक्ति तदभिनयं विलोक्य सामाजिक तस्मिन् पक्षे नटे शकुन्तलाविषयिणीं रतिमनुमिनोति अनुमानाकारश्च रामोऽयं सीताविषयकरतिमान् तद्विषयककटाक्षभुजाक्षेपादिमत्वात् यन्नैवं तन्नैवं यथा विरक्त:। यद्यपि अनुमिते: वस्तुनि चमत्कारजनकता न भवति तथापि अन्यानुमीयमानं विलक्षणमिदं रत्यादेरनुमानं वस्तुसौन्दर्यबलात् चमत्कारं जनयति। मतेऽस्मिन् रस: अनुमीयमानो भवति।

इत्थं विदुषां तर्कवैविध्येन रसस्य स्वरूपनिरूपणे प्रकारबाहुल्येऽपि अस्मिञ्जगति आह्लादोपेतेन प्रतीयमान: रस: रमणीयतामावहतीति सत्यम्।

यथा एकस्यैव आत्मन: प्रतिबिम्बिततया भासमान: जीवोऽपि विविध अन्त:करणाच्छादितेन तदंशरूपेण नानात्वं बिभर्ति तथैव वासनात्मकतया विराजमान: रत्यादि : स्थायिभावोऽपि अन्त:करणविषयत्वात् नानात्वं भजते। एवं विविधविभावादिविषयकत्वाद्रसोऽपि नानात्वं प्राप्नोति इति भाव:।

- रसगङ्गाधरे प्रथमानने रसस्वरूपनिरूपणम्

स्थायिभावा: -

**रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा।**
**जुगुप्सा विस्मयश्चेति स्थायिभावा: प्रकीर्तिता:॥** -काव्यप्रकाशे, च.उ. 30

रसा:- **शृङ्गारहास्यकरुणरौद्रवीरभयानका:।**
**बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसा: स्मृता:॥** -काव्यप्रकाशे, च.उ. 20

यथा व्यासवाल्मीकिशुकादिभि: परमतत्त्वविद्भि: सच्चिदानन्दरूपस्य परमात्मन: स्वरूपे समुदीरितेऽपि योगिनां, साधकानां, तपस्विनां, भक्तानाञ्च हृदये साक्षात्काररूपेण गम्यमान: अयमात्मा भवति, तथैव वाल्मीकिव्यासकालिदासभवभूतिमाघादिभि: महाकविभिर्वर्णितेऽपि अयं रस: सामाजिकानामा-स्वादविषयत्वादपि साक्षात्काररूप: सन् प्रकाशते। आत्मना भासमानत्वाच्च। इति

**सन्दर्भितग्रन्थाः**


1. रसगङ्गाधरः, पण्डितराजजगन्नाथविरचितः, सम्पूर्णानंदसंस्कृतविश्वविद्यालयः वाराणसी, चौखम्बासंस्कृतसंस्थानम्, वाराणसी
2. काव्यप्रकाशः, आचार्यमम्मटविरचितः, चौखम्बासंस्कृतसंस्थानम् वाराणसी, परिमलप्रकाशनम् दिल्ली, ज्ञानमण्डलप्रकाशनम्, वाराणसी
3. नाट्यशास्त्रम्, भरतमुनिप्रणीतम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी
4. ध्वन्यालोकः, श्रीमदानन्दवर्धनाचार्यविरचितः, चौखम्बासुरभारतीप्रकाशनम् वाराणसी, ज्ञानमण्डलप्रकाशनम् वाराणसी
5. साहित्यदर्पणः, कविराजविश्वनाथविरचितः, चौखम्बासुरभारतीप्रकाशनम् वाराणसी
6. सौन्दर्यशास्त्रम्, डॉ. (श्रीमती) लक्ष्मीसक्सेना द्वारा विरचितम्, उत्तरप्रदेश हिन्दीसंस्थानम् लखनऊ
7. कठोपनिषद (शाङ्करभाष्योपेता) टकाकारः डॉ. आद्यप्रसादमिश्रः, डॉ. विजेन्द्रकुमार शर्मा, अक्षयवटप्राकशनम् ईलाहाबादः साहित्यभण्डारः सुभाष बाजार मेरठः
8. वेदान्तसारः (सुबोधिनी टीकासहितः) श्रीसदानन्दप्रणीतः, अक्षयवटप्रकाशनम्, इलाहाबादः
9. रसदर्शनम्, डॉ. रामचन्द्रशुक्लप्रणीतम्, देववाणीपरिषद् दिल्ली
10. कण्ठाभरणम्, एन. के. पारीख-द्वारा सङ्कलितम्, विराज प्रिन्टस, मुम्बई
11. अभिज्ञानशाकुन्तलम्, महाकविकालिदास विरचितम्, चौखम्बासुरभारतीप्रकाशनम् वाराणसी
12. काव्यालङ्कारसूत्रणि, आचार्यवामनविरचितानि, चौखम्बासुरभारतीप्रकाशनम् वाराणसी



- सहायक-प्रोफेसर

मुम्बादेवी आदर्शसंस्कृतमहाविद्यालयः, मुम्बई


******

# व्याकरणशास्त्रे महाभाष्यकारपतञ्जले योगदानम्

- श्रीप्रमोदकुमारशुक्लः

व्याकरणशास्त्रं शब्दानां व्युत्पत्तिशास्त्रं वर्तते। व्याकरणशास्त्रेण सर्वेषां शब्दानां प्रकृतिप्रत्ययादीनां विभागं कृत्वा बोधनं क्रियते। भगवान् पाणिनिः व्याकरणशास्त्रस्य अभूतपूर्वग्रन्थं अष्ठाध्यायीं रचितवान्, यश्च ग्रन्थः सूत्ररूपेण वर्तते। तस्य ग्रन्थस्य वाक्यरूपेण व्याख्या भगवता कात्यायनेन कृता। पुनश्च भगवता भष्यकारेण पतञ्जलिना सूत्र-वार्तिकयोः व्याख्या 'महाभाष्य' इत्याख्यग्रन्थे कृता। संस्कृतव्याकरणक्षेत्रे महाभाष्यकारपतञ्जलेः मूर्धाभिषिक्तं स्थानं वर्तते। सः व्याकरणशास्त्रस्योपकाराय महाभाष्यग्रन्थस्य रचनामकरोत्। व्याकरणशास्त्रे पातञ्जलमहाभाष्यस्य यावद् योगदानं वर्तते तावदेव योगदानं भगवतः पतञ्जलेः अपि वर्तते। यथोत्तरं मुनीनां प्रामाण्यम् इत्यादिभिः आभणकैः इदं प्रमाणितं भवति। महान् शब्दयोगी, वाग्योगवित्, सङ्ग्रह-प्रतिकञ्चुकः भाष्यकारः पतञ्जलिः वदति-इष्टमेवैतत् सङ्ग्रहीतं भवति इति। इष्टमित्युक्त्वा तेन ये प्रयोगाः प्रदर्शिताः ते संस्कृतव्याकरणजगति ग्राह्याः जाताः। इष्टमिति ये प्रयोगाः न निर्दिष्टाः ते लोके प्रचारे विद्यन्ते चेदपि साधुत्त्वं न भजन्ते।

महाराज्यं वा पालनीयम्, महाभाष्यं वा पाठनीयम्' इत्येतत् प्रसिद्धं वचनं ग्रन्थस्यास्य श्रेष्ठतां सुष्ठुतया ज्ञापयति। व्याकरणदर्शने भाष्यकारेण सूक्ष्म-गम्भीर-रुक्षाणां विषयाणामपि विवरणं गुडजिह्विकान्यायेन रोचकतया, सरसतया, मधुरतया च शैल्या प्रस्तुतम्। लौकिकैः उपमानैः युक्ता संवादशैली, नितरां सुरक्षिता, स्तुत्या च शैली-आधृता अस्ति।

वेदान्नो वैदिकाः शब्दा सिद्धा लोकान्नो लौकिकाः किमर्थम् अध्येयं व्याकरणम्? इत्येतत् भाष्यकारस्य वचनं सञ्सूचयति यत् तस्मिन्नपि काले संस्कृतस्य अध्ययने जनाः संस्कृतव्याकरणस्य महत्त्वं न जानन्ति स्म। भर्तृहरिरपि ऐतिहासिकं सत्यमिदं सूचयति। व्याकरणस्य ज्ञानाभावेन भविष्यत्काले संस्कृतस्य शुद्धतायाः रक्षणे कियान् क्लेशाः भवेयुः अस्मिन्नपि विषये भाष्कारेण चिन्तितमासीत्। अतः शुद्धभूतेन तेन आगमवचनपरिपालनार्थं 'ब्रह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति घोषितम्। भविष्यपुराणे प्रतिसर्गपर्वणि चित्रकूटनिवासिनः पतञ्जलेः भाष्यविशारदत्त्वमुत्कर्षेण प्रतिपादितमस्ति-

**''चित्रकूटे गिरौ रम्ये, नानाधातुविचित्रिते।**
**तत्रावसन् महाप्राज्ञ, उपाध्यायः पतञ्जलिः॥**
**वेदवेदाङ्गतत्त्वज्ञो, गीताशास्त्रपरायणः।**
**विष्णुभक्तः सत्यसन्धो भाष्यशास्त्रविशारदाः॥''**[1]

एवं तावत् विज्ञायते यत् साम्प्रतमनधिगम्यमानानां पतञ्जलिः पूर्ववर्तिनामशेषाणां व्याकरणभाष्य-वचनानां यथास्थानं महाभाष्यकारेण उपयोगो विहितः। कात्यायनतः पूर्ववर्तिनां वार्तिककाराणां वैयाकरणानां नियमाः, बहूनि वचनानि च यथास्थानं तत्र सन्निविष्टानि सन्ति। सर्वभाष्येषु महिष्ठत्त्वादेव पातञ्जल-भाष्यस्य महाभाष्यत्त्वाभिधानमुपपद्यते। महाऽकूपावगाहेन यथाशक्ति विविधानि रत्नानि यथा विविच्यन्ते, तथैव

पातञ्जलमहाभाष्यस्य पर्यालोचनेन नानातत्त्वानि समासाध्यन्ते विचारकैः विद्वद्वरेण्यैः। ब्रह्मशब्दोपासकेन भर्तृहरिणा वाक्यपदीयं ग्रन्थरत्नं महाभाष्याम्बुधिमन्थनपूर्वकमेवाविष्कृतम्। व्याकरणशास्त्रस्य प्रथमः प्रवक्ता 'ब्रह्मा' समाम्नातः यथोक्तं ऋक्तन्त्रे-ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः।

अर्थप्रत्यायकत्वस्य समनेऽपि साधुशब्दाः धर्मसाधनत्त्वेन बोधिताः सन्ति। महाभाष्येऽपि समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः क्रियते। शब्देनैवार्थोऽभिधेयो नापशब्देन, एवं क्रियमाणमभ्युदयकारि भवति। एवं एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गेलोके च कामधुग् भवति। अन्यच्च तेऽसुराः ''लेहयः हेलयः इति कुर्वन्तः पराबभूवुः, तस्मात् ब्राह्मणेन नाम्लेच्छितवै नापभाषितवै म्लेच्छो हि वा एष यदपशब्दः'' अत्यादिना च असाधूनां शब्दानामधर्मसाधनत्त्वस्य बोधनाद् आगम-मन्त्रोऽयम्-

**यस्तु प्रयुङ्क्ते कुशलोविशेषे, शब्दान् यथावत् व्यवहारकाले।**
**सोऽनन्तमाप्नोति जयं परत्र, वाग्योगविद् दुष्यति चापशब्दैः॥**[2]

अन्यच्च यथा जाया विवृतसर्वावयवा भूता कामयमाना इष्टाय पत्ये प्रेम्णा दर्शयेद् आत्मानम्, तथैव साधुशब्दप्रयोक्त्रे वैयाकरणाय इयं वाक् स्वात्मानं विवृणुते। साधुशब्दस्यैव शक्तितत्त्वं विद्यते। यथोक्तं भर्तृहरिणा-**यथैषां तत्र सामर्थ्यं, धर्मेऽप्येवं प्रतीयताम्।**
**साधूनां साधुभिस्तस्माद्, वाच्यमभ्युदयार्थिभिः॥**[3]

महाभाष्यकारपतञ्जलिः स्वस्य स्वोपज्ञप्रज्ञया अद्भूतेन चित्रविचित्रेण प्रतिभाबलेन शब्दप्रयोगद्वारा सूत्रकारनिर्दिष्टपद्धतिमनुसृत्य प्रभूता सम्भूतया अतिसूक्ष्म बुद्धया शब्दसिद्धेः सुगमं मार्ग बोधयति। तदीया शैली नवनवोन्मेषशालिनी, नानाविधतर्कसमन्विता महत्सूक्ष्मेक्षिकयुता च शास्त्रीयसिद्धान्तं सः यथोचितरीत्या प्रतिपादयति। अस्यां सिद्धान्तप्रतिपादनप्रक्रियायां सः स्वस्य परिष्कृतमस्तिष्कात् समुद्भूताः चिररुचिरानल्पाः कल्पनाः अपि समायोजयति। एताः निगूढाः भूतिकल्पनाः गूढाशयमवगन्तुं न केवलमल्पधी अपितु व्युत्पन्नमतिरपि कष्टमनुभवति, अत एव टीकाकाराणामपि अनेकत्र मतभेदाः दृश्यन्ते।

भाष्यकारेण अनुभवी-न्यायवादी इव अद्भुततर्कैः स्वकीयवादः प्रतिपादितः। अतः पूर्वपक्षस्य उपस्थापनावसरे तदीयं प्रबलं तर्कं दृष्ट्वा अप्रबुद्धः पाठकः कदाचित् अयमेवोत्तरपक्ष इति चिन्तयति। अग्रे उत्तरपक्षस्य उपस्थापनावसरे सः पूर्वोक्तानां तर्काणां सर्वेषां कृते समीचीनमुत्तरं प्रयच्छति। शिष्यबुद्धिपरीक्षणार्थं व्युत्पादनार्थं वा भाष्यकारः सूत्रं विविधरीत्या प्रत्येकपक्षेण च दर्शयति, विवृणोति च तस्मिन् क्षणे यत् सूत्रं योग्यं भवेत् तस्य खण्डनं मण्डनं च कृत्त्वा अन्तिमं निर्णयं पाठकानां कृते त्यजति। भाष्यकारस्य वैज्ञानिकी व्याख्यानशैली अत्युत्तमा वर्तते यत् पूर्वपक्षोत्तरपक्षयोः समर्थनेन प्रबलतमां युक्तिं प्रदर्श्यापि निर्णयावसरे मौनमाश्रयति। भाष्यकारेण कथितं यत्- ''एते दोषाः समा भूयांसो वा। तस्मान्नार्थोऽनया परिभाषया दोषा खल्वपि साकल्येन परिगणिताः। प्रयोजनानामुदाहरणमात्रम्, कुत एतत्। नहि दोषाणां लक्षणमस्ति, तस्मान्नार्थोऽनया परिभाषायाः प्रयोजनानि तदर्थमेषापरिभाषा कर्तव्या, प्रतिविधेयं च दोषेषु एवं कथयन् प्रत्यक्षरूपेण स्वाभिमतं प्रकाशयति। तस्मादस्तु स एव

मध्यम: पक्ष: इति स्पष्टरूपेण अभिप्रायकथनं तु अतिविरलतया शङ्कासमाधनपूर्वकं अवगतं स्यात् इति धिया एव भष्यकारेण निर्णया: न श्राव्यन्ते।''

ये अन्वाख्यान-प्रत्याख्यानपरा: अन्तर्विरोधा: आपातत: दृश्यन्ते तस्य निगूढरहस्यं उत्तरत्वेन स्वयं भाष्यकार: वदति यत् ''न हि दोषा: सन्ति'' इति परिभाषा न कर्तव्या सूत्रं वा न प्रणेयम्, न हि भिच्छुका: सन्तीति स्थाल्यो नाधिश्रियन्ते, न च मृगा: सन्तीति यवा नोप्यन्ते इति। अत एव अनेकेषां सूत्राणां प्रत्याख्यानं ज्ञात्त्वा अपि भाष्यकारस्य इदं कथनं सुसङ्गतं भासते।

प्रमाणभूत-आचार्यो दर्भपवित्रपाणि: शुचावकाशे प्राङ्मुख- उपविश्य........भवितुम्, किम्पुनरियता सूत्रेण अपि च सामर्थ्ययोगान्नहि किञ्चिदस्मिन्शास्त्रे पश्यामि यदनर्थकं स्यात्।[7] अस्य व्याख्यानशैली अत्यन्तं वैचित्र्यपूर्णा, यथाप्रसङ्गं यथाभिमतं समाधानस्य दाने तस्य क्षमता अपूर्वा। किन्तु इदं सर्वं स: पाणिनिव्याकरणस्य परिधौ करोति इत्येतत् स्मर्तव्यम्। भाष्यकार: किमपि परिवर्तनं कृत्त्वा लाघवेन दोषाणां परिहारं प्रदर्शयेद् चेदपि अन्ते इदं दृढं कथयति सिध्यत्येवं सूत्रं तु भिद्यते। अपाणिनीयं तु भवति, यथान्यासमेवास्तु इति। एतदवधेयं यत् भाष्यकार: यावच्छक्यं पाणिनिसूत्रै: एव सर्वं निर्वहति। निरर्थकसूत्रस्य परिवर्तनं वार्तिकानां योजनं वा स: न सहते। वार्तिककार: ''क्ङिति च' सूत्रस्य 'क्ङितिप्रतिषेधे तन्निमित्तग्रहणस्योपसंख्यानम्'', ''उपधारोरवीत्यर्थ'' इत्युक्त्वा तन्निमित्तग्रहणमित्येतद् वदति तत्सर्वमनावश्यकं मन्यमान: भाष्यकार: उपधार्थेन तावन्नार्थस्तन्निमित्तग्रहणेन इति वदन् उक्तस्य प्रस्तावस्य खण्डनं करोति। किन्तु यदा पाणिनिसूत्रेण विशेषयुक्तिप्रयुक्तिभि: अन्यथा सिद्धं भवेत् विरोधं करोति। किन्तु अयं विरोध: ईर्ष्यामूल: न अपितु समन्वयमूल:- ''नासूया कर्तव्या यत्रानुगम आचार्येण क्रियते।

प्रत्याहार-कल्पनाया: विषये अपि भाष्यकारस्य स्वीया धारणा विद्यते। तदनुसारं माहेश्वरसूत्राणां पाणिनिप्रोक्तानां प्रत्ययानां धातूनामपि कदाचित् प्रत्ययग्रहणं किन्तर्हि, प्रत्याहारग्रहणम्, इति प्रत्याहारं मन्यमान: इष्टं साधयति। मात्रच् प्रत्याहार: अस्य उत्तमं निदर्शनम्।

सूत्राणां सन्धिविषयेऽपि भाष्यकारस्य कौशलमत्यपूर्वम्। लक्ष्यानुरोधेन यत्र यथा आवश्यकं तत्र तथैव सूत्रस्य विभागं कुर्वन् इष्टसिद्धिं सम्पादयति। किन्तु कुत्रापि दोष: यथा न स्यात् तथा साधयति इत्येतत् अवधेयम्। गर्गादिभ्यो यञ् टाङसिङसामिनात्स्या: इत्येतयो: सूत्रयो: भाष्यमस्य प्रमाणम् लक्ष्यदर्शनवशेन सूत्राणां न्यासपरिवर्तने योगविभागे चापि भाष्यकारस्य अपूर्वा कल्पनाशक्ति: वर्तते ई च खन: इत्येतत् सूत्रमस्योदाहरणम्। भाष्यकार: अत्र ह्रस्वमिकारं स्वीकरोति। एवं रीत्या महाभाष्यस्य अवलोकनेन ज्ञायते यत् वर्तमानकाले भगवत: भाष्यकारपतञ्जले: अत्यधिकयोगदानं दरीदृश्यते।

**सन्दर्भग्रन्था:**

1. भविष्यपुराण 2. महाभाष्यम्, प्रथमाह्निके 3. वाक्यपदीयम् 4. पा. 1.1.39 5. पा. 1.1.11 6. पा. 1.1.39 7. पा.1.1.1 8. पा. 6.1.77 9. पा. 1.1.4 10. पा. 5.1.49 11. पा. 4.1.105 12. पा. 7.1.12 13. पा. 3.1.111

- सहायकाचार्य: व्याकरणविभाग:,

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालय:), लखनऊपरिसर:, लखनऊ

******

# शब्दरत्नदिशा सामीप्यषष्ठ्यर्थनिराकृतिः

- डॉ. यदुवीरस्वरूपब्रह्मचारी

अथ 'हलन्त्यम्' इत्यत्र हल्पदस्य प्रविष्टत्वाद् 'आदिरन्त्येन सहेता' इत्यत्र इत्पदस्य प्रविष्टत्वाद् इत्पदार्थप्रसिद्ध्युत्तरं हलपदार्थप्रसिद्धिः, हल्पदार्थप्रसिद्ध्युत्तरमित्पदार्थप्रसिद्धिरित्यन्योन्याश्रयः। यद्यपि खल्वयमन्योन्याश्रयो नोत्पत्तिं प्रतिबध्नाति, यतः सूत्रकारस्य हल्पदार्थस्य इत्पदार्थस्य च ज्ञानस्य विद्यमानत्वादिति। अत एव नैषः अन्योन्याश्रयः सूत्रकारस्य। अन्यथा 'आदिरन्त्येन सहेता' 'वृद्धिरादैच्' इत्यादेः 'हलन्त्यम्' इत्यादेश्च पौर्वापर्य न संगच्छेदिति। तथापि शास्त्रयोरुत्पन्नयोः तत्तद्वाक्यजन्यशाब्दबोधे तत्तद्वाक्यघटितपदार्थज्ञानस्य हेतुत्त्वात्तस्य ज्ञानस्य चोक्तरीत्या अनुपपत्तिग्रस्तत्वाद् बोद्धृणाम् अस्माकं तत्तद्वाक्यजन्यशाब्दबोधानुपपत्तेः ज्ञानं प्रतिबध्नात्येवेति। तथा चोक्तं लक्ष्मीकृता ''यद्यपि सूत्रनिर्मात्तुः पाणिनेर्हल्पदार्थेत्पदार्थज्ञानं विना सूत्रनिर्माणं न सम्भवतीति तथापि लक्षणैकचक्षुष्कस्यास्मदादेरन्योन्याश्रयत्वात् ज्ञाने उत्पत्तौ च अन्योन्याश्रयाणि कार्याणि न प्रकल्पन्ते इति[1]''। उपर्युक्तं सर्वं मनसिकृत्य शब्दतत्त्व-विद्भिरन्योन्याश्रयपरिहाराय बहुधा प्रयत्तमिति।

**अन्योन्याश्रयपरिहाराय दीक्षितकृन्मतम्** श्रीमता भट्टोजिदीक्षितेन 'आदिरन्त्येन सहेता' इति सूत्रेण सह प्राप्तान्योन्याश्रयदोषपरिहाराय माहेश्वरसूत्रेषु चतुर्दशसंख्याकस्य हल्सूत्रघटकलकारस्यादौ इत् संज्ञाबोधनाय, पाणिनिना तन्त्रेण, एकशेषेण वोच्चारितस्य हलन्त्यमिति समग्रस्य सूत्रस्य आवृत्तिर्कृता। बोद्धुस्तु एकेन वाक्येनानेकार्थधीः आवृत्त्या एवेति नियमत्वाद्। तथा चावृत्तस्य 'हलन्त्यम्' इति सूत्रस्य सिद्धान्तकौमुद्यां 'हलिति सूत्रेऽन्त्यमित्स्यादि'ति वृत्तिरलेखि। तत्रायं भावः 'उपदेशेऽजनुनासिक इत्' इति सूत्रात् उपदेशे इत् इति पदद्वयमनुवर्तते। आवृत्तभूतं हलन्त्यमिति सूत्रम् एकपदात्मकम्। तत्र च हलः अन्त्यम् इति षष्ठीतत्पुरुषसमासः। अत्र समासघटकहल्पदेन चतुर्दशसंख्याकस्य सूत्रस्य ग्रहणमिति। अन्ते भवम् अन्त्यमिति दिगादित्वाद् यत्। तथा च सूत्रार्थो भवति ''हलः = हल्सूत्रस्य उपदेशेऽन्त्यमित्यस्यात्'' इति। अस्यां चावस्थायाम् 'आदिरन्त्येन सहेता' इति सूत्रे इत्पदार्थज्ञानं सुलभम्। प्रथमेन हल्सूत्रस्य अन्त्यमित् इत्यर्थकेन हल् सूत्रस्थलकारस्येत्संज्ञायाम्, 'आदिरन्त्येन सहेता' इति सूत्रेण तेनेल्लकारेण सहितो हकारः (हल्) इति रीत्या हल्प्रत्याहारसिद्धिर्भवति। तथा च नान्योन्याश्रयः, 'आदिरन्त्येन....' सूत्रे इत्पदार्थस्य प्रसिद्धत्वात्।

ननु हलः- अन्त्यम् इति विगृह्य हलिति सूत्रस्य अन्त्यमित् इति कथनं न युज्यते। 'षष्ठीस्थाने योगा' इति परिभाषया हलः स्थाने योऽन्त्यः स इत् भवतीत्येव सूत्रार्थो भवितुमर्हति न तूपर्युक्तम्। न चेदृगर्थकरणे फलाभावः, अतो न तादृशार्थ इति वाच्यम्। त्वम् अहम्, इत्यत्र 'ङे प्रथमयोरम्' इत्यनेन सुस्थाने जातोऽम्, भविष्यति फलमिति चेन्न। यथा 'ऊदुपधाया गोहः' इति सूत्रे 'गोहः' इति पदे

षष्ठीश्रुतत्वादपि न 'षष्ठीस्थाने योगा' इत्यस्याः प्रवृत्तिः तथैव प्रकृतेऽपि। अयं भावः 'षष्ठीस्थानेयोगा' इति सूत्रप्रवृत्तौ बीजन्तु यत्र अनिर्धारितसम्बन्धविशेषाषष्ठी भवति तत्र स्थानेन योगा बोध्या। प्रतियोगिवाचकात् सम्बन्धे षष्ठीविधानात् सर्वत्रशास्त्रे प्रतियोगिमात्रमुपात्तम्भवति यथा 'इको यणचि' इति सूत्र इक्पदोत्तरा या षष्ठी तदर्थसम्बन्धस्य इक्पदार्थः प्रतियोगी। अनुयोगी तु नास्त्येव। न च यणनुयोगी यणोऽसिद्धतया अनुयोगित्वासम्भवात्। इत्थञ्च असति प्रतिबन्धकेऽत्रशास्त्रे षष्ठ्यर्थः सम्बन्धः स्थानपदार्थानुयोगिक एवेति। तथा हि 'ऊदुपधाया गोहः' इति सूत्रे तु गोहपदार्थः प्रतियोगी, उपधाया इति अनुयागी। अतो नात्र परिभाषायाः प्रवृत्तिः। किञ्च उपधापदं समुदाये नित्यसाकाङ्क्षं भवति। ननुः का नाम उपधा? समुदायविशिष्टत्वमुपधात्वम्। समुदाये वैशिष्ट्यञ्च स्वघटकत्व-स्वघटकान्त्यालवधिकपूर्वत्वम्। यथा राजन्+सु इत्यत्र समन्वयः। समुदायो राजन् इति। तद्वैशिष्ट्यं जकारोत्तराकारे इति। स्वं-राजन्निति समुदायः, तद्घटकत्वं तत्र राजन्निति समुदायेऽकारे। इति प्रथमसम्बन्धसमन्वयः। स्वं-राजन्निति समुदायः। तद्घटकोऽन्त्योऽल् नकारः। तदवधिकपूर्वत्वम् अकारे। इति द्वितीयसम्बन्धस्य समन्वयः। अतो भवत्यत्र अकारः उपधापदवाच्यः तथा च नित्यसाकाङ्क्षार्थबोधकपदसमभिव्याहृतषष्ठ्या असति तात्पर्यानिश्चयाकप्रमाणान्तरे आकाङ्क्ष्यमाणसम्बन्धार्थबोधकत्वमिति नियमेन 'गोहः' इति षष्ठ्या आकाङ्क्षया अवयवावयविभावसम्बन्धस्य निर्धारितत्वेन 'षष्ठी स्थानेयोगा' इति परिभाषाया न प्रवृत्तिः। एवमेव 'हलः अन्त्यम्' इत्यत्रापि हलः इति षष्ठ्या अन्त्यपदस्य नित्यसाकाङ्क्षस्य समभिव्याहारेणाकाङ्क्ष्य-माणावयवावयविभावसम्बन्धबोधकत्वस्याकाङ्क्षैव निर्धारणेन 'षष्ठी स्थानेयोगा' इत्यस्य न प्रवृत्तिः। प्रकृतेऽपि अन्त्यपदं समुदायांशे नित्यसाकाङ्क्षम्। स्वघटकत्वम्, स्वघटकवर्णप्रागभावाधिकरणक्षणावृत्युत्पत्ति-मत्त्वमेतदुभयसम्बन्धेन समुदायविशिष्टत्वस्यान्त्यपदार्थत्वात्। निष्कर्षत्वेन वक्तुं शक्यते यद् यथा गोह इति षष्ठ्या अवयवावयविभावार्थकत्वस्य निर्णयः तथा अन्त्यपदश्रवणेन हल् इति षष्ठ्या अपीति।

साम्प्रतं प्रकृतमनुसरायः। ननु सामीप्यं षष्ठ्यर्थः क्व केन च अभ्युपगतः? यस्य खलु निराकृतिर्विधीयते-उच्यते अन्योऽन्याश्रयदोषपरिहाराय केचन वैयाकरणा लाघवानुरोधेन 'हलन्त्यम्' इति समग्रस्य सूत्रस्य दीक्षितवदावृत्तिन्न विदधति, अपितु तत्सूत्रघटक-हलित्येकदेशस्यैव तन्त्रावृत्त्येकशेषन्यत-मम्भ्युपगच्छन्ति। एवञ्च हलित्येकदेशावृत्तिपक्षे हस्य ल् इति हल् पूर्वसूत्रात् उपदेशे, अन्त्यम्, इत् इति पदत्रयमत्रापि सम्बध्यते। ततश्च सूत्रार्थः फलति उपदेशे हकारसमीपवर्तिलकारः इत् संज्ञको भवति। ततश्च 'आदिरन्त्येन सहेता' इति सूत्रस्य इत्पदार्थज्ञानं सुलभम्। इत्पदज्ञाने च तेन इत्संज्ञकलकारेण सहितः आदिः हकारः हल् संज्ञको भवति। ततश्च 'हलन्त्यम्' इति सूत्रेण तेषामित्संज्ञा सुलभा। एवाप्रीत्या अन्योन्याश्रयः परिहृतो भवति। सम्पूर्णसूत्रावृत्तिपक्षस्तु गौरवग्रस्त इति स्पष्टमेव। एतदेव विषयं पूर्वपक्षतया प्रतिपादयन् व्याचष्टे भट्टोजीदीक्षितः ''स्यादेतत् हलित्येकदेशस्यैव तन्त्रयी-वृत्त्येकशेषान्यतममस्तु। 'हस्य ल्' इति च व्याख्यायते। सामीप्यं षष्ठ्यर्थः[2]'' इति। अत्र पूर्वपक्षत्वेन दीक्षितेन कैयटस्य, स्वगुरोः श्रीमतश्शेषकृष्णस्य च मतमेव दूषितम्। किञ्च कैयटस्य शेषकृष्णस्य च मतं सिद्धान्तकौमुद्याः रत्नाकरटीकाकारेण श्रीरामकृष्णभट्टेन मनोरमाकुचमर्दनीकारेण पण्डितराजजगन्नाथेन

च पुनः समर्थितम्। पुनश्च एतयोः द्वयोः मतं शब्दरत्नकृता हरिदीक्षितेन खण्डितम्। शब्दरत्नकृतखण्डनप्रकार एव एतल्लेखस्य प्रतिपाद्यविषय इति। साम्प्रतं कैयटशेषकृष्णरामकृष्णजगन्नाथस्य ग्रन्थाः क्रमेण अनूद्यन्ते।

**प्रदीपे कैयटः** - ''हल चेति। हस्य ल हल् हल इत्येकः षष्ठीतत्पुरुषः। द्वितीयः प्रत्याहरः नपुंसकमनुपंसकेनेति चैकशेषः। एकस्य पुल्लिँङ्गत्वादितरस्य नपुंसकत्वात्''[3]।

अत्र कैयटस्यैष भावः - भगवतः भाष्यकारेण 'हलन्त्यम्' इति सूत्रे एकशेषनिर्देशः अभ्युपगतः। हल् च हल् चेति हल्। अत्र एकस्य हलः सूत्रपरत्वात् नपुंसकत्वम्। अपरस्य हलः प्रत्याहारपरत्वात् पुल्लिँङ्गत्वम्। अतः ''नपुंसकमनुपुंसकेनैकवच्चास्यान्यतरस्याम्'' इति सूत्रेणेकशेषः। अत्र प्रथमहलिति पदे हस्य ल् इति षष्ठीतत्तपुरुषः। हपदोत्तरषष्ठ्याः सामीप्यमर्थः। अतः आदौ तस्य लस्येत्संज्ञायाम् 'आदिरन्त्येन सहेता' इति प्रत्याहारसिद्धिः। तथा चात्र समग्रस्य सूत्रस्यावृत्तिं विनैवेप्सितार्थसुकरः।

**शेषकृष्णः प्रक्रियाप्रकाशे**- ''ननु 'हलन्त्यम्' (1/3/3) इति लस्येत्संज्ञायाम् 'आदिरन्त्येन सेहता' (1/1/71) इति प्रत्याहारसिद्धिः। सिद्धे च तस्मिन् हल्त्वेन लस्येत्वमितीतरेतराश्रयत्वं प्राप्नोतीति चेत्। उच्यते- 'हलन्त्यम्' इत्यत्र हल्ग्रहणम् तन्त्रेणोपात्तम्। तन्त्रनाम सकृदनुष्ठितस्योभयार्थसमर्थकत्वम्। यथा उभयोः प्रधानयोर्मध्येऽवस्थापितः प्रदीपः सकृत्प्रयत्नकृत उभयोरुपकारको भवति। हल्ग्रहणा वा वृत्तिर्वा। आवृत्तिश्च पुनः पाठः एकशेषो वा। न च द्विवचनप्रसङ्गः। ''नपुंसकमनपुंसकमेकवच्चास्यान्यतरस्याम्'' (1/2/69) इत्येकत्वविधानात्। तत्रैकः षष्ठीतत्पुरुषो हस्य ल् हलिति हकारानन्तरं पठितस्य वर्णसमाम्नायान्तर्भूतस्य लस्याद्येन प्रत्याहारमनपेक्ष्य साक्षादुपादानेनेत्वे विहिते ''आदिरन्त्येन''(1.1.71) इति हल्प्रत्याहारे सिद्धे तमुपादाय द्वितीयेन हलन्त्यम्' इत्यनेन णादीनामित्यसंज्ञा विधीयते इति नेतरेतराश्रयदोषः। अन्ये तु 'हलन्त्यम्' इति सर्वमेव सूत्रमावर्तयन्ति। तत्र हलि अन्त्यमित्येकः सप्तमीसमासस्तेन हलिति सूत्रेऽन्त्यस्य लस्येत्वमिति हल् प्रत्याहारसिद्धिमाहुः। तत्तु गौरवादुपेक्ष्यम्[4]'' इति। अत्र शेषकृष्णस्य मतं स्पष्टमेव न किञ्चिदत्र विवरणमनुभवामः।

**रामकृष्णभट्टः रत्नाकरे** ''ननु 'हल' इत्येकदेशस्य तन्त्राद्यन्यतममस्तु। 'हस्य ल्' इति च व्याख्यास्यते। सामीप्यं षष्ठ्यर्थः। यद्वास्तु समाहारद्वन्दो हल् च ल् च इति। लकारस्य 'संयोगान्तस्य' इति लोपे सति नोक्तदोषावकाशः। तथा च सूत्रावृत्तिर्न कर्तव्या गौरवादिति चेद्-अत्राहुः आद्यस्तावन्न समास्य क्लिष्टत्वात् सामीप्यस्य षष्ठ्यर्थत्वाभावात्। अत एव 'चित्रगुमानय' इत्यादौ चित्रगवीणां समीपवर्तिनो वृक्षादेरानयनाभावः सङ्गच्छते। द्वितीयोऽपि न, संयोगान्तलोपे यणः प्रतिषेधारम्भात्। किचास्यां दशायां हल्पदार्थाबोधे सहविवक्षासम्भवाद् द्वन्द्वोऽपि दुर्लभः इति। तस्मात्सूत्रावृत्तिरेव न्याय्येति। अत्र केचित् वक्ष्यमाणरीत्योक्तपक्षद्वये दूषणविरहात् सूत्रावृत्तिपक्षे गौरवादुक्तपक्षद्वयमेव न्याय्यमित्याहुः। तथा हि किं समासविधायकशास्त्रविरहप्रयुक्तं क्लिष्टत्वम्, उत सामीप्यस्य षष्ठ्यर्थत्वाभाावप्रयुक्तम्। नाद्यः, षष्ठीसमासविधायकशास्त्रस्य सत्त्वात्। न द्वितीयः 'अस्तेर्भूः' इत्यत्रास्तेः समपेऽनन्तरे वेति सन्दिहानेन भाष्यकृतैव तदभ्युपगमात्[5]'' इति।

अत्र रामकृष्णेन स्पष्टतया मनोरमायां दीक्षितोक्तपङ्क्तिमनूद्य खण्डनं कृतम्। कैयटकृतव्याख्या च समर्थिता। तत्र समर्थने च भाष्यस्थं विषयं प्रमाणतयोपस्थापितम्। तत्र भाष्यस्यायमाशयः– 'अस्तेः भूः' इति सूत्रे अस्तेरित्याकरषष्ठ्ययन्तमात्रोपादानात् षष्ठ्यर्थः कः इति जिज्ञासायां भगवता भाष्यकारेण 'अनन्तरे समीपे वा' इति प्रत्ययादि। तच्च कथनं सामीप्यषष्ठ्यर्थाभावे न सिध्यति। अतः हस्य ल् इत्यत्रापि सामीप्यं षष्ठ्यर्थः भवितुं प्रभवत्येति। एतस्य खण्डनमग्रे शब्दरत्ने विधस्यते।

**जगन्नाथः मनोरमाकुचमर्दने**– ''यत्तु ''व्यस्तप्रयोगोऽपि तत्रानिष्टः'' इत्युक्तं तन्न। ''अस्तेः भूः'' इत्यत्र भवति सन्देहः। अस्तेः स्थाने समीपे अनन्तरे वेति। 'षष्ठी स्थाने' इति सूत्रगतेन अनन्तरयोगे एषा षष्ठी इति। उरण् रपरः इति सूत्रगतेन च भाष्यग्रन्थेन सह विरोधपत्तेः। तथा तत्सूत्रगतेन उः समीपे योऽण् तस्यापि रपरत्वप्रसङ्ग इत्यनेन सामीप्यलक्षणोऽपि सम्बन्धोऽवगम्यतेत्यर्थः इत्यनेन च कैयटग्रन्थेन विरोधापत्तेश्च[6]''।

अत्र कुचमर्दनकारेण दीक्षितोक्तविषयमनूद्य खण्डितम्। श्रीमता भट्टोजिदीक्षितेन प्रौढमनोरमायां कैयटादिमतं दूषयता प्रोक्तम् ''आद्य (हस्य लिति षष्ठीतत्पुरुषः) समासस्य क्लिष्टत्वात्। न हि 'ब्राह्मणकम्बलः' इत्यादौ ब्राह्मणसमीपवर्त्यन्यदीयः कम्बलः प्रतीयते। न वा चित्रगुशब्दाच्चित्रगवीणां समीपवर्ती वृक्षादिः प्रतीयते अत एवानन्तरादिषु न समासोऽनभिधानादिति स्पष्टमाकरे। किं बहुना ब्राह्मणस्य कम्बलः 'चित्रा गावोऽस्य' इति व्यस्तप्रयोगोऽपि तत्रानिष्टः''।

कैयटादिभिरुक्तसमीपार्थे षष्ठीसमासो न कदापि भवितुमर्हति। यतो हि यथा ब्राह्मणस्य कम्बलः राज्ञः पुरुषः इत्यादौ स्वस्वामिभावसम्बन्धस्य प्रतीतिर्भवति, तत्प्रतीतौ च न किमपि प्रकरणादिकारणं भवति। किन्तु हस्य ल् इत्यत्र सामीप्यषष्ठ्यर्थस्य प्रतीतिः समीपादिशब्दप्रयोगमन्तरेण न सम्भवति। कुतः? षष्ठ्यर्थाभावादिति। अतस्तस्मिन्नर्थे 'षष्ठी' सूत्रेण समासोऽपि नोपपद्यते। ननु हस्य ल्=हल् इति समासवृत्त्या समीपार्थस्य प्रतीत्यर्थं विग्रहवाक्ये समीपशब्द उपादेयः। इति चेन्न। तथा सति समीपे एव 'हस्य' इति षष्ठ्यन्तस्य अन्वये, 'ल्' इत्यत्र चानन्वयेऽसामर्थ्यम्। यतो हि समस्यमानपदार्थानां परस्परान्वयित्वं सामर्थ्यं भवति। प्रकृते च तदभावात् समास एव न प्राप्नोति। तस्मात् सामीप्यार्थप्रतीत्यर्थं विग्रहवाक्ये तन्न प्रयोक्तुं शक्यम्। ननु भो! हस्य समीपमिति हसमीपम्। तच्च ल् चेति हल्। 'शाकपार्थिवादीनां सिद्धये उत्तरपदलोपश्च' इत्यस्य आकृतिगणत्वात् मध्यमपदलोपिसमासेन समीपस्य सौलभ्यमस्त्येवेति चेत् सत्यम्। किन्तु मध्यमपदलोपिसमासप्रतिपादनं गौरवाय कल्पते। तच्च गौरवं क्लेशाय भवति। अतः सम्पूर्णसूत्रावृत्तिपक्षः एव ज्यायान्।

**सामीप्यषष्ठ्यर्थसाधने युक्त्यन्तरम्** – भगवता भाष्यकारेण 'अस्तेर्भूः' इति सूत्रस्य प्रसङ्गे विचारितं यत् सूत्रे 'अस्तेः' इति पदे षष्ठीमात्रोच्चारणार्थत्वात् सन्देहो जायते, षष्ठ्यर्थः कः? तदा भाष्यकारेणोच्यते ''अनन्तरे समीपे वा'' इति। समीप्यषष्ठ्यर्थाभावे तत्कथनमनुपपन्नं स्यात्। अतो भाष्यप्रामाण्यात् सामीप्यं षष्ठ्यर्थो भवत्येवेति न कैयटादिमते काचिदनुपपत्तिः। तन्न। भाष्याशयो न षष्ठ्यर्थसमीपबोधकपरः अपितु भगवतो भाष्यकारस्य आशयः – 'अस्तेः' इत्यत्र अस्तिपदोत्तरा या

षष्ठी वर्तते। सा षष्ठी किन्निरूपिताऽस्ति, अर्थात् षष्ठ्यर्थसम्बन्धनिरूपकः क इति अस्ति। तदुत्तरञ्चोच्यते- यत् अस्तेः इत्यत्र अनन्तरे, समीपे, स्थाने वा पदमध्याहत्य समीपपदार्थनिरूपितः षष्ठ्यर्थसम्बन्धः। स्थानपदार्थनिरूपितषष्ठ्यर्थसम्बन्धो वा बोध्यः। स च सम्बन्धः निवर्त्यनिवर्तकभावः, स एव षष्ठ्यर्थो न तु सामीप्यम्। तथा चोक्तं शब्दरत्ने ''अस्तेरन्तरे समीपे वा इत्यादिभाष्यं त्वनन्तरादिपदाध्याहारेण तन्निरूपितसम्बन्धार्थिका, स्थानपदाध्याहारेण तन्निरूपितसम्बन्धार्थिका वा षष्ठीत्यभिप्रायकम्''[7]।

न च स्थानपदं षष्ठ्यर्थ एवेति, तत्प्रतिपत्तये अध्याहारो नावश्यक इति शङ्कनीयम्। 'स्थानेन योगो यस्याः' इति व्यधिकरणपदकबहुव्रीहिपद्रर्शनपरभाष्यात् स्थानरूपः सम्बन्धो न षष्ठ्यर्थः। अन्यथा स्थान योगो यस्या इत्येव उक्तं स्यादिति।

**सामीप्यषष्ठ्यर्थाभावे युक्त्यन्तरम्**- गावोऽस्य सन्त्यनन्तरा इत्यर्थे मतुब्भवति न वेति आशङ्कायाम् उच्यते न भवति। कुत इति चेत् आनन्तर्यमस्त्यर्थवत् प्रकृत्यर्थोपाधिरस्ति। अयम्भावः- गावोऽस्य सन्तीत्यर्थे यथाऽस्त्यर्थः प्रकृत्यर्थस्य गोपदार्थस्य विशेषणन्तथानन्तर्यमपि प्रकृत्यर्थस्य गोपदार्थस्य विशेषणम्भवति न तु षष्ठ्यर्थत्वेनानन्तर्यस्य प्रत्ययार्थत्वमिति। न च वर्तमानकालावच्छिन्नास्त्यर्थस्य प्रकृत्यर्थविशेषणत्वे अभ्युपगमे गोमानासीत् इत्यत्र प्रथमान्तस्य क्रियायामन्वयो न स्यादिति वाच्यम्। तादृशव्यवहारविषये गोमानित्यत्र लक्षणास्वीकारान्न दोष इति। किञ्च गावोऽस्य सन्त्यनन्तरेत्यर्थे भगवता भाष्यकारेण सामार्थ्याभावात्तद्धितवृत्तिरेव नेति कथितम्। ''सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो न'' इति न्यायादसामर्थ्यमिति। यथा ऋद्धस्य राज्ञः पुरुषः इत्यत्र राज्ञि ऋद्धस्य विशेषणत्वाद्राज्ञः पुरुषेण सह समासो न भवति। तेनैव प्रकारेण प्रकृतेऽपि गोपदार्थे आनन्तर्यस्य विशेषणत्वन्मतुप्प्रत्ययो न भवति। यदि आनन्तर्यषष्ठ्यर्थः स्यात्तदा तु सामर्थ्यं स्यादेवेति। अतः सामीप्यं षष्ठ्यर्थः न भवति। तत्सर्वम्मनसिकृत्य उक्तं शब्दरत्नकारेण ''अत एव मतुप्सूत्रे कैयटेन 'गावोऽस्य सन्त्यनन्तराः' इत्यर्थे मतुप्शङ्कापर- भाष्यव्याख्यावसरे आनन्तर्यमस्त्यर्थवत्प्रकृत्यर्थोपाधिरित्युक्तम्, न तु तस्य षष्ठ्यर्थत्वमुक्तम्। भाष्यकृता च असामर्थ्यात्तत्र वृत्यभाव उक्तः। षष्ठ्यर्थत्वे तु प्रत्ययार्थत्वात्वावासामर्थ्यम्''[8]। एवञ्च यत्र 'गुरुपुत्रो देवदत्तस्य किञ्चिद्' इत्यादौ एकस्यैव षष्ठ्न्यतपदप्रयुक्तत्वात् देवदत्तसमीपवर्ती गुरुपुत्रः अथवा देवदत्तसमीपवर्ति किञ्चिदित्यर्थः प्रतीयते। अत्रापि न समीप्यं षष्ठ्यर्थः अपितु समीपबोधकानन्तरादि- पदाध्याहृत्य एव बोध उपपादनीयः।

**समीप्यषष्ठ्यर्थाभावे द्वितीयोक्तिः** - यथा पीतम् अम्बरमस्येत्यर्थे बहुव्रीहिसमासविधायक- शास्त्रेऽस्तिपदाभावेऽपि वर्तमानकालावच्छिन्नस्त्यर्थान्तरर्भावमभ्युपगम्य बहुव्रीहिसमासो भवति। तथैव शब्दशक्तिस्वभावाच्चित्राः गावः सन्त्यस्य इत्यर्थे मातुबपि भविष्यति एवास्तिग्रहणस्य न फलम्। किन्तु सूत्रकारस्याज्ञानकल्पनकल्पनापेक्षयाऽन्यफलकत्वकल्पनमेव वरम्। अन्यफलन्तु अस्तिमान् इति रूपसिद्धिः। अत्र हि सत्ताकर्तृधनवाचिकोऽस्ति शब्दोऽव्ययम्। तस्यास्ति-समानाधिकरण्याभावान्मतुप् प्रत्ययो न प्राप्नोति अतः अस्तिग्रहणमिति। उक्तञ्च भाष्यकारेण ''तद्वै क्रियमाणमपि प्रत्ययविध्यर्थं, नोपाध्यर्थम्। अस्ति मान्निति मतुप्यथा स्यात्। किञ्च कारणं न स्यात्। अप्रातिपदिकत्वात्। नैव दोषः। अव्ययमेषोऽस्ति शब्दः नैषोऽस्तेर्लट्। कथमव्ययत्वम्। विभक्तिस्वरूपप्रतिरूपकाश्च निपाता भवन्तीति निपातसंज्ञा,

निपातोऽव्ययमिति अव्ययसंज्ञा। एवमपि न सिध्यति। किं कारणम्। अस्तिना समानधिकरण्ये मतुब् विधीयते। न च अस्तेरस्तिना सामानाधिकरण्यम्। तदेतत् क्रियमाणमपि प्रत्ययविध्यर्थं नोपध्यर्थम्''[9]। इति।

**अत्रायं सारः** – यथा 'तदस्यास्ति तस्मिन्निति मतुप्' इति सूत्रेऽस्ति ग्रहणाभावे अथवा अस्ति मानित्यस्य साधुत्वार्थान्तरस्य सत्त्वेऽपि अस्त्यर्थान्तर्भावेण यथा शब्दशक्तिस्वभावान्मत्वर्थोयो बहुव्रीहिश्च भवति, तेनैव प्रकारेण चित्रा गावोऽस्य सन्त्यनन्तरा इत्याद्यर्थे आनन्तर्यस्यान्तर्भावे बहुव्रीहिमत्वर्थो-यौ अपि स्यातामिति चेन्न। अनभिधानान्न भवतः अनभिधानन्तु आनन्तर्यस्य षष्ठ्यर्थाभावे एवास्ति। एतत्सर्वमनसिकृत्य शब्दरत्ने उच्यते ''तत्रास्तिग्रहणाभावे तस्यान्यफलकत्वे वा सूत्रानुपात्तास्त्यर्थान्तर्भावेण मत्वर्थीयवदबहुव्रीहिवच्च तथाभूतानान्तर्याद्यर्थान्तर्भावेण चित्रो गावोऽस्य सन्त्यनन्तरा इत्याद्यर्थे बहुव्रीहिमत्वर्थीयौ न भवतोऽनभिधानादिति मतुप्सूत्रे भाष्ये स्पष्टम्''[10]।

**सामीप्यषष्ठ्यर्थाभावप्रतिपादकतृतीयोक्तिः**– राज्ञः इदम् अनन्तरम् इत्येव रूपेण आनन्तर्यस्य इदमर्थत्वे न शैषिकाण् प्रत्ययोत्पत्तिः। अनभिधानात्। अनभिधाने च कारणं षष्ठ्यर्थः आनन्तर्याभाव एव तथा च वदति शब्दरत्नकारः ''अनन्तरादेरिदमर्थत्वे तस्येदम् (4/3/120) इति शैषिकोऽप्यनभिधानान्नेति तस्येदम् इत्यत्र भाष्य''[11]।

**आक्षेपः** – ननु यदि सामीप्यं षष्ठयर्थः न अभ्युपेयते तर्हि ग्रामकूपः, गङ्गातीरम् इत्यादिवाक्यानां कथमुपपत्तिः भविष्यति। यतो हि अत्र ग्रामशब्दः शालासमुदाये वर्तते। तथा च कूपस्तत्र भवितुं नार्हति। शालासमुदायात् बहिः विद्यमानत्वात्। अवयवावयविभावसम्बन्धस्याभावाच्च तस्मात् ग्रामसमीपवर्ती कूपः इत्येव सर्वानुभवात्। सामीप्यषष्ठ्यर्थाभावे तदनुभवस्य दुरुपपादत्वाच्चेति। अतः सामीप्यषष्ठ्यर्थो भवत्येव इति चेदुच्यते– समीपेऽवयवत्वारोपेण समास इति न दोषः। अर्थात् कूपस्य सामीप्यात् ग्रामनिरूपितावयवत्वारोपात् समासः सुलभः। तस्मात् सामीप्यस्य षष्ठ्यर्थप्रतिपादने न मानम्। न च सामीप्यादिबोधकैः शब्दैरपि समासाभावः इति चिन्तनीयम्। राज्ञः अनन्तरं 'राजानन्तरम्' इत्यादिषु तु समासो भवत्येव। समासाभवप्रयोजकासामर्थ्यस्याभावात्। सामीप्यषष्ठ्यर्थे समासो नेति भावः। तस्मात् सम्पूर्णसूत्रावृत्यैवान्योऽन्याश्रयो वारणीयो न तु एकदेशावृत्येति अलं विस्तरेण।

सन्दर्भसंकेतः–

1. वैयाकरणसिद्धान्तकौमुदी, लक्ष्मीटीकायुता, पृष्ठ सं.-14, प्रकाशकः मोतीलालबनारसीदासः, वाराणसी।
2. प्रौढमनोरमायाम्, पृष्ठसं., 12
3. महाभाष्ये 'हलन्त्यम्' इति सूत्रे प्रदीपे।
4. प्रक्रियाकौमुद्याः प्रकाशटीकायाम्, हलन्त्यम् इति सूत्रे।
5. सिद्धान्तकौमुद्याः रत्नाकरटीकायां हलन्त्यमिति सूत्रे।
6. मनोरमा कुचमर्दने।
7. शब्दरत्ने षष्ठ्यर्थनिराकृतप्रसङ्गे
8. तत्रैव
9. महाभाष्ये मतुप्सूत्रे।
10. शब्दरत्ने षष्ठ्यर्थनिराकृतप्रसंगे।
11. प्रौढमनोरमायाः शब्दरत्ने, अन्योन्याश्रयदोषनिराकरणप्रसङ्गे।

– संविदा अध्यापकः व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः), लखनऊपरिसरः, लखनऊ

******

# साहित्यशिक्षणे अलङ्कारशिक्षणम्

-डॉ. बिचित्ररंजनपण्डा

अलङ्कारशब्दस्यार्थः साहित्यशास्त्रे भूषणरूपेऽर्थे सौन्दर्यरूपेऽर्थे वा व्यवह्रियते। तथाहि अमरसिंहेनोक्तम्- 'अलङ्कारस्त्वाभरणं परिष्कार विभूषणम्' (अ.को. 2/0/21)' अलमिति उपपदात् कृधातोः घञि अयं शब्दो निष्पद्यते। काव्यशोभाकरा धर्मविशेषा अलङ्कारा इति साहित्यशास्त्रे कथितमस्ति तथाहि- आचार्यो दण्डी प्राह- 'काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते। प्राचीना नैके काव्यतत्वमीमांसाकाः काव्येऽलङ्काराणामवश्यं वर्तमानत्वं स्वीकुर्वन्ति। स्फुटरूपेण अस्फुटरूपेण वा अलङ्काराणां विद्यमानत्वं स्वीकरोति जयदेवः। चन्द्रालोके कथयति-

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मात् शब्दार्थावनलङ्कृतिः॥**

जयदेववचनात् वयमित्थं प्रतीमो यत् काव्यस्य कृते अलङ्कारः अवश्यमेवास्ति प्रयोजनीयः। अलङ्करोति इति अलङ्कारः। अलं क्रियते अनेन इति अलङ्कारः। अलङ्काराणामपि काव्ये महद् महत्त्वं दृश्यते। 'न कान्तमपि निर्भूषं विभाति वनिताननम्' गुणगौरवसमन्विता वनिता यथा सालङ्कारैरेव शोभते न तथा अलङ्कारविहीना। एवमेव शब्दार्थयोः सौन्दर्याधायकं तत्त्वं भवति अलङ्कारः। अलङ्कारः शब्दार्थयोः न केवलं सौन्दर्यमेव समेधयति, अपि तु तत्र चमत्कृतिम् आदधाति। सैव चमत्कृतिः क्वचित् उपमादिरूपेण, क्वचित् वक्रोक्त्या, क्वचित् अतिशयोक्त्या क्वचित् च केवलं शब्दसाम्यमूलकेन अनुप्रासेन द्योतते।

यद्यपि काव्यात्मरूपेण नास्य महत्त्वं, तथापि शब्दार्थशरीरस्य वाह्यसौन्दर्यवर्धनेन समं रसादीनामपि पोषयति। अलङ्कारस्य तादृशं महत्त्वं यथा शरीरेऽलङ्काराणां वस्त्रादीनां वा। यथा सकलगुणसमन्वितस्यापि मानवस्य निर्वासनं न शोभते, तथा च अलङ्काररहिता नारी न शोभते। तथा अलङ्काररहितं काव्यम्। उद्घोषयति भरतः यथा-

**अलङ्कारैर्गुणैश्चैव बहुभिः समलङ्कृतम्।**
**भूषणैरिव चित्रार्थैस्तद्भूषणमिति स्मृतम्॥**

अग्निपुराणे यथा- 'अलङ्काररहिता विधवैवसरस्वती'। वामनेन अलङ्कारस्य द्वैविध्यं स्वीकृतम्। भूषणत्वेन सौन्दर्यत्वेन च। उक्तं च तेन- 'काव्यं ग्राह्यमलंकारात्', 'सौन्दर्यमलङ्कारः' काव्यशास्त्रगतं सर्वमपि सौन्दर्यमलङ्कारशब्देन परिगृह्यति सः। मम्मटस्य अलङ्कारलक्षणं यथा -

**उपकुर्वन्ति तं सन्तं येङ्गद्वारेण जातुचित्।**
**हारादिवदलंकाराः तेऽनुप्रासोपमादयः॥**

कविराजविश्वनाथानुसारं अलङ्कारलक्षणं यथा-

**शब्दार्थयोरस्थिता ये काव्यशोभातिशायिनः।**
**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥**

अलङ्काराः अङ्गदादिवत् शब्दार्थयोः शोभावर्धकाः रसादीनां चोपकर्तारः, प्रसादादिगुणवत् अलङ्काराः न अपरिहार्याः। अत एव अस्थिरधर्माः इत्युच्यन्ते।

**अलङ्काराणां काव्ये स्थानम्**

विषयेऽस्मिन् विविधाः विप्रतिपत्तयः। रीतिवादिनः अलङ्कारवादिनश्च काव्ये अलङ्कारस्य स्थितिमनिवार्यं मन्यन्ते। वामनः भणति काव्यशोभायाः कर्तारः गुणाः तदतिशयहेतवस्तु अलङ्काराः। गुणाः काव्यशोभाजनकाः, अलङ्कारास्तु तदतिशयसम्पादनसाधनाः। एवं अलङ्काराणां महत्त्वं जायते। ध्वनिवादिनः आनन्दवर्धनमम्मटादयः अलङ्काराणां महत्त्वं न स्वीकुर्वन्ति। यथा चोक्तं काव्यलक्षणे मम्मटेन 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इत्यनेन सूच्यते यत् अलङ्काराभावेऽपि न काव्ये कापि क्षतिः। मम्मटलक्षणे व्यङ्ग्यं कुर्वन् चन्द्रालोककारः जयदेवः अभिधत्ते, यत् अलङ्काररहितस्य काव्यस्य कल्पना तथैव हास्यास्पदा भवति यथा उष्णत्वगुणरहितस्य वह्नेः। उक्तं च-

**शब्दार्थयो प्रसिद्ध्या वा कवेः प्रौढिवशेन वा।**
**हारादिवदलङ्कारः सन्निवेशो मनोहरः॥**

**अलङ्काराणां क्रमविकासः**

अलङ्काराणां सर्वप्रथममुल्लेखः भरतकृते नाट्यशास्त्रे प्राप्यते। तत्र यमक-रूपक-उपमा-दीपकानीति चत्वारः अलङ्काराः निर्दिश्यन्ते। अग्निपुराणे पञ्चदश अलङ्काराः सन्ति। वामनकृते काव्यालङ्कारसूत्रे त्रयस्त्रिंशत् अलङ्काराः। दण्डिकृते काव्यादर्शे पञ्चत्रिंशदलङ्काराः। भामहकृते काव्यालङ्कारे उनचत्वारिंशत् अलङ्काराः। उद्भट्टकृते अलङ्कारसारसंग्रहे एकचत्वारिंशदलङ्काराः। रुद्रटकृते काव्यालङ्कारे द्विपञ्चाशदलङ्काराः, मम्मटस्य काव्यप्रकाशे सप्तषष्ठि अलङ्काराः। विश्वनाथकृते साहित्यदर्पणे चतुरशीति अलङ्काराः, जयदेवकृतचन्द्रालोके एकशतम् अलङ्काराः एवं प्रकारेण अलङ्काराणां वृद्धिः जायते।

**अलङ्काराणं विभाजनम्**

शब्दार्थदृष्ट्या अलङ्कारस्त्रिधा विभज्यन्ते। शब्दालङ्काराः, अर्थालङ्काराः, उभयालङ्काराः। तत्र शब्दालङ्काराः अनुप्रासादयाः, अर्थालङ्काराः उपमारूपकउत्प्रेक्षादयः, उभयालङ्कारे श्लेषः गृह्यते। शब्दालङ्कारअर्थालङ्कारयोः भेदः निरूप्यते यत्- शब्दपरिवर्तनासहत्वे शब्दालङ्काराः। शब्दपरिवर्तनसहत्वे चार्थालङ्कारः। शब्दालङ्कारे शब्दपरिवर्तनेन अलङ्कारक्षतिः। अर्थालङ्कारे तु शब्दपरिवर्तनेन सत्यपि नालङ्कारहानिः।

**शब्दालङ्कारस्य उदाहरणम् यथा- अनुप्रासः**

'वर्णासाम्यानुप्रासः'। यत्र अव्यवधानेन वर्णानां समता वर्तते तत्रानुप्रासः। अनुप्रासः वर्णगत-शब्दगतत्वेन च द्विविधः। वर्णानुप्रासः च्छेकवृत्तिगतत्वेन द्विविधः।

**च्छेकानुप्रासः -**

'सोऽनेकस्य सकृत्वपूर्वः'। अनेकव्यञ्जनवर्णस्य यत्र एकवारमात्रं साम्यं भवति तत्र च्छेकानुप्रासः। च्छेकः नाम पण्डितः, तत्प्रियत्वेन च्छेकानुप्रासः। उदाहरणम् यथा-

**ततोऽरूणपरिस्पन्दमन्दीकृतवपुः शशी।**
**दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम्॥**

श्लोकेऽस्मिन् 'स्पन्दमन्दीकृत' इति स्थले नकार-दकारयोः तथा 'गण्डपाण्डु' इति स्थले णकार-डकारयोः सकृत् साम्यम्' अतः च्छेकानुप्रासः।

**अर्थालङ्कारस्य उदाहरणम् यथा- 'उपमेयोपमा'**

''विपर्यास उपमेयोपमा तयोः'। इति

अर्थात् यत्र वाक्यद्वये प्रागेव उपमानत्वेन परिगृहीतं पदं उपमेयत्वेन कल्प्यते तत्र उपमेयोपमालङ्कारः भवति। तयोः विपर्यासः इत्यनेन उपमानोपमेययोः परिवर्तनम्। उपमानत्वेन कल्पितस्य पदस्य उपमेयत्वेन कल्पनमित्यर्थः। यथा- **कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः।**
**धरणीव धृतिर्धृतिरिव धरणी सततं विभावि वत यस्य॥**

अस्मिन् श्लोके कमलेव मतिरिति कथनात् 'कमला' उपमानम्। 'मतिः' उपमेया भवित। पुनः 'मतिरिव कमला' इति कथनात् प्रथमतः उपमानत्वेन समासीनं 'कमला' पदमुपमेयपदभाग् भवति। एवमपि धरणीवधृतिरित्यादौ बोद्धव्यम्। अतः अत्र उपमेयोपमालङ्कारः।

**उद्देश्यानि**

1. सौन्दर्यानुभूतेः सम्पादनम्। 2. चमत्कृतेः सम्पादनम्।

शिक्षकैः काव्यशिक्षणावसरे अलङ्कारप्रयोगस्थले सौन्दर्यानुभूतेः प्राधान्यं दातव्यं भवति। छात्राः आलङ्कारिकपदानां भूयो भूयः व्यख्यया श्रवणेन च सौन्दर्यानुभूतिं प्राप्तुं शक्नुवन्ति। प्रारम्भिकस्तरे शब्दालङ्काराणां अवबोधः, माध्यमिकस्तरे अर्थालङ्काराणां ज्ञानं तथा उच्चस्तरे च काव्यशास्त्रिभिः स्वलक्षणग्रन्थेषु उदाहरणरूपेण स्वीकृताः श्लोकाः बोधनीयाः भवन्ति। अतः काव्यशिक्षणं सौन्दर्यानुभूतये भवतीति शिक्षकेण ज्ञातव्यम्।

**कक्ष्यायाम् अस्य विधेः उपयोगः** -शिक्षकः बहुविधोदाहरणानि प्रदर्श्य समुचितालङ्कारस्य लक्षणम् उपस्थायति। लक्षणैः सह उदाहरणानि सङ्गमयति। बहूनामुदाहरणानाम् आधारेण छात्राः नूनमेव निश्चितस्य कस्यापि एकस्य अलङ्कारस्य वैशिष्ट्यं जानीयुः।

**सन्दर्भग्रन्थसूची-**


1. नाट्यशास्त्रम्, श्री बाबूलाल शुक्ल शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी।
2. काव्यादर्शः, शिवनारायण शास्त्री, परिमल पब्लिकेशन्स, दिल्ली।
3. काव्यप्रकाशः, डा. ज्योत्स्ना मोहन, नाग प्रकाशन, दिल्ली।
4. साहित्यदर्पणः, आचार्य कृष्णमोहनशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी।
5. साहित्यशिक्षणविधिः, प्रो. लोकमान्यमिश्र, राजस्थान ग्रन्थागार, जोधपुर।
6. साहित्यशिक्षणविधयः, डा. एन्. लता, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति।



- संविदाध्यापकः-शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः), लखनऊपरिसरः, लखनऊ


******

# साहित्यशास्त्रीयालङ्कारशिक्षणम्

– डॉ. रुद्रनारायणनरसिंहमिश्रः

**नभसो भूषणं चन्द्रो नारीणं भूषणं पतिः।**
**पृथिव्या भूषणं राजा विद्या सर्वस्व भूषणम्॥**

इति विद्यायाः महत्त्वं प्रतिपादितं वर्तते। एवमेव साहित्यस्य महत्वमपि अस्माभिः ज्ञातव्यं भवति। तत्पूर्व साहित्यस्य विभिन्नार्थाः ज्ञातव्याः भवन्ति। 'सहितयोः शब्दार्थयोः भावः' साहित्यम्। अर्थात् शब्दस्य तथा अर्थस्य सहभावः भवति 'साहित्यम्'। 'शब्दः तथा अर्थस्य अनुरूपः सन्निवेशः' अत्र परिदृश्यते। साहित्यशब्दस्य व्युत्पत्त्यर्थः एवं भवति यत् दिवादिगणीयात् तृप्त्यर्थकात् षह् धातोः निष्ठासूत्रेण क्तप्रत्यये कृते सहितम्। अर्थात् तृप्तं तस्य भावः साहित्यम्। अत्र तृप्ति इत्यस्य लौकिकभिन्ना फलाभिलाषशून्यता च भवति। सा तृप्तिः अलौकिकानन्दान्तर्गता। एवम् अलौकिकस्य आनन्दस्य कारकं साहित्यमिति फलितार्थः ग्रहणीयः। भारतवर्षस्य समस्तमपि प्राचीनवाङ्मय-संस्कृतभाषा-साहित्यञ्च आश्रित्यैव अवतिष्ठते। किं बहुना श्रुतिस्मृतिसमलङ्कृतं पुराणेतिहासभूषितं गद्यपद्यचम्प्वादिविविध- काव्यविद्यालङ्कृतमिदं संस्कृतसाहित्यं समृद्धमस्ति। साहित्यमाधारीकृत्येव शास्त्रं पल्लवितं कुसुमितं च भवति।

तत्रापि शिक्षणं निरन्तरं सततं प्रचल्यमाना एका प्रक्रिया। अनया मानवः विद्यालयतः, परिवारतः, समाजतः, वातावरणतश्च कमपि शिक्षमाणः भवति। अतः शिक्षणमेका सामाजिकी प्रक्रिया। अस्यां प्रक्रियायां शिक्षकः, छात्रः, पाठ्यक्रम इति त्रयोऽपि मिलित्वा शिक्षासौधं निर्मान्ति। तात्पर्यार्थो यत् कक्षयां शिक्षार्थिभ्यः शिक्षकेण दीयमानं ज्ञानं परामर्शो वा शिक्षणं भवति। संस्कृतसाहित्यस्य शिक्षणं संस्कृतसाहित्यशिक्षणमित्युच्यते। सत्य-शिव-सुन्दरमेव संस्कृतसाहित्यशिक्षणस्य मुख्योद्देश्यं भवति। एतेषामुद्देश्यानां पूत्यर्थं शिक्षकैः अवश्यं प्रयासः कर्त्तव्यः। संस्कृतसाहित्यशिक्षणतः रसानुभूतिः आनन्दानुभूतिश्च सिध्यति। रसानुभूतिप्राप्तये शिक्षकैः रमणीयतया विषयस्य प्रतिपादनं कर्त्तव्यं भवति। रमणीयतया विषयस्य प्रतिपादने अलङ्कारप्रस्थानस्य स्थानं महत्वपूर्णं वरीवर्त्ति। यतोहि संस्कृतसाहित्यस्य प्रस्थानेषु अलङ्कारप्रस्थानस्य प्रधानं लक्ष्यम् आह्लादप्रदानम् काव्यस्वरूपगुणालङ्कारादीनां निष्कर्षाय प्रवृत्तस्य अलङ्कारशास्त्रस्य क्रियाकलापः[1] काव्यालङ्कारः[2] काव्यमीमांसा[3] साहित्यविद्येति[4] संज्ञान्तराण्यासन्निति साहित्यलक्षणग्रन्थेभ्यः अवगम्यते। अलङ्कारशास्त्रापराभिधानं साहित्यं कदा शास्त्रत्वेन निर्गलितमिति वक्तुं न शक्यते। सर्वाण्यप्यास्तिकानि शास्त्राणि वेदैकप्रभवानीव अलङ्कारशास्त्रमपि वेदमूलमिच्छन्ति सम्प्रदायिकाः। वेदे प्रारम्भिकीं साहित्यिकीं सुषमामवलोकयन्ति निर्मत्सरा विपश्चितः। ऋग्वेदे-

**उत त्वः पश्यन्न ददर्श वाचमुतत्त्वः शृण्वन्न शृणोत्येनाम्।**

**उतो त्वस्मै तन्वं विसस्रे जायेव पत्यु उशती सुवासा:॥**[5]

इति मन्त्रे वाच: महिमा प्रदर्शित:। उक्ते: वैचित्र्यमत्र अभिव्यक्तम्। काव्यम् उक्तिवैचित्र्येण प्रथमं चित्ताकर्षकं भवतीति ऋग्वेदकवीनाम् अभिप्राय: अनेन सूचितो भवति। उक्तिवैचित्र्यं व्यवस्थितक्रमेण प्रवृद्धं सत् शास्त्रस्वभावं प्राप्य अलङ्कारशास्त्रमिति संज्ञया व्यवहृतमिति केचन विमर्शका: अभिप्रयन्ति। प्राचीनतमे ऋग्वेदे उपमा इति पदस्य प्रयोगो दृश्यते। तुल्यरूपार्थ एव उपमापदस्य वैयाकरणै: चर्चित: उपमाविषय: अलङ्कारशास्त्रे उपमाविभाजने बहूपकरोति। व्याकरणशास्त्रात् उपकृतमिदम्। अलङ्कारशास्त्रम् इत्यत्र नास्ति सन्देह:। अलङ्कारशास्त्रमासीदित्यस्य क्रिस्तो: पूर्वतनेषु पुरातनेषु ग्रन्थेषु प्रमाणानि नैवोपलभ्यन्ते, छान्दोग्योपनिषदि विद्याशाखा: निर्दिश्यन्ते। तत्र अलङ्कारशास्त्रं नैव निर्दिष्टम्।

अलङ्कारशब्दस्यार्थ: साहित्यशास्त्रे भूषणरूपेऽर्थे सौन्दर्यरूपेऽर्थे वा व्यवह्रियते। तथाहि अमरसिंहेनोक्तम्- **'अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम्'**[6]। अलमिति उपपदात् कृधातो: घञि अयं शब्दो निष्पद्यते। 'अलङ्कार' इति पदस्य चतुर्षु भूषणपर्याप्तिशक्तिवारणरूपेष्वर्थेषु व्यवहारोऽपि भवितुमर्हतीति। साम्प्रतिकविद्वांसो राधावल्लभादयो ब्रूवते। अमरसिंहेनापि चत्वारोऽर्था: प्रदत्ता:। यथा- 'अलं भूषणपर्याप्तिशक्तिवारणवाचकम्' नाट्यशास्त्रेऽलङ्कारगुणावेव भूषणत्वेन कथिता। तथाहि- 'अलङ्कारै: गुणैश्चैव बहुभि: समलङ्कृतम्।' भूषणैरिव चित्रार्थै: तद् भूषणमिति स्मृतम्। काव्यशोभाकरा धर्मविशेषा अलङ्कारा इति साहित्यशास्त्रे कथितमस्ति। तथाहि- आचार्यो दण्डी प्राह-

'काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचख्यते।' अन्येऽपि आचार्या: वामन-मम्मट-विश्वनाथ-प्रभृतयोऽलङ्कारस्य लक्षणं बहुधा प्रतिपादयामासु:। तथाहि- काव्यं ग्राह्यमलङ्कारात् सौन्दर्यमलङ्कार: काव्यशोभाया: कर्त्तारो धर्मा गुणा: तदतिशयहेतवस्त्वलङ्कारा:।[7]

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**

**हारादिवदलङ्कारास्तेऽनुप्रासोपमादय:॥**[8]

**शब्दार्थयोरस्थिरा ये धर्मा: शोभातिशायिन:।**

**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥**[9]

अलङ्कृतिशब्दो भावसाधन: सौन्दर्यपरकोऽस्ति। प्राचीना: नैके काव्यतत्त्वमीमांसका: काव्येऽलङ्काराणामवश्यं वर्त्तमानत्वं स्वीकुर्वन्ति। मम्मट: स्फुटरूपेणास्फुटरूपेण वालङ्काराणां विद्यमानत्वं स्वीकरोति। जयदेव: चन्द्रालोके कथयति-

**अङ्गीकरोति य: काव्यं शब्दार्थावनलङ्कृती।**

**असौ न मन्यते कस्मात् शब्दार्थावनलङ्कृती॥**[10]

जयदेववचनात् वयमित्थं प्रतीमो यत् काव्यस्य कृतेऽलङ्कार: अवश्यमेव अस्ति प्रयोजनीय:। आचार्यो दण्डी 'न कान्तमपि निर्भूषं विभाति वनिताननम्' इत्यनेन वचनेनापि अलङ्कारस्य आवश्यकतां

प्रतिपादयति। भरतमुनिना उपमा, रूपकं, दीपकं, यमकञ्चेति चत्वारः अलङ्काराः निरूपिताः। काव्यालङ्कारसारसंग्रहे उद्भटेन एकचत्वारिंशदलङ्काराः वर्णिताः। भरतप्रतिपादितालङ्कारचतुष्टयः एव कुवलयानन्दादिग्रन्थेषु पञ्चविंशत्यधिकशतसंख्यकाः जाताः।

पाणिनेः अष्टाध्याय्याम् उपमा, उपमान, उपमितिसामान्यादि अलङ्कारशास्त्रीयशब्दानां प्रयोगः कृतः। यथा-

**तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्।**[11]

**उपमानानि सामान्यवचनैः।**[12]

**उपमितं व्याघ्रादिभिः सामान्याप्रयोगे।।**[13]

भरतेन नाट्यशास्त्रे रूपकविषये अलङ्कारचतुष्टयस्य उल्लेखः कृतः। ते यथा- उपमा, रूपकं, दीपकम् एवं यमकमिति। तद्यथा-

**उपमा दीपकं चैव रूपकं यमकं तथा।**

**काव्यस्यैते अलङ्कारश्चत्वारः परिकीर्तिताः।।**[14]

एवं साहित्ये बहवः लेखकाः अलङ्कारविषये प्रतिपादितवन्तः। राजशेखरः अपि स्वीयाभिप्रायम् एवं प्रकटीचकार-

**अलङ्कारशिरोरत्नं सर्वस्वं काव्यसम्पदाम्।**

**उपमा कविवंशस्य मातैवेति मतिर्मम।।**[15]

शिक्षकैः काव्यशिक्षणावसरे अलङ्कारप्रयोगस्थले च सौन्दर्यानुभूतेः प्राधान्यं दातव्यं भवति। छात्राः आलङ्कारिकपदानां भूयो भूयः व्याख्यया श्रवणेन च सौन्दर्यानुभूतिं प्राप्तुं शक्नुवन्ति। प्रारम्भिकस्तरे शब्दालङ्काराणाम् अवबोधः, माध्यमिकस्तरे अर्थालङ्काराणां ज्ञानं तथा उच्चस्तरे च काव्यशास्त्रिभिः स्वलक्षणग्रन्थेषु उदाहरणरूपेण स्वीकृताः श्लोकाः बोधनीयाः भवन्ति। अतः शास्त्रशिक्षणे अलङ्कारशिक्षणं सौन्दर्यानुभूतये भवतीति स्पष्टं प्रतिपादितम्।

**सन्दर्भ-संकेतः**

1. वात्स्यायनकामसूत्रजयमङ्गलाव्याख्याने। 2. काव्यालङ्कार इत्येव यथाबुद्धि विधास्यते- भामहः काव्यालङ्कारे।
3. राजशेखरः। 4. पञ्चमी साहित्यविद्या-राजशेखरः। 5. ऋग्वेदः 6. अमरकोषः- 2/0/21
7. वामनकाव्यालङ्कारसूत्रम्-1/2 8. काव्यप्रकाशः- 8/6 9. साहित्यदर्पणम्- 10/11
10. चन्द्रालोकः 11. अष्टाध्यायी- 2/3/72 12. अष्टाध्यायी- 2/1/55
13. अष्टाध्यायी- 2/1/56 14. भरतनाट्यशास्त्रम् 15. काव्यमीमांसा।

- अतिथि अध्यापकः, शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः), लखनऊपरिसरः, लखनऊ

******

# मेयाधीना मानसिद्धिः

- कृष्णा कुमारी

सर्वेदार्शनिकाः **'मानधीना मेयसिद्धिः'** अर्थात् मेयस्य सिद्धिः मानाधीनेति स्वीकुर्वन्ति, यथा- न्यायदर्शने उक्तमस्ति यत् किं पुनरनेन प्रमाणेनाऽर्थजातं प्रमातव्यमिति? तदुच्यते–

**आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्।**[1]

किन्तु **'मेयधीना मानसिद्धिः'** अर्थात् मानस्य सिद्धिः मेयाधीनापि बौद्धा मन्यन्ते। अत्र 'मानम्' इत्यनेनाभिधीयते 'प्रमाणम्', 'मेयः' इत्यस्य 'प्रमेयम्' इत्यर्थः। प्रमेयं द्विविधम्- स्वसामान्यलक्षणञ्च। यदा प्रमेयमेव द्विविधम्, तदा तेषां ग्राहकं प्रमाणमपि द्विविधं भविष्यति। स्वलक्षणं ग्राहकं प्रत्यक्षम्, सामान्यलक्षणं ग्राहकमनुमानञ्च।[2] प्रमाणं स्वनियतप्रमेयानामेव ग्रह्णाति। न केवलम् इदमेव, अपितु तेषां मते एकस्य प्रमेयस्य ग्राहकः अनेकं प्रमाणं भवितुं नार्हति। ते खलु प्रमाणानि प्रति नियतार्थव्यवस्थामङ्गीकुर्वन्ति, किन्तु बौद्धेभ्यः इतरेषां मतानुसारं स्वनियतविषयानां व्यवस्थां न अङ्गीकुर्वन्ति। तेषां मतानुसारं प्रत्यक्षं न केवलं विषयाणां, अपितु सामान्यमपि गृह्णाति। एवमनुमानमप्युभयग्राहकम्। न केवलमिदमेव, अपितु तेषां मते एकमपि विषयम् अनेकानि प्रमाणानि गृह्णन्ति। अतः प्रमाणविषये बौद्धेतरः सम्प्लववादिनः, बौदास्तु व्यवस्थावादिनः इति।

धर्मचक्रप्रवर्तनसूत्रे समुपदिशता भगवता आर्याष्टाङ्गिकमार्गे इदम्प्रथमतया सम्यग्दृष्टये यत् स्थानं निर्दिष्टम्, तस्यापि इदमेव वैशिष्ट्यम्। सम्यग्दृष्टिर्हि सम्यग्ज्ञानम्। सम्यग्ज्ञानमेव च बौद्धानामनुसारं प्रमाणमिति।[3] तद् द्विविधं प्रत्यक्षमनुमानञ्चेति।[4] तथाहि– **मानं द्विविधं मेयद्वैविध्यात्।**[5] प्रमाणमविसंवादादश्चार्थादुत्पत्तेरर्थाव्यभिचारतः। प्रत्यक्षानुमानञ्च प्रामाण्यं नान्यतः, शाब्दादित्वादित्यर्थः। ननु शब्दादीनामर्थप्रतिबन्ध एव नास्तीति प्रमेयद्वैविध्यात्। प्रमेयाव्यभिचारतः प्रामाण्यम्। न च प्रमेयमन्तरेण प्रमेयाव्यभिचारः। प्रमेयञ्च प्रत्यक्षानुमानप्रतिपाद्यदपरं नास्ति। यदाह– न हि स्वसामान्यलक्षणभ्यामपरं प्रमेयमस्ति। स्वलक्षणविषयं प्रत्यक्षम्।[6] सामान्यलक्षणविषयमनुमानमिति।[7] एतदेव प्रतिपादयति-मानं द्विविधमिति।[8] अथ मेयं तावद् द्विविधम्। सदृशासदृशत्वात् स्वसामान्यलक्षणञ्च।[9]

**स्वलक्षणम्** -

चतुर्विधस्य प्रत्यक्षस्य विषयो बोद्धव्यः स्वलक्षणम्। यस्य ज्ञानविषयस्य संनिधानादसंनिधानाच्च ज्ञानप्रतिभासस्य ग्राह्यकारस्य भेदः स्फुटत्वास्फुटत्वाभ्याम्। यो हि ज्ञानविषयः संनिहितः सन् स्फुटाभासं ज्ञानस्य करोति, असंनिहितस्तु योग्यदेशस्थ एवास्फुटं करोति, तत् स्वलक्षणम्। सर्वाण्येव हि वस्तूनि दूरादस्फुटानि दृश्यन्ते, समीपे स्फुटानि। तान्येव स्वलक्षणानि।[10] य एवार्थः सन्निधानासन्निधानाभ्यां स्फुटमस्फुटं न प्रतिभासं करोति परमार्थसत् स एव।[11] स च प्रत्यक्षस्य विषयः, तस्मात् तदेव

स्वलक्षणम्। पुनः कस्मात्तदेव परमार्थसदित्याह– यस्मादर्थक्रियासमर्थं परमार्थसदुच्यते, सन्निधानासन्निधानाभ्यां च ज्ञानप्रतिभासस्य भेदकोऽर्थोऽर्थक्रियासमर्थः, तस्मात् स एव परमार्थसत्। तत एव हि प्रत्यक्षविषयादर्थक्रिया प्राप्यते न विकल्पविषयात्। अत एव यद्यपि विकल्पविषयो दृश्य इवावसीयते तथापि न स दृश्य एव ततोऽर्थक्रियाया अभावात्, दृश्याच्च भावात्। अतस्तदेव स्वलक्षणं न विकल्पविषयः।[12]

**सामान्यलक्षणम्**–

अनुमानस्य विषयः बोद्धव्य सामान्यलक्षणम्। स्वलक्षणाद् यद् अन्यत् तत् सामान्यलक्षणम्, विकल्पज्ञानेनावसीयमानो ह्यर्थः सन्निधानासन्निधानाभ्यां ज्ञानप्रतिभासं न भिनत्ति। तथाहि आरोप्यमाणो वह्निरारोपादस्ति। आरोपच्च दूरस्थी निकटस्थश्च। तस्य समारोपितस्य सन्निधानासन्निधानाच्च ज्ञानप्रतिभासस्य न भेदः स्फुटत्वेनास्फुटवेन वा। ततः स्वलक्षणादन्य उच्यते।[13] सामान्येन लक्षणं सामान्यलक्षणम्।

स्वसामान्यलक्षणभ्यां व्यतिरिक्तो नास्ति कश्चन तृतीयः पदार्थराशिः। नास्ति च स्वसामान्योभयात्मकः कश्चन पदार्थः, परस्परविरुद्धयोरैकात्म्यायोगात्। फलतः प्रमेयद्वैविध्यात्। प्रत्यक्षमनुमानञ्च प्रमाणं द्विविधम्।

**प्रत्यक्षम्** -

**तत्र प्रत्यक्षं कल्पनापोढमभ्रान्तम्।** पूर्वोपरमनुसन्धाय शब्दसङ्कीर्णाकारा प्रतीतिर्जल्पकारा वा कल्पना। यथा विज्ञपुरुषस्य सोऽयं घट इति प्रतीतिः। बालमूकतिर्यगादीनामन्तजल्पाकारा परामर्शरूपा वा प्रतीतिः। तथा चोक्तम्–

**अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना**।[15]

तत्र काचित् प्रतीतिरभिलापसंसृष्टाभासा भवति। यथा व्युत्पन्नसङ्केतस्य घटार्थकल्पना घटशब्दसंसृष्टार्थाभासा भवति। काचित्त्वभिलापेनासंसृष्टापि अभिलापसंसर्गयोग्याभासा भवति। यथा बालकस्याव्युत्पन्नसङ्केतस्य कल्पना। तत्र 'अभिलापसंसृष्टाभासा कल्पना' इत्युक्तावव्युत्पन्नसङ्केतस्य कल्पना न संगृह्येत। योग्यग्रहणे तु सापि संगृह्यते। यद्यपि अभिलापसंसृष्टाभासा तु भवत्येव। या चाभिलापसंसृष्टा सापि योग्या। तत उभयोरपि योग्यग्रहणेन संग्रहः। तया कल्पनया कल्पनास्वभावेन रहितं शून्यं सञ्ज्ञानं यदभ्रान्तं तत् प्रत्यक्षम् इति परेण सम्बन्धः। भ्रान्तमपि ज्ञानं नार्थसाक्षात्कारि। भ्रान्तं ह्यर्थक्रियासमर्थे वस्तुनि विपर्यस्तमुच्यते। अर्थक्रियाक्षमं च वस्तुस्वरूपं देशकालाकारनियतं, तत्कथं विपरीतप्रतिभासिना भ्रान्तेन ज्ञानेन साक्षात्क्रियते। यदाह–

**तिमिराशुभ्रमणनौयानसंक्षोभाद्यनाहितविभ्रमं ज्ञानं प्रत्यक्षम्।**[16]

एतेन कामलिनः शुक्ले शंखं पीतप्रतिभासि ज्ञानं, भ्रमादलातादौ चक्रादिनिर्भासि ज्ञानं, गच्छन्त्या नावि स्थितस्य चलद्वृक्षादिभ्रान्तिज्ञानं गाढमर्मप्रहाररहितस्य ज्वलत्स्तम्भादिप्रतिभासि ज्ञानं च, न प्रत्यक्षमित्युक्तं भवति।

चत्वारः खलु शास्त्रेषु प्रत्यक्षस्य भेदाः, तथाहि– इन्द्रियप्रत्यक्षम्, मानसप्रत्यक्षम्, स्वसंवेदनप्रत्यक्षम्,

योगिप्रत्यक्षं चेति।[17]

**अनुमानम्**-

मीयतेऽर्थोऽनेनेति मानम्।[18] अनेन तावत् साधकतमेन करणेन सारूप्यलक्षणं प्रमाणं मीयते। पश्चान्मानम्। लिङ्गग्रहण-सम्बन्धस्मरणयोः पश्चाद् मानमनुमानम्। अनुमानलक्षणं तावदाचार्यदिङ्नागेन एवं प्रतिपादितम्। यथा- **'अनुमानं लिङ्गादर्थदर्शनम्।'**[19]

स्वार्थं परार्थं चेत्यनुमानस्य भेदद्वयम्।[20] स्वार्थं तावज्ज्ञानात्मकम्। येन स्वयं प्रतिपद्यते परीक्षार्थं तत् स्वार्थानुमानम्। स्वस्मै यत् तत् स्वार्थमिति व्युत्पत्तिः। आचार्यधर्मकीर्तिना एतस्य लक्षणं अनेन कथितम्- **''तत्र स्वार्थं त्रिरूपाल्लिङ्गाद् यदनुमेये ज्ञानं तदनुमानम्।''**[21]

तत्र तयोः स्वार्थपरार्थानुमानयोर्मध्ये, स्वार्थं ज्ञानं किं वैशिष्ट्यम् इत्याह- त्रिरूपाद् इति, त्रीणि रूपाणि यस्य वक्ष्यमाणानि लक्षणानि तत् त्रिरूपम्। लिङ्ग्यते गम्यतेऽनेनाऽर्थ इति लिङ्गम्। तस्मात् त्रिरूपाल्लिङ्गात् यज्जातं ज्ञानम् अथवा त्रिरूपाल्लिङ्गाद् यद् अनुमेयालम्बनं ज्ञानं तत् स्वार्थानुमानम् इति। अनेन रूपत्रययुक्ताल्लिङ्गादनुमेये परोक्षविषये यद् ज्ञानं प्रतिपत्तुरुत्पद्यते, तत् स्वार्थानुमानम्। बौद्धमतानुसारं साधनवाक्यं द्विविधम्। व्याप्तिपक्षधर्मतासंज्ञकञ्च। अयमेव लिङ्गस्य त्रिरूपत्वमुच्यते अनुमेये पर्वतादौ धर्मिणि लिङ्गस्यास्तित्वमेव निश्चितम्, तदेकं रूपं पक्षधर्मतासंज्ञकम्। द्वितीयं रूपं सपक्ष एव सत्त्वं निश्चितम्[22] अर्थात् सपक्ष एव सत्त्वं निश्चितमित्यन्वयसंज्ञकम्। तृतीयं रूपम् असपक्षे चासत्त्वमेव निश्चितम्।[23] अर्थात् न सपक्षोऽसपक्षः। तत्रासत्त्वमेव निश्चितं व्यतिरेकसंज्ञकम्। त्रिरूपस्य त्रीण्येव लिङ्गानि।[24] लिङ्गस्यापरनामानि साधनं ज्ञापकं हेतुर्व्याप्यं चेति। त्रीणि लिङ्गानि एतानि सन्ति-

**अनुपलब्धिः स्वभावः कार्यञ्चेति।**[25]

तदनु परार्थं तावद् वचनात्मकम्। येन परं प्रतिपादयति तत्परार्थमिति। परस्मै यत् तत् परार्थानुमानमिति। अस्य तावल्लक्षणं धर्मकीर्तिना इत्थं प्रतिपादितम्- **''त्रिरूपलिङ्गाख्यानं परार्थमनुमानम्।''**[26] इति। स्वार्थानुमाने एवानुमानशब्दस्य प्रयोगो मुख्यः। अनुमानोत्पादकत्वात् परार्थस्याप्यनुमानत्वम्। कारणे कार्योपचारात्।[27]

अनेन प्रकारेण स्पष्टं भवति यत् कल्पनापोढस्यैव च ज्ञानस्य प्रत्यक्षत्वाभ्युपगमात्, तेन च लोकस्य संव्यवहाराभावात् लौकिकस्य च प्रमाणप्रमेयव्यवहारस्य व्याख्यातुमिष्टत्वाद् व्यर्थैव प्रत्यक्षप्रमाणकल्पना संजायते। चक्षुर्विज्ञानसमङ्गी नीलं जानाति नो तु नीलमिति चागमस्य प्रत्यक्षलक्षणाभिधानार्थस्याप्रस्तुतत्वात्, पञ्चानामिन्द्रियविज्ञानानां जडत्वप्रतिपादकत्वाच्च नागमादपि कल्पनापोढस्यैव विज्ञानस्य प्रत्यक्षमिति न युक्तमेतत्। तस्माल्लोके यदि लक्ष्यं स्वलक्षणं सामान्यलक्षणं वा, सर्वमेव साक्षादुपलभ्यमानत्वादपरोक्षम्, अतः प्रत्यक्षं व्यवस्थाप्यते तद्विषयेण ज्ञानेन सह। द्विचन्द्रादीनां तु अतैमिरिकज्ञानापेक्षया अप्रत्यक्षत्वम्, तैमिरिकाद्यपेक्षया तु प्रत्यक्षत्वमेव।

**परोक्षविषयं तु ज्ञानं साध्याव्यभिचारिलिङ्गोत्पन्नमनुमानम्।**[28]

तानि च परस्परापेक्षया सिध्यन्ति, सत्सु प्रमाणेषु प्रमेयार्थाः, सत्सु प्रमेयेष्वर्थेषु प्रमाणानि। नो तु खलु स्वभाविकी प्रमाणप्रमेयोः सिद्धिरिति।[29] प्रमेयसंख्याधीना प्रमाणद्वयसंख्याऽपि सिध्यतीति। तथाहि-

**बद्धोक्तेषु परोक्षेषु जायते यस्य संशयः।**

**इहैव प्रत्ययस्तेन कर्तव्यः शून्यतां प्रति॥**[30]

कारिकामिमां व्याचक्षाण आचार्यचन्द्रकीर्तिः प्रमेयद्वित्वं प्रतिपादयन्नाह-

**''न हि सर्वे भावाः प्रत्यक्षज्ञानगम्याः, अनुमानगम्या अपि विद्यन्ते''।**[31]

मानवानां जीवने जगति च विद्यमानानां विविधानां दुःखफलानां समस्यानां यन्मूलं वस्तुस्वरूपाज्ञानं सम्यग्ज्ञाननैव हेयम्। सम्यग्ज्ञानमेव सर्वदुःखपञ्चोपशमोपायः सर्वविधपुरुषार्थसिद्ध्यपायश्च[32]।

**॥भवतु सर्वमङ्गलम्॥**

**संदर्भसङ्केत** -


1. न्यायदर्शनम्, पृ.- 21, सम्पादक- स्वामी द्वारिकादासशास्त्री, प्रकाशक-बौद्धभारती, वाराणसी, 1999
2. प्रत्यक्षमनुमानं च प्रमाणं हि द्विलक्षणम्। प्रमेयं तत्प्रयोगार्थं न प्रमाणान्तरं भवेत्। प्रमाणसमुच्चयः, 1:2
3. आचार्यमोक्षाकरगुप्तविचरिता तर्कभाषा, पृ.- 1, सम्पादक-लोसङ् नोरबू शास्त्री, प्रकाशक-के.उ.ति.शि.सं. सारनाथ, वाराणसी, 2014
4. आचार्यमोक्षाकरगुप्तविरचिता तर्कभाषा, पृ.- 4
5. प्रमाणवार्तिकम्, 2:1, पृ.-409, सम्पादक- स्वामी योगीन्द्रानन्द, प्रकाशक- षड्दर्शनप्रकाशन संस्थान, वाराणसी, 1991
6. 'तस्य विषयः स्वलक्षणम्' न्यायबिन्दु एव धर्मोत्तर टीका, पृ.- 149, सम्पादक- डॉ. लोब्संग दोर्जे रवलिङ्ग, ठिनले शाशनी, प्रकाशक-के.ति.अ.वि. सारनाथ, वाराणसी, 2010
7. 'सोऽनुमानस्य विषयः' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 151
8. वार्तिकालङ्कारभाष्यम्, पृ.-410, सम्पादक-स्वामी योगीन्द्रानन्द, प्रकाशक- षड्दर्शनप्रकाशन संस्थान, वाराणसी, 1991
9. प्रमाणवार्तिकम्, 2:2, पृ.- 411
10. 'यस्यार्थस्य संनिधानासंनिधानाभ्यां ज्ञानप्रतिभास भेदस्तत् स्वलक्षणम्' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 149
11. 'तदेव परमार्थसत्' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 150
12. 'अर्थक्रियासामर्थ्यलक्षणत्वाद्वस्तुनः' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 150
13. 'अन्यत सामान्यलक्षणम्' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 150
14. आचार्यमोक्षकरगुप्तविरचिता तर्कभाषा, पृ.- 13, न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 142
15. न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 144

16. न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 145
17. न्यायबिन्दु एवं धर्मोत्तर टीका, पृ. 146
18. आचार्यमोक्षाकरगुप्तविरचिता तर्कभाषा, पृ.- 5
19. प्रमाणसमुच्चयः, 1:17
20. न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 154
21. तत्रैव
22. आचार्यमोक्षाकरगुप्तविरचिता तर्कभाषा, पृ.- 28
23. तत्रैव
24. तत्रैव
25. न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 158
26. न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 154
27. तत्रैव
28. मध्यमकशास्त्रम्, द्वितीय संस्करणम्, पृ.- 28, सम्पादक- श्रीधर त्रिपाठी, प्रकाशक-मिथिलाविद्यापीठ, दरभङ्गा, 1987
29. तत्रैव
30. चतु:शतकम्, 12:5, उद्धृतोऽयं श्लोकः सौत्रान्तिकदर्शने, पृ.- 437, ग्रन्थकारः - प्रो. रामशंकर त्रिपाठी, प्रका.-के. उ.ति.शि.सं. सारनाथ, वाराणसी, 1990
31. तत्रैव
32. 'सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति तद् व्युत्पाद्यते' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ.- 136

- अतिथि अध्यापिका (बौद्धदर्शनविभागः),
राष्ट्रियसंस्कृतसंस्थानम्, लखनऊपरिसरः,
लखनऊ-226010

******

# स्फोटतत्त्वविमर्शः

- डॉ. प्रवीणकुमारचौधरी

शाब्दबोधप्रक्रियायां प्रथमं पदज्ञानं ततः तन्निष्ठवृत्तिज्ञानं तदनन्तरं वृत्तिज्ञानजन्य-पदार्थोपस्थितिः। ततः शाब्दबोधः। यथा- 'घट' इत्युक्ते घटपदज्ञानं प्रथमं भवति, तदनन्तरं घटपदनिष्ठवृत्तिज्ञानं ततो वृत्तिज्ञानजन्यकम्बुग्रीवादिमत्पदार्थस्य उपस्थितिर्जायते ततो घटपदं कम्बुग्रीवादिमत्पदार्थे शक्तमित्याकारकं शाब्दबोधो जायते।

तत्र का वृत्तिः सा च कुत्र संतिष्ठते वृत्याश्रयः कीदृशः शब्दः इति विचारणीयो भवति। तत्र घटपट इत्यादिषु वर्णाः प्रत्येकं वृत्याश्रयत्वं नैव वक्तुं शक्यं धकारेणैव शाब्दबोधः जाते अकारटकारादि-नामुच्चारणवैयर्थ्यप्रसङ्गात्। नाऽपि वर्णसंघातस्य वृत्याश्रयत्वं, योग्यविभुर्विशेषगुणानां सोत्तरवर्ति-गुणावश्यकत्वमिति नियमेन वर्णसंघातस्य यौगपद्यासंभवात्।

ननु कस्तर्हिः वृत्याश्रयः? शब्दः इत्युच्यते च स्फोटात्मकः गृह्यते। अर्थात् व्याकरणशास्त्रे स्फोटात्मकनित्यशब्दानामेव वृत्याश्रत्वं संभवति। कीदृशः तस्य स्वरूपमिति जिज्ञासायां प्रोच्यते वैयाकरणैः ''स्फुट्यते अभिव्यञ्जते वर्णैः यः स स्फोटः अर्थात् श्रूयमाणध्वन्यात्मकवर्णैः व्यङ्ग्यमात्रः शब्दः स्फोटः अथवा स्फुटति अभिव्यक्तीभवति अर्थो यस्माद् असौ स्फोटः। अर्थात् अर्थबोधकता शक्तिसम्पन्नः शब्दः स्फोटः इति पर्यवस्यति।

भाष्यकृता अत्र गौरित्यत्र कः शब्द येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषणिनां सम्प्रत्ययो भवति स शब्दः इत्यादिना स्फोटात्मकनित्यशब्दः एव उपात्तः। अपि च चत्वारि वाक्यपरिमिता पदानि इति श्रुत्या नामाख्यातोपसर्गनिपातस्वरूपा चतुर्णां वाचां व्याख्यानक्रमे स्फोटात्मकशब्दोऽपि व्याख्याति एव। प्रतिपादितञ्चैतत् शाब्दिकशिरोमणिना हरिणापरापश्यन्ती मध्यमा वैखरीरूपेण-

**''परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।**
**वैखर्या हि कृतो नादः परश्रवणगोचरः**
**मध्यमा हि कृतो नादः स्फोटव्यञ्जक उच्यते॥''**[1]

शब्दब्रह्म यद्यपि एकः अखण्डश्च तत्रापि यथा घट स्फटिकः जपाकुसुमलोहितपीतत्वादि-व्यञ्जकोपरागवशात् लोहितपीतत्वादिवर्णवत् प्रतीयते, तथैव वर्णादिव्यञ्जकोपरागवशात् वर्णपदवाक्यादिरूपेण स्फोट अनेकशः प्रतिभासते।

एतत्सर्वमपि उपवर्ण्य भर्तृहरिणा प्रोक्तम्-

**''पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च**

**वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन''**[2]

शेषकृष्णोऽपि स्फोटत्वनिरूपणे न्यगादीत्।

**यथा मणिकृपाणदौ मुखमेकमनेकधा।**

**तथैव ध्वनिषु स्फोटः एक एव विभिद्यते।।**[3]

वाक्ये पदानि प्रविभज्य पदे च प्रकृतिप्रत्ययविभागं कल्पयित्वा तत्तदर्थवाचकत्वं व्याकरणशास्त्रे प्रतिपादितम्। किन्तु ''वाक्यस्फोटोऽति-निष्कर्षे तिष्ठतीति मतिस्थितिः'' इति प्रतिपादने कौण्डभट्टमते-

प्रकृतिप्रत्ययादिविचारोऽवास्तिवक इति संसूच्यते।

तत्र च स्फोटस्याष्टौ भेदाः प्रदर्शिताः। यथा- 1. वर्णस्फोटः 2. पदस्फोटः 3. वाक्यस्फोटः 4. अखण्डपदस्फोटः 5. अखण्डवाक्यस्फोटः 6. वर्णजातिस्फोटः 7. पदजातिस्फोटः 8. वाक्यजातिस्फोटश्च।

तेषु स्फोटेषु वाक्यस्फोटातिरिक्तनामवास्तवत्वमेव। शाब्दिकनये वाक्यस्फोटस्य मुखत्वम्, शक्तिग्राहकशिरोमणिना वृद्धव्यवहारेण लोकानां प्रथमतो वाक्ये एव शक्तिग्रहात्, वाक्यादेव वाक्यार्थस्य पूर्णत्वाच्च। अखण्डपदवाक्यस्फोटानामवास्तवत्वे किमर्थं तेषां निरूपणं क्रियत इति चेदुच्चते- यथा शुद्धब्रह्मज्ञानार्थमन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयेति पञ्चसु अथ वाऽरुन्धति-ज्ञानार्थ स्थूल नक्षत्रेऽपारमार्थिकारुन्धतीत्वबोधनम्। एवमेव पारमार्थिकाखण्ड-वाक्यार्थबोधार्थमेते। किल स्फोटा उपाया एवमुक्तञ्च हरिणा-

**उपायाः शिक्षामाणानां बालानामुपकारकम्।**

**असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते।।**[4]

**वर्णस्फोटः**- प्रकृतिप्रत्ययघटकतया गृहीतशक्तिकस्य वर्णवाचकत्वे वर्णस्फोटः सिद्ध्यति। स च प्रयोगघटकविसर्गादिः। नैयायिकानां मते स्थान्येव वाचको न त्वादेशः किन्तु शाब्दिकानां मते स्थानित्वेन कल्पिता लकारसकारादयो वा वाचकाः तेषाम् अनियतत्वात्। विसर्गे रोः स्मरणम्, तेन च सोः णला तिप्स्मरणम्, तिपाच लकारस्य स्मरणमिति गौरवापत्तेः। तस्मात् प्रयोगघटकस्यैव वर्णस्यार्थबोध कत्वात् वर्णस्फोटः सिद्धयतीति।

**पदस्फोटः** - सुप्तिङ्न्तं पदम्, एकतिङ्न्तार्थविशेष्यकं वाक्यमिति पदवाक्य-लक्षणानां क्रान्तवर्णसमूहस्य प्रकृतिप्रत्ययरूपस्य पच् तिप्-इत्यादिकस्य वाचकत्वे सिद्धं पदस्फोटोऽपि एव। अत आह- अथादेशा वाचकाश्चेत्पदस्फोटः ततः स्मृतः इति।

सखण्डाखण्डभेदेन पदस्फोटो द्विविधः। तत्र सुबन्त-तिङन्तरूपे 'देवदत्तः पचति' इत्यादिरूपः सखण्डपदस्फोटः।

अखण्डपदस्फोटस्तु सर्वैः वर्णैरूपस्यातिवर्णैर्व्यज्यते। स चार्थ-प्रत्ययायक इति वैयाकरणराद्धान्तः।

**वाक्यस्फोटः**- वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वात् सप्रपञ्चं पदस्फोटनिरूपणान्तरं स्मृतिविषयत्वे सत्युपेक्षानर्हत्वरूपां प्रसङ्गसङ्गतिमादायेदानीं वाक्यस्फोटनिरूपणार्थं वैयाकरणभूषसारदृष्ट्या क्रियते कश्चन प्रयासः।

'हरेऽव' इत्यादौ पदाज्ञानेऽपि समुदायादर्थबाधात् तादृशसमुदायात्मकवाक्य एव वाचकत्वमिति वाक्यस्फोटसिद्धिः। उक्तञ्च वैयाकरणभूषणसारे- हरेऽवेत्यादि दृष्ट्वा हि वाक्यस्फोटे विनिश्चिनु। 'हरेऽव' 'विष्णोऽव' इत्यादौ 'एङः पदान्तादति'[5] इत्यादनैकादेशे जाते 'हरे' इत्येकं पदम् अव इत्यपरं पदम्- अथवा 'हरे' इत्येकं पदमपरञ्च वेति पदमित्यत्र विनिगमका- भावान्न पदयोर्विभागः सुस्पष्टं ज्ञेयो भवति। तत्र प्रत्येकं पदयोः स्पष्टज्ञानाभावेऽपि नार्थबोधानुपपत्तिः, अपितु सुबन्ततिङन्तपद-समुदायरूपवाक्ये बोधकजनकतारूपशक्तिज्ञानसत्वेन तस्मादर्थबोध उपपद्यते। वाक्यार्थज्ञाने वाक्यघटकीभूत यावत् पदार्थज्ञानस्य कारणत्वात्। यया युक्त्या पदस्फोटः साध्यते तदैव युक्त्या वाक्यस्फोटोऽपि सिद्ध्यति। यथा- घटाद्यर्थनिरूपिता बोधजनकतारूपशक्तिघटादिप्रतिपादकेष्ठ तत्प्रकृति सुबन्तेषु वा पदेष्ठ कल्पित तद्वद्वाक्यार्थ निरूपिता बोधजनकताशक्तिर्घटोऽस्त्यादिवाक्येष्वभ्युपगन्तव्येति।

वाक्यस्फोटो द्विविधः सखण्डवाक्यस्फोटः अखण्डवाक्यस्फोटश्च तत्राखण्डोवाक्यस्फोटः पदातिरिक्ताखण्डपदव्यङ्ग्यो भवति। अखण्ड-वाक्यस्फोटे आकाङ्क्षायोग्यताऽऽसत्तीनां कारणत्वं नाङ्गीक्रियत इति महदेव लाघवम्।

**अत्रायम् निष्कर्षः** - वस्तुतः स्फोटः एक एव तथाऽपि शास्त्रप्रक्रियानिर्वाहाय अष्टौ स्फोटाः इति श्रूयन्ते।

वैयाकरणसिद्धान्ते- तत् हि वर्णपदवाक्यभेदेन स्फोटः त्रिधा पुनः जातिव्यक्तिभेदेन षोढा। तत्राऽपि अखण्डपदस्फोटः अखण्डवाक्यस्फोट इति सङ्कलनया अष्टौ स्फोटाः इति पर्यवस्यति। परन्तु एषु स्फोटेषु वाक्यस्फोटस्यैव प्रामुख्यम् यत् लोकव्यवहारे तेनैवार्थबोधः तेनैवार्थसमाप्तिश्च जायते। तदुक्तं न्यायभाष्यकारेण- "पदसमूहो वाक्यमर्थसमाप्तौ" प्रतिपादितञ्चैतत्। कौण्डभट्टकार-वाक्य-स्फोटोऽतिनिष्कर्षे तिष्ठतीतिमति-स्थितिः। साधुशब्दोऽन्तर्गताहि बोधकाः न तु स्मृता।

**सन्दर्भग्रन्थसूची-**

1. परमलघुमंजूषा-स्फोटनिर्णयप्रश्न-चौखम्बा सुरभारती प्रकाशन, वाराणसी, पृ.सं. 4, व्यख्यातकारः 'लोकमणिदहालः'।

2. वाक्यपदीयम्-ब्रह्मकाण्डम्, श्लो.सं. 73

3. स्फोटत्वनिरूपणम्-श्लो.सं. 11, पृ.सं.-35, चौखम्बा सुरभारती प्रकाशन, वाराणसी, सम्पा.-ब्रह्मानन्दत्रिपाठी।

4. प्रौढमनोरमा अजन्तपुल्लिङ्गप्रकरणम्, पृ.सं. 260, वाणीविलासप्रकाशनम्, वाराणसी।

5. अष्टा. 6.1.109

- अतिथि अध्यापक, व्याकरणविभागः

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः), लखनऊपरिसरः, लखनऊ

******

# स्कन्दपुराणीयमानसखण्डे वर्णितयागीश्वरस्य (जागेश्वर) माहात्म्यं तीर्थानि च

– डॉ. सुमनचन्द्रपन्त 'सुमन्तः'

भारतीयधर्मसंस्कृतिसाहित्यदृष्ट्या च व्यासप्रणीताष्टादशपुराणानामत्यधिकं महत्त्वमुपादेयत्त्वं च वर्तते। याथार्थत्वेन अस्माकं भारतीयसंस्कृतेः सभ्यता-धर्म-राजनीति-सामाजिकस्थिति-प्रबन्धनस्य मूलाधारभूतानिपुराणानि सन्ति।

पुराणेषु मानवजीवनसम्बद्धानि विविधानि लोकोपकारकाणि तत्त्वानि विस्तृतेन सन्निहितानि सन्ति। यानि हिन्दूसनातनधर्मस्यास्तिकपरम्परायाश्च संवाहकानि सन्ति। एतेषु महर्षिभिः सन्दर्शितानि सामान्यजनोपयोगि-प्रार्थनोपासनोपवासव्रततीर्थधार्मिकदर्शनकर्मकाण्डानि विविधतकनीकिज्ञानं शिक्षा-ज्योतिष-आयुर्वेद-वास्तु-यन्त्र-प्रबन्ध-पशुचिकित्साप्रभृतीनि विज्ञानानि व्याकरणकाव्य-नाट्यशास्त्राणि विद्यन्ते। एतेषु वेदानामाध्यात्मिकी व्याख्याऽपि प्राप्यते। यया विद्यया मानवाः स्वलौकिकालौकिक- कल्याणकरणाय च प्रयतन्ते। वेदविभाजकेन पराशरपुत्रमहर्षिव्यासेन नानाविधप्रपञ्चरतानां जनानां श्रुतपरम्परायाः ह्रासमवलोक्यैव महार्णव इव महापुराणानि चोपपुराणानि विरचितानि। तस्मात्कारणादेव विपुलसंस्कृतवाङ्मये पुराणसाहित्यस्य महत्त्वं वाचामगोचरमेव वर्तते।

व्यासः शब्दप्रधानवेदेषु सन्निहितं यज्ज्ञानं तत्प्रकाशनार्थं सामाजिकोत्थनाय चार्थतात्पर्यवत् महापुराणान्युपपुराणानि विरचय्य महता प्रयासेन च वेदार्थ विशदीकृतवान्। अथोऽत पुराणसाहित्यं न केवलं वेदवत् स्वप्रमाण्यमभजदपितु पञ्चमवेद इति मन्यते। पुराणानामनुशीलानाज्ज्ञायते यद् वेदार्थप्रकाशकाणि पुराणानि हि विविधज्ञानविज्ञानराशयः, संस्कृतिसंस्काराणाञ्च धाररूपाणि, कृत्याकृत्यशुभाशुभबोधकानि मानवजीवनस्योन्नतकारकाणि। विश्वमङ्गलकारकाणि, सुखशान्त्याचारसञ्चारकाणि, सत्यतायाः सरणयः, ज्ञानलोकप्रकाशकानि, ज्ञाननिधयः, चतुर्वर्गावाप्तिसोपानरूपाणि च सन्ति। यद्यपि पुराणशब्दस्य व्युत्पत्तिलभ्योऽर्थः 'पुरा नवं भवति' इति पुराणम् इति निरुक्तकारोक्तिः।[1] पद्मपुराणे च 'पुरार्थेषु आनयतीति' पुराणम्। श्रीमधुसूदनः विश्वसृष्टेरितिहासं प्रतिपादयन् 'पुराणयतीति पुराणमि'त्युक्त्वा तेषां प्राचीनतामेव बोधयति। अर्थात् प्राचीनकाले तत्त्वदृष्टाऋषिभिः प्रोक्तं यज्ज्ञानमाख्यानं वा तत्सर्वं नवीनायते साम्प्रतिके युगेऽपि। महर्षिव्यासेन महाभारतस्यादिपर्वणि वेदार्थस्य विशदीकरणायैव पुराणानाम् इतिहासस्य च महदुपयोगित्वं वर्तते इति महता रवेणोद्घोषितं यत्-

**इतिहासपुराणाभ्यां वेदं समुपवृंहयेत्।**
**विभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति।**[2]

वस्तुतो महर्षिव्यासः पुराणेषु पञ्चलक्षणात्मकमेव सर्ग-प्रतिसर्ग-वंश- मन्वतरं, वंशानुचरितञ्चेति समधिकृत्य राजवंशानां वर्णनं प्रामुख्येन वैशद्येन च प्रतिपादितवान्। तथा हि सर्गो नाम-सृष्टिः, अर्थात्

प्रपञ्चात्मकजगत उत्पत्तिः, प्रतिसर्गनामदृश्यमानस्य समग्रप्रपञ्चात्मकजगतः प्रलयः, वंशो नाम विश्वस्योपादानभूतानां तत्त्वानां देवर्षिमनुष्याणाञ्चोत्पत्तिपरम्परा। मन्वन्तरं नाम सृष्ट्यादीनां कालव्यवस्थापनम्, वंशानुचरितं नाम-तत्तत् वंशोद्भवानां मनुष्याणां राजर्षीणां महर्षीणाञ्च विषये विशदविवरणोपस्थापनमिति। प्रायशः सर्वविद्यानां पुराणेषु समावेशेन भारतीयसंस्कृतेः सभ्यताया मूलाधारत्वात्पुराणसाहित्यं जगति वैशिष्ट्यं भजते। पुराणानां भाषा नैवा क्लिष्टा न च कठिना अपितु सुबोधा सरसा साधारणजनहृदयग्राहिणी चास्ति। वेदमन्त्रास्तावदृषिभिर्दृष्टा, अतएव आर्षास्ते वेदाः अपौरुषेया इति, पुराणानि तु महर्षिव्यासेन विरचितानि तस्मात् पौरुषेयानि। पुराणानां विषये केचन वेदनिन्दकाः नास्तिकाः कपोलकल्पितानि स्वोदरपूर्तेः साधनानि च प्रतिपादयन्ति। तत्र तेषामल्पज्ञत्वमेव बोध्यते। पौराणिकाध्ययनेन हि बृहद्वैदिकवाङ्मयस्य व्याख्यानाय दृष्टिरुन्मीलिता भवति नास्ति संशयलेशो विषयेऽस्मिन्। नारदीयपुराणे बादरायणः संसूचयति यत्-

**वेदार्थादधिकं मन्ये पुराणार्थं वरानने।**
**वेदाः प्रतिष्ठिताः सर्वे पुराणे न संशयः।**[3]

पुराणानां परमोद्देश्यं सामाजिकपरिष्कारेण सह समाजे निहितदुष्प्रवृत्तीनामपसारणं धर्मानुरागः। वेदोऽखिलोश्च धर्ममूलमिति पुरुषार्थचतुष्ट्यधर्मार्थकाममोक्षेषु धर्म एव परमपुरुषार्थमोक्षस्य मूलकारणत्वेन निगदितः। मरणधर्मासकलजगदुपभोगपुत्रधनदारादिजडपदार्था जन्मान्तरे नैव तिष्ठन्ति, केवलमिह लोके विहितयागादिरेव धर्म तथैव तिष्ठति। एतद्धर्मफलानुसन्धानात् हि मानवो मोक्षं प्राप्नोति। तत् सुन्दरवर्णनं ब्रह्मपुराणेऽक्षिविषयं कर्तुं शक्नुमः-

**धर्मे मतिर्भवतु वः पुरुषोत्तमानां स ह्येक एव परलोकगतस्य वन्धुः।**
**अर्थाः स्त्रियश्च निपुणैरपि सेव्यामाना नैव प्रभावमुपयान्ति न च स्थिरत्वम्।।**[4]

वर्णाश्रमभित्त्याधारितसदाचारेण समाजस्याभ्युदयः सुकृतकर्मभिर्निःश्रेयसश्च। अष्टादशपुराणानि सात्त्विकराजसतामसरूपाणि त्रिधा विभक्तानि सन्ति। पद्मपुराणे अनेन प्रकारेण विभाजनं प्राप्यते। वैष्णवं नारदीयं भागवतं गारुडं पाद्मं तथा च वाराहं। षडेतानि सात्त्विकानिपुराणानि विज्ञेयानि।।
राजसपुराणानि-बह्माण्डं बह्मवैर्तं मार्कण्डेयं भविष्यं वामनं तथैव ब्राह्मञ्च षडेतानि पुराणानि राजसानि विज्ञेयानि।

**तामसपुराणानि**- मात्स्यं कौर्मं लैङ्गं शैवं स्कान्दं तथैव चाग्नेयं षडेतानि तामसानि।[5] एतेषां पुराणानां विस्तरभयात् केवलं प्रकृतस्कन्दपुराणस्य सङ्क्षेपेण वर्णनं प्रस्तूयते।

**स्कन्दपुराणम्**- खण्डात्मकसंहितात्मकरूपेण द्विविधविभक्तमिदं पुराणेषु श्रेष्ठतरं विशालकायञ्च राराजते। पुराणेऽस्मिन् शैवतत्त्वानि सुनिनादितानि सन्ति।

पुराणेऽस्मिन् भारतस्योत्तरस्यां दिशि प्रहरीत्वेन तुहिनाचले भास्वमाननगाधिराजस्य मौलौ कैलासाधिवासितस्य देवाधिदेवमहादेवस्य गिरिराजकिशोरीपार्वत्याश्च मनोहारि वर्णनं चकार महर्षिबादरायणः। नारदपुराणानुसारं पुराणमिदं सप्तषु खण्डेषु विभक्तमस्ति। ऐते खण्डाः।

**(1) माहेश्वरखण्डः** अस्य केदारकुमारिकयोः द्वयोः खण्डयोः शिवपार्वत्योः लीलानां सुन्दरवर्णनम्।

**( 2 ) वैष्णवखण्डः** खण्डस्याऽस्य उत्कलखण्डे पुरिपुण्यक्षेत्रे शोभायमानस्य प्रसिद्धजगन्नाथमन्दिरस्य वर्णनम्। 1. ब्रह्मारण्य, 2. ब्रह्मोतरोपखण्डद्वयं विद्यते।

**( 3 ) काशीखण्डः** अस्मिनस्त्रैलोक्यप्रथितमाहात्म्यशीलकाश्याः यागादिनां वर्णनम्।

**( 4 ) रेवाखण्डः** खण्डेऽस्मिन् नर्मदोत्पत्तिः तत्कूलेषु स्थितानि पुण्यपवित्रतीर्थस्थलानि वर्णितानि सन्ति। लोककल्याणकारिसत्यनारायणव्रतकथायाश्च सुन्दरं वर्णनं प्राप्यते।

**( 5 ) अवन्तिखण्डः** खण्डेऽस्मिन् उज्जैन्यां देदीप्यमानशिवलिङ्गानां विस्तृतं वर्णनमस्ति।

**( 6 ) तापीखण्डः** खण्डेऽस्मिन् नर्मदायाः सहायिका तापीनद्यास्तटे विद्यमानानां पवित्रतीर्थस्थलानां वर्णनम्। नारदपुराणानुसारमस्य षष्ठखण्डस्य नाम नागरखण्ड इति। अस्य त्रिषु परिच्छेदेषु विश्वकर्मोपाख्यानंस्य घटकेश्वरमाहात्म्यञ्च प्राप्यते।

**( 7 ) प्रभासखण्डः** खण्डोऽयं 'प्रभासखण्ड' इति नाम्ना विख्यातः। गौरवभयात् प्रकृतमनुसरामि।

भौगोलिकदृष्ट्या समग्रहिमालयदेवतात्मनो भूखण्डस्यास्य पञ्चभागा कृतो वर्तन्ते। ते खण्डाः यथा विद्यन्ते (1) हिमवखण्डः (2) मानसखण्डः (3) केदारखण्डः (4) जालन्धरखण्डः (5) काश्मीर- खण्डश्चेति। एतेषु हिमवत्खण्डे वर्त्तमाननैपालराष्ट्रस्य प्राचीनभौगोलिकस्थितेः वर्णनम्।

केदारखण्डे केदारबदरीक्षेत्रयोर्भौगोलिकं सांस्कृतिकञ्च माहात्म्य वर्णितमस्ति। जालन्धरखण्डोऽधुनाप्यनुपलब्धो वर्तते। काश्मीरखण्डो यद्यपि स्कन्दपुराणान्तर्गते नावलोकितस्तथापि 'नीलमत्' पुराणनामकग्रन्थे तस्य वर्णनं विद्यते। प्रकृते (मानसखण्डे) उत्तराखण्डराज्यान्तर्गतवर्त्तमानस्य कूर्माचलस्य (कुमूँ) (कुमाऊँ मण्डलस्य) प्रथितरतं स्वरूपं वर्णितमस्ति। यतोऽस्मिन् खण्डे मानसखण्डस्य पौराणिकी सीमा वर्त्तमानसीमातः पूर्वस्यां दिशि गण्डकीपर्यन्तञ्चाधुना (कालीकुमूँ) पर्यन्तमेवास्य विस्तारो विद्यते। तथैव उत्तरस्यां दिशि तुहिनालयमौलौ किरीटेव विराजमानकैलासमानसरोवरपर्यन्तं, तत्र तस्य सुविस्तृतेन भौगोलिकवर्णनेन सह तत्रत्यानां पवित्रतीर्थानां च महत्त्वं प्रतिपादितमस्ति। पश्चिमस्यां दिशि पिण्डारकालकनदीसङ्गमयोर्भूमिभागः सीमात्वेन बोधितः। दक्षिणस्यां दिशि उपत्कास्थो मध्यभूमिभागः सीमानं भजते। एतावत्पर्यन्तं भूभागो नन्दगिरिमारभ्य काकगिरि पर्यन्तमिति सुविस्तृतोऽस्ति। मानसखण्डे तत् विवरणं यथा-

> **पश्चिमाभिमुखः साक्षाद् हिमाद्रिः कथ्यते बुधैः।**
> **तस्य दक्षिणभागे वै नाम्ना नन्दागिरिः स्मृतः॥**[6]
> **नन्दपर्वतमारभ्य यावत् काकगिरि स्मृतः।**
> **तावद् वै मानसखण्डः ख्यायते नृपसत्तम॥**[7]

वर्तमान चम्पावतजनपदस्थकालीनद्याः समीपवर्त्तिभूभाग एव कुमूँ, कालीकुमूँ इति नाम्ना व्यवह्यते स्म। परन्त्वधुना समग्रस्य कुमाऊँमण्डलस्य (अल्मोड़ा-बागेश्वर-नैनीताल-ऊधमसिंह-नगर-पिथौरागढ़-चम्पावतजनपदानां कृते 'कूर्माचलः' (कुमाऊँ) इति नाम प्रयोगो भवति। सम्प्रत्यहं अल्मोडाजनपदान्तर्गतस्य श्रीयागीश्वरस्य (वर्त्तमानजागेश्वरधाम्नः) माहात्म्यं तत् पवित्रपुण्यतीर्थानाञ्च वर्णनं मानसखण्डोक्त दृष्ट्या प्रस्तौमि यागीश्वरः करुणानिधानभूतभावनशिवस्य द्वादशज्योर्तिलिङ्गेषु

गण्यते (वर्त्तमानसमये कुमाऊँमण्डलान्तर्गतस्य अल्मोड़ाजनपदस्य 17 मीलं दूरं 30 किलोमीटर दूरस्थितं (अल्मोड़ा- पिथौरागढ़- राजमार्गे विद्यते) लोकभाषायां 'जागेश्वरधाम' इति नाम्ना प्रसिद्धः। अत्र देवाधिदेवमहादेवशिवस्य प्राचीनानि सुन्दराणि दिव्यानि भव्यानि मन्दिराणि न केवलं तत्रत्यानां जनानामास्थायाः केन्द्राण्यपितु भारतस्य विभिन्नकोणेभ्यः समागतानां जनानां आस्थायाः केन्द्राणि सन्ति। अत्र श्रावणमासे श्रद्धालूनां महान् सर्म्मदो भवति। पंडितबद्रीदत्तपाण्डेयमहोदयानुसारेण (कुमाऊँ का इतिहास) दारुकानने शोभायमानजागेश्वरमन्दिरस्य शालिवाहना पुनर्निर्माणं कारितवान् इति। आद्यशङ्कराचार्योऽपि अत्रागत्य तपस्यामचरदिति तपस्तेपद्धति पौराणिकीश्रुतिः।

मनुजैर्देवर्षिभिनिषेविते अस्मिन् सघनदारुकानने भगवतः यागीश्वरमहादेवस्य रमणीयं प्राचीनं मन्दिरं विराजतेतराम्। तदुल्लेखो मानसखण्डे प्राप्यते।

**टङ्कणस्य महाभागः कुक्षौ वै दारुकावनम्।**
**तत्र जागीश्वरो देवो पूज्यते देवनायकैः॥**[8]

यागीश्वरस्य (जागेश्वरस्य) पौराणिकीकथा इत्थमवसेया- प्रथमं यागार्थ समीधादिहवनीयसामग्रीम् आहरणात (यागीश्वर इति)

द्वितीयं प्राचीनकाले रिचकनामक एको गन्धर्व आसीत्। तस्य वाणकनामको महद्धार्मिकः सुन्दरो दीर्घायु रूपयौवनसुसम्पन्नः शिल्पज्ञः सङ्गीतज्ञो दान्तो नृत्यकलानिपुणो जितेन्द्रियः पुत्र आसीत्। कदाचिदृर्षिसभायामुपविश्य महागुणीगन्धर्वकन्याभिस्साकं रन्तुमैच्छत्। ते तस्यै गन्धर्वाय महात्मने आचरणभ्रष्टत्वमसि, राक्षसयोनिं प्राप्स्यसि इति शापमददुः। स राक्षसो भूत्वा भक्ष्याभक्ष्यं खादति, विलासमयं जीवनं व्यापयति स्म। देवा कदाचिद्दुराचारराक्षसगणैः साकं दारूकाननं जग्मुः। तत्र प्रदीप्यन्तं दिव्यदेवेशं जागीश्वरमहादेवमवलोकयामासुः।

देवगन्धर्वाद्यैसम्पूजितैः च नन्दिस्कन्धगणेशाद्यैरलङ्कृतैः प्रदीप्यन्तं जागीश्वराह्वं देवदेवेशं प्रणम्य तत्प्रभावाच्च स राक्षसाधमो दिवङ्गतः। पुनश्च साक्षाद्देवोपमं नूतनं शरीरं प्राप्य स भगिनीं मातरं पितरं च स्मरति। तत् स्मरणमात्रेण ते राज्यं संत्यज्य लोकभूतभावनशिवमन्दिरं समागताः। तत्र तैः सर्वै राक्षसैः सह वार्ता कुर्वन्नेव तं विमानाग्रेऽधिरोप्य रुद्रकन्यानिवेषितं रम्यं शिवालयं ययौ। तादृश पुण्यारण्ये सर्वजनमोक्षदायके जागेश्वरे असङ्ख्यातासहस्राणि शिवलिङ्गानि विराजितानि सन्ति। (उत्तराखण्ड एक समग्र अध्ययन) केशरीनन्दनत्रिपाठिमहोदयानुसारम्, इदानीमपि 124 शिवलिङ्गानि सन्ति इति उल्लेखो प्राप्यते। अस्य स्थानस्य पवित्रता प्राचीनताञ्चालोक्य सर्वकारेण एव पुरातत्त्वविभाग उद्घाटितो वर्तते।

**सन्ति गूढानि लिङ्गानि तथान्येषु स्थलेषु च।**
**तानि सम्भाव्य जागीशं ये सम्यक् पूजयन्ति हि॥**[9]
**तत्तद्ददाति देवेशो मानवानां हिताय वैः।**
**असङ्ख्याता सहस्राणि तस्मिन्नुत्पत्तिमण्डले॥**[10]

सर्वादौ दिव्यशिवस्य लिङ्गानां पूजार्चनविधानं वर्णयति व्यासः।

**सन्ति लिङ्गानि वै विप्रा प्राधान्येन शृणुष्व हि।**
**मृत्युञ्जयं च सम्पूज्य वामे विश्वेश्वरं हरम्।**

तत्रस्थतीर्थेषु सर्वप्रमुख मृत्युञ्जय-विश्वेश्वर-गोकर्णेश-विन्ध्येश्वर-वागीश्वर- भुवनेश्वर-महाकाल-काली-सृजिता-पुष्टि-महादेवी-सोमेश्वर-सूर्येश- कमलाकान्त-ब्रह्मा- नन्दाप्रभृतीनि तीर्थानि प्रतीच्यां दिशि संस्थितानि सन्ति। ततः चण्डीश्वर-शीतला-वरुणेश-महेन्द्रादयः प्राच्यां दिशि एवमेव वालीश-धनदेश- यमेशा-कपालपाणि-कोटीश्वर-मुक्तीश्वर- मृडानीश्वरः मध्ये च भैरवेशादीनां पूजनस्य क्रमः मानसखण्डस्य 61 अध्याय एव द्रष्टव्यः अनेन शुभमागच्छतीति विश्वास श्रद्धालुनाम्। यथा प्रोक्तं मानसखण्डे- **सम्पूज्य मानवो याति महेशभवनं शुभम्।**[11]

ततः समुतीर्य शङ्करवल्लभां चण्डिकां सम्पूज्य मनुष्यः सम्यगैहिकामुष्मिकं फलमाप्नोति इति प्रसिद्धिः।

एतदन्तरं ब्रह्मतीर्थोपरि सर्वपापनाशकपञ्चकेदाराणां पूजनं ततश्चोत्तरे यागीश-महादेव-दिव्यदेहधर-हनुमान-चक्रवागीशः वागीश्वरादीनां पूजनं कर्तव्यमिति। मानसखण्डे एतेषां सम्पूर्णपूजाविधानं एकषष्टितमेऽध्याये श्लोक संख्याः 112 तः 132 यावत् सम्प्राप्यते।

सघनदारुकानने ऋषिपत्नीनिषेवितः 'यागीश्वर-चक्रेश्वर-दण्डीश्वर- वैद्यनाथ- कपर्दिगङ्गोद्भवः चैतेषां पूजनेन मायावन्तो जनाः शिवसाज्युज्यं प्राप्नुवन्ति।

**सम्पूज्य मानवो याति शिवलोकं न संशयः।**
**एतानि शिवलिङ्गानि विशिष्टानीति विद्धि वै॥**[12]

यागीश्वरे(जागेश्वर)तीर्थेऽस्मिन्-'गौरी'-'पद्मा'-'शची'-'मेधा'-सावित्री'-'विजया'-'जया'-'देवसेना'- 'स्वाहा' 'स्वधा' च मातरो लोकमातरश्च 'तुष्टि'- 'पुष्टिः'-'धृतिः' स्वमाता च कुलदेविद्वय विराजते। महेन्द्रादिप्रमुखा-विद्याधर-गन्धर्व-पुष्पदन्तश्चापसरसां गणः 'गुह्य'-'सिद्धः'-'पिशाच'-'नाग'-'महोरग', 'अष्टौ वसु'-'द्वादशार्क'-मरुद्गणप्रभृतयो विराजन्ते। देवर्षि-ब्रह्मर्षि-दैत्य-दानव-महाबलाडाकिन्यश्च विराजन्ते।

**सेवन्ते देवदेवेशं दिव्यं जागीश्वराह्वयम्।**
**एतेषां नामलिङ्गानि सन्त्यदृश्यानि वै द्विज॥**[13]
**सम्पूज्य देवदेवेशं दिव्यं जागीश्वराह्वयम्**
**प्राप्नोति परमां सिद्धिं देवैरपि सुदुर्लभाम्॥**[14]

टङ्कणाद्रौ महादेवं सम्पूज्य वृद्धजागीश्वराख्यं ततः परमेश्वरीयं ततश्च भाण्डीश्वरं परिक्रम्य पुनः जागीश्वरं प्रति।

गव्यूतिदूरं गत्वा त्रिनत्रेशं तत्र यागीश्वरं दक्षिणे कान्तारे क्षेत्रपालादीनां सम्पूजेन शुभं भविष्यति मानवानामिति मे विश्वासः।

**सम्पूज्य मानवो याति त्रिनेत्रं द्वि सत्तमज।**
**देवगन्धर्वकन्याभिः सेवितं शिवमण्डलम्॥**[15]
**एवं वै कुरुते यस्तु यागं वै द्विजसत्तम।**

**स कोटिकुलमुद्धृत्य शिवलोके महीयते।।**[16]

अथ मानसखण्डोक्त यागीश्वरस्य माहात्म्यं विविच्य पुनः तत्पवित्रतीर्थानां च विवेचनं प्रस्तुयते।

**यानि यत्र च तीर्थानि मुख्यभूतानि च द्विज**

**तानि ते कथयिष्यामि यावतः सुसमाहितः।**

**यत्र कपर्दिसम्भूता गङ्गा साक्षाच्छिवप्रिया।।**[17]

**अणुमात्रमपि स्पृष्टाया देहात्पातकाद्विज।**

**तस्यां तीर्थान्यनेकानि सन्ति तानि शृष्णुष्व वै।।**[18]

तीर्थस्थलेषु कपर्दितीर्थ–सरयूमूले बाहुसरसतीर्थ–वाणतीर्थ– शिवातीर्थ– दुंण्डुतीर्थ–माण्डव्यतीर्थ–बालितीर्थ–जामन्दग्न्यतीर्थ–वेणुतीर्थ–मौर्वतीर्थ–काश्यपतीर्थ–पापनाशक–क्रौञ्चतीर्थ–वराहतीर्थ–(देविवाराही पूज्यते तत्र) 'कमलनाभतीर्थ– भूपतितीर्थभूतेशो पूज्यते तत्र। कपालीतीर्थकालापतीर्थ–प्राणदतीर्थ–लोमहन्तातीर्थ कालप्रणाशनतीर्थ– हारीतकतीर्थ–रुद्रप्रदतीर्थ–सूर्य–शशितीर्थ–शूलगङ्गायां ब्रह्मतीर्थोपरिस्नानपिण्डदानादि-सुकृतकर्मभिः पापरहितो भूत्वा शतं कुलं च तारयन्ति। मानसखण्डे उक्तं यथा–

**ये निमज्य महाभागाः पिण्डं ददति तत्र हि।**[19]

**ते तारयन्ति वै विप्र कुलमेकोत्तरशतम्।**[20]

धर्माधर्मतीर्थ–ऋणमोक्षतीर्थ–पापनाशनतीर्थ–सौन्दर्यपदतीर्थ–नरकतीर्थ–सुर्वत्र– तीर्थ– योगीश्वरतीर्थ–ततश्च शूलगङ्गायायाः सङ्गमेऽपि अनेकानि तीर्थानि सन्ति तन्निरूपणं मानसखण्डे अनेन विधिना सञ्ज्ञायते।

**तपस्यमानेन हरेण पुरा शूलेन भित्त्वा किल दारुकावनम्।**

**निष्कासिता योगगतेन योगिना सङ्गं गता पुण्यमतीव शोभना।।**[21]

'माहेन्द्रतीर्थ–लवणतीर्थ–'त्वाष्टतीर्थ'–'सारमेय'–चैतेषु स्नात्वा नरो याति महेन्द्रभवनं प्रति। अतिप्रसिद्धमृत्युञ्जयतीर्थ'–'हेतुवृन्दारकतीर्थ'–'कौशल्यतीर्थ'–'पाकशासनतीर्थ'–माहेन्द्रतीर्थ'–'वरुणतीर्थ'–'वागीश्वरतीर्थ'–'धनदतीर्थ'–'विद्याप्रदतीर्थ'–'कायतीर्थ', 'शुक्रतीर्थ'– 'गणेशतीर्थ'–चण्डीश्वरतीर्थ–वानरतीर्थ–सिंहतीर्थ–कपिलतीर्थ–जयन्तीतीर्थ–रूपदतीर्थ– धनदतीर्थ–सूर्यतीर्थ–ब्रह्मकपालतीर्थ–यमनिनिर्णतीर्थ–देवार्णतारतीर्थ–सर्वपापप्रणाशनतीर्थ–अलकनन्दासंगमे– पुण्यशीलासरस्वतीतीर्थ–अलकनन्दायाश्च तीर्थानि मरीचितीर्थ–अङ्गितीर्थ–अङ्गिरातीर्थ–पुलस्त्यतीर्थ–पुलहतीर्थ–नारदतीर्थ–पर्वततीर्थञ्चैतान्यनेकानि तीर्थानि अलक– नन्दायाः विख्यातानि।

**निमज्ज तेषु तीर्थेषु देवो भवति मानवः।**[22]

ततः शेषतीर्थ–तक्षकतीर्थ–बलितीर्थ–क्राथतीर्थ–नन्दीतीर्थ–स्कन्धतीर्थ– ब्रह्मण्यतीर्थ– शूद्रवृत्तिहरतीर्थ–हरतीर्थ–काकपक्षाककतीर्थ–भोगनाथतीर्थ–ऐरावतह्रदतीर्थ ततः वारुणीतीर्थ– पौलीमीतीर्थ–मेनकातीर्थ–मेनकासङ्गमतीर्थ–गौतमीतीर्थ–गौतमतीर्थ–मुद्गलतीर्थ–कुम्भाण्डतीर्थ– हिमवन्ततीर्थ–नैमिनितीर्थ–पराशरतीर्थ–व्यास–तीर्थ–शुक्रतीर्थ–चण्डीतीर्थ, त्रिदिवौकसतीर्थ हाटकेशप्रभृत्तिनि तीर्थानि सन्ति।

**चात्रैव हाटकेशो महेश्वरोऽपि विद्यते इति।**

**विद्यते यत्र वै देवो हाटकेशो महश्वेरः।।**[23]

ततः कवोष्णसलिलसेवितमखिलपापविनाशकवह्नितीर्थमस्ति।

ततः त्रिलोचनमहादेवचरणसंसेव्यानि गौरीतीर्थ-महासरित्-जटासङ्गतीर्थ-महासङ्गतीर्थनि तत्रैव गौरीश्वरतीर्थञ्चास्ति।

**ततो गौरीश्वरो देवः पूज्यते देवनायकैः।**
**तं सम्पूज्य जनो याति शिवलोकं दुर्लभम्।।**24

ततो जटागङ्गा-सरयू-नद्योः सङ्गमस्य माहात्यमित्थमवर्णयत् मानसखण्डे-वादरायण- महर्षिवेदव्यासः-

**शक्यते नान्यथा विप्र सत्यमेतन्मयोदितम्।**
**सोमपानफलं यस्य पिबता जायते द्विज।।**[25]

अर्थाद् एतेषां तीर्थानां मानसोक्तविधिना पूजाऽर्चनमकरिष्यत् नूनमेव मानवः सोमरसम् अप्राप्तष्यत्।

**'तीर्थे स्नाति तीर्थमेव सजातानां कुरुते'** इति श्रुतिरेव तीर्थस्य माहात्म्यं बोधयति। गङ्गाप्रभृतीनि तीर्थानि धार्मिकदेशभारत एव सुप्रसिद्धानि दृश्यते। तीर्थसम्पादितस्य धर्मजातस्य सिद्धपदतवकं भवतीति शास्त्राणि साधकानामनुभवश्चात्र प्रमाणम्। अत एव स्मृतिपुराणादिशास्त्रेषु तीर्थ एव पितरश्राद्धतर्पणादिक्रियाकलापानामनुष्ठानमिति कर्त्तव्यता प्रतिपाद्यते। धर्मानुष्ठानायैव विशेषदेशोऽपि समीहितो भवतीति वेदेऽपि सन्दृश्यते। **'नान्तमीयात्'** इति बृहदारण्याख्यश्रुत्या धर्मालङ्कारसंस्कृताद् भारतदेशातदन्यत्र म्लेच्छदेशगमनं प्रतिषिध्यति। अत्र सत्यप्यऽस्मिन् सिद्धान्ते यदाधुनिकविचारकाः कथयन्ति यदार्या धर्मतत्त्वविरहितात् पाश्चात्यदेशाद् भारतमाजग्मुरिति तन्निर्मूलम्। शास्त्रदृष्ट्या तत्क्रियमाणधर्मदृष्ट्या च भारतीयैकतैव न विविधता। अस्मिन् देशे वेदबाह्यानां स्थितेदृढतायै तद्वैविध्यापादनं तत्सर्व शास्त्रविरुद्धं भारतीयतीर्थविरुद्धं पुराणविरुद्धं च।

**सन्दर्भ-संकेतः-**


1. निरुक्तः 3/19/14
2. महाभारतम् आदिपर्व, 1/268
3. नारदीय 2,24,17
4. ब्रह्मपुराणम् 255/35
5. पद्मपुराणम् उत्तरखण्डं 163/81
6. मानसखण्डः 22
7. मानसखण्डः 21/4
8. मानसखण्डः 61/38
9. मानसखण्डः, 61/109
10. मानसखण्डः, 61/112
11. मानसखण्डः 123/1/2
12. मानसखण्डः 61/32
13. मानसखण्डः 61/139
14. मानसखण्डः 61/141
15. मानसखण्डः 61/146
16. मानसखण्डः 61/147
17. मानसखण्डः 61/152
18. मानसखण्डः 61/153
19. मानसखण्डः 61/164
20. मानसखण्डः 61/166
21. मानसखण्डः 61/169
22. मानसखण्डः 61/181
23. मानसखण्डः 61/189
24. मानसखण्डः 61/192
25. मानसखण्डः 71/194



- अतिथि-प्राध्यापकः-साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः), श्रीरणवीरजम्मूपरिसर, जम्मू
चलभाषसंख्या-9554131056
अणुसङ्केतः sumantchandra0007@gmail.com


******

# संस्कृतकाव्यशास्त्रीयप्रमुखलक्षणग्रन्थेषु सौन्दर्यतत्त्वविमर्शः

- मञ्जूत्रिपाठी

भारतीयसंस्कृतवाङ्मये सौन्दर्यमिति शब्दस्य प्रयोगोऽतिप्राचीनोऽस्ति वेदेषूपनिषत्सु चायं शब्दः प्रयुक्तो दरीदृश्यते।

अमरकोशस्य तृतीयकाण्डे सुन्दरशब्दस्य पर्यायाः इत्थमुल्लिखिताः-

**सुन्दरं रुचिरं चारु सुषमं साधुशोभनम्।**

**कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जुमञ्जुलम्॥**[1]

ललितम्, सुष्ठुः, काम्यम्, कमनीयम्, रमणीयञ्चेत्यादयोऽस्य शब्दस्य पर्यायाः।

सौन्दर्यशब्दस्य पारिभाषिकेऽर्थे 'रमणीयता' शब्दस्योपयोगः पण्डितराजजगन्नाथेन स्वकीये काव्यशस्त्रीयग्रन्थे रसगङ्गाधरे-काव्यलक्षणनिरूपणावसरे प्रथमानने- **रमणीयार्थप्रतिपादकः शब्दः काव्यम्**[2] इति कृतम्। यैरस्य पारिभाषिकशब्दस्य प्रयोगकृतः तेषु वामनोऽभिनवगुप्तकुन्तक विश्वनाथ- मम्मटादयः प्रमुखाः सन्ति।

कुन्तकस्य तु सर्वातिरेकेणायं शब्दः प्रियतमः। यथा-

**भण तरुणिरमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि।**

**यदि सल्लीलोल्लापिनि गच्छसि तत किं त्वदीयं मे॥**

**अनणुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम्।**

**परिसरणमरुणचरणे रणरणकमकारणं कुरुते॥**[3]

आचार्यवामनेन काव्यं अलङ्कारात् ग्राह्यम्।[4] **सौन्दर्यमलङ्कारः**।[5] इति वदता अलङ्कारार्थ सौन्दर्यमेवेति साधितम्। अत्र 'अलङ्कार' शब्दः काव्यसौन्दर्यधायको वर्तते। काव्यविचारशास्त्रकृते 'अलङ्कारः' इत्यभिख्या सर्वविधकाव्यसौन्दर्यपूरकतामेव द्रढयति। भरतभामहदण्डिप्रभृत्याचार्यैर्विवेचितरीत्या-ऽलङ्कारशब्दः सौन्दर्यपर्यायत्वेनैव स्वीकार्योऽस्ति। प्रायः सवैरेव संस्कृतालङ्कारशास्त्रिर्भियथा तथा सौन्दर्यस्य कोऽपि भागः स्पृष्टो।

आचार्यो दण्डी प्रकृतिसुन्दरस्य मार्गस्य समर्थकः इति प्रतिभाति-

**गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।**

**निराकरणमित्येष मार्गः प्रकृतिसुन्दरः॥**[6]

वक्रोक्तिकुन्तकः सहृदयाह्लादसुन्दरं काव्यं प्रस्तौति-

**शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।**

**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः॥**[7]

सोऽस्याऽऽधारभूतं तत्त्वं वक्रोक्तिमेव प्रमाणीकुर्वन् काव्यगतसौन्दर्यस्याऽऽधारभूमिं निर्माति तथाहि-

**साहित्यमनयोः शोभाशालितां प्रति काप्यसौ।**

**अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः॥**[8]

सौन्दर्यस्य प्रत्यक्षभावनानां चिन्तनमेव सौन्दर्यशास्त्रमस्ति। सुन्दरविचारो वा सौन्दर्यशास्त्रमिति मन्तव्यम्। सौन्दर्येण सम्बद्धानां मौलिकप्रश्नानां तात्त्विकविवेचनं सौन्दर्यशास्त्रेऽन्तर्भवति सौन्दर्यशास्त्रं काव्यशास्त्रस्य, तत्त्वमीमांसायाः मनोविज्ञानस्य वा पर्यायरूपेण न स्वीक्रियते। काव्यशास्त्रं सौन्दर्यशास्त्रेण ग्रथितमस्ति। वामनः प्रथमः संस्कृतकाव्याचार्यो वर्तते यः स्वकीये काव्यशस्त्रीयग्रन्थे सौन्दर्यशब्दं प्रयुक्तवान् तथाहि- **कव्यं ग्राह्यम् अलंकारात्**[9] **सौन्दर्यमलङ्कारः।**[10]

अत्र प्रयुक्तः सौन्दर्यशब्दोऽलङ्काराश्रितं सौन्दर्यं विशेषण परिभाषयति वामनात् समनन्तरप्रादुर्भूतः परमाचार्य आनन्दवर्धनो ध्वन्यालोके काव्यस्य शिखरभूतं सौन्दर्यमित्थं विशदयति-

**काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व**

**स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।**

**केचिद् वाचां स्थितमविषये तत्त्वमूचुस्तदीयं**

**तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्॥**[11]

अनेन विशदीभवति यत्काव्यस्य शिखरभूतं तत्त्वं येनाऽऽचार्येण ध्वनिरूपेण त्रिविधं प्रकाशितम्, स एवास्य शिखरस्यापि शिखरं रसमेव मनुते। इदमेव मतं विशदीकुर्वन्नाचार्यः श्रीअभिनवगुप्तपादः स्वकीयलोचनटीकायाम् आदिमङ्गलकारिकायां कथयति-

**अपूर्वं यद्वस्तु प्रथयति विना कारणकलां**

**जगद्भावप्रख्यं निजरसभरात्सारयति च।**

**क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति तत्**

**सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते॥1**[12]

अत्रापि कारण-कला-रहितस्य ध्वनितत्त्वस्य सङ्केतं कृत्वाऽऽचार्यो रसयैव प्राधान्यं स्वीकरोति। अनया रीत्या सङ्क्षेपेणेदमेव वक्तुं शक्यते यद् भारतीयकाव्यशास्त्ररीत्या रस एव प्रधानभूतं सौन्दर्यतत्त्वमस्ति, तच्च मम्मटस्योक्त्याऽपि प्रशस्तमेव भाति,

तथाहि-

**तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।**[13]

दोषगुणालङ्कारा: वक्ष्यन्ते क्वपीत्यनेन तदाह-सालङ्कारौ क्वचित्तुस्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः।

यथा- **यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-**

**स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।**

**सा चौवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ**

**रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते।।**[14]

अत्र स्फुटो न कश्चिदलङ्कारः। रसस्य च प्राधान्यान्नालङ्कारता, आशयस्त्वयमस्ति यद् गुणालङ्काररीतयः, छन्दोविधानादिकमपि काव्यतत्त्वं समुत्कर्ष नयन्ति परं हि रसः प्रधानत्वेन काव्यं सहृदयहृदयाह्लादकवस्तुतया निर्माति, तच्चेदं कविराजविश्वनाथेन एकयैव कारिकया साधु विशदीकृतम्। तथाहि-

**वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः**

**उत्कर्ष हेतवः प्रोक्ता गुणालङ्काररीतयः।।**[15]

अत्र विश्वनाथो रसं काव्यात्मनं मनुतेऽथ दोषवर्जनाकृते तेषामपकर्षकारकत्व परिचयति अन्ते च काव्योत्कर्षहेतुभूतानां गुणालङ्काररीतीनां विवरणं करोति। इयं नाम काव्योत्कर्षशालिता रसप्रवणतयाऽपि। वसतुतः आनन्दवर्धनप्रतिपादितध्वनिपद्दतावेव प्रसृता भाति।

अथास्यां भूमौ आनन्दवर्धनस्य ध्वनिकारिकाऽपि अनुशीलनीयाऽस्ति सा च-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**

**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।**[16]

अनेन काव्ये विनिबद्धं किमपि सुन्दरं वस्तुतत्त्वं प्रतीतिविषयतामायाति। अस्यैव सौन्दर्यस्य कृते पण्डितराजजगन्नाथो 'रमणीयता' शब्दं प्रयोजयति- 'रमणीययार्थप्रतिपादकः शब्दः काव्यम्' इति।

लोकरुचिवैचित्र्यैणार्थनिष्ठाया रमणीयताया अव्यवस्थानाद् व्यवस्थितिमाचष्टे-

**रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता।**[17]

लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापर्यायोऽनुभवसाक्षिको जातिविशेषः।[18]

प्रस्तुतभारतीयकाव्यशास्त्रस्य सूक्ष्मविवरणे यानि तत्त्वानि दृष्टिपथमायान्ति, तेषु प्रमुखानि सन्ति- अलङ्कारः रीतिः गुणः रसः ध्वनिः वक्रोक्तिः, रमणीयता च। अतो विशिष्टतया चिन्तनीयं तत्त्वमित्थं स्वीकर्तुं शक्यते यत् सौन्दर्यस्यानेकेषु पर्यायेषु चारुता रमणीयता वा विशिष्टं स्थानं धत्ते। सेयं चारुता ध्वनिप्रस्थाने बहुशो व्याख्याता तथा च पण्डितराजस्य रमणीयत्वप्रकल्पने पुनराख्याता, यस्याः परिचयो विचारे लभ्यते।

न केवलं काव्यशास्त्रीयं सौन्दर्यतत्त्वानानुचिन्तनम् अपितु नाट्यशास्त्रीयग्रन्थेषु सौन्दर्य-सम्बन्धिप्रायोगिकरूपस्य अत्यन्तसाङ्गोपाङ्गबद्धमस्ति।

सौन्दर्यशास्त्रं वस्तुतः कलात्मकतयाऽभिव्यक्तेः स्वरूपविशेषं बोधयति। पाश्चात्याः बहुसंख्यायामिदमपि मन्वते यत् कलात्मिकाभिव्यक्तिः सामान्यतो जीवनेन वा सत्यघटनाभिर्वा नैव सम्बद्ध्यते।

सौन्दर्यस्य समस्तानि लक्षणानि यथा ललितकलासु सङ्गच्छन्ते यथा तानि प्रकृति रूपेष्वपि घटन्ति एव। कुसुमस्य सुकुमारं रूपम् चन्द्रिकायाः कोमला कान्ति, कोकिलस्य कलारचना, काकलीत्येतेषु सर्वेष्वपि ते गुणाः विराजन्ते।

भारतीयसौन्दर्यदर्शनसन्तुलितं समाकलितञ्च दर्शनमस्ति। यत्सौन्दर्यं जीवनस्य मूल्यसन्दर्भे विचारयति तत्सौन्दर्यस्य स्वतन्त्रं महत्त्वमस्मिन्नर्थे स्वीकरोति यत्सौन्दर्यस्य सत्ता धर्मार्थकाममोक्षेषु न निमज्जति। कामेन सह सौन्दर्यस्य मौलिकसम्बन्धे सत्यपि सौन्दर्यस्वरूपं काममतिक्रम्यैव परिष्कृतं भवति। नास्ति कामः स्वयं सौन्दर्यम् कामोन्नयनमस्ति सौन्दर्यम्।

सौन्दर्यं न केवलं रूपवादिना, वस्तुवादिना तथापि सौन्दर्यं मूलतात्मप्रवृत्तित्वेन स्वीकृतम्। अत एको महाकविकालिदासः स्वरचनेषु प्रतिपादितं 'सौन्दर्यः बाह्यपक्षः तथा आन्तरिकपक्षो भवति। लोकेऽपि द्रष्टुं शक्नुमः -

साहित्ये रचनाकारस्य सौन्दर्यानुभूतिरूपानन्दस्य स्तर यावत् उन्नतं कर्तुं शक्नोति स श्रोतोभ्यः या पाठकेभ्यः तावद् एव आदरणीय भवति। इति।

**सन्दर्भसङ्केतसूची-**

1. अमरकोषस्य तृतीयकाण्डे सुन्दरशब्दस्य पर्यायाः। 2. पण्डितराजजगन्नाथविरचित रसगङ्गाधरप्रथमानने 'काव्यलक्षणम्'।
3. कुन्तककृतवक्रोक्तिजीवितं श्लोक सप्तमस्य उदाहरणम्। 4. आचार्यवामनकृतकाव्यालङ्कारसूत्राणि १/१
5. तत्रैव १/२ 6. आचार्यदण्डीकृतकाव्यादर्शः १/२१ 7. आचार्यकुन्तकविरचितवक्रोक्तिजीवितम् १/९
8. तत्रैव १/१७ 9. आचार्यवामनकृतकाव्यालङ्कारसूत्राणि १/१ 10. तत्रैव १/२
11. आचार्यानन्दवर्धनकृतध्वन्यालोकः १/१ 12. अभिनवगुप्तपादरचित लोचनटीका ध्वन्यालोके १/१
13. आचार्यमम्मटकृतकाव्यप्रकाशस्य काव्यलक्षणम्। 14. तत्रैव काव्यलक्षणस्युदाहरणम्।
15. आचार्यविश्वनाथरचितसाहित्यदर्पणस्य काव्यलक्षणम्। 16. आचार्यआनन्दवर्धनस्य ध्वन्यालोके १/३
17. रसगङ्गाधरप्रथमानने काव्यलक्षणस्य वृत्तिभागः। 18. तत्रैव ।

**सन्दर्भग्रन्थसूची -**

1. अमरकोषः 2. पण्डितराजगन्नथविरचित रसगंगाधरः 3. कुन्तककृतवक्रोक्तिजीवितम्
4. आचार्यवामनकृतकाव्यालङ्कारसूत्राणि 5. आचार्यदण्डीकतकाव्यादर्शः 6. आचार्यआनन्दवर्धनकृतध्वन्यालोकः
7. आचार्यमम्मटकृतकाव्यप्रकाशः 8. आचार्यविश्वनाथरचित साहित्यदर्पणः ।

- शोधच्छात्रा (साहित्यविभागः)
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) लखनऊपरिसरः
ईमेलः manju8795@gmail.com

******

# कालिदासनाटकेषु प्रेमतत्त्वम्

-सुमेरीलाल:

कविकुलगुरो: महाकविकालिदासस्याद्वितीयं नाटकमभिज्ञानशाकुन्तलम्। नाटकमिदं महाकवि-कालिदासस्य सर्वस्वं समेषामपि नाटकानां निदर्शनमेव। नाटकेऽस्मिन् भारतीयसंस्कृते:, सभ्यताया:, समाजस्य च प्रत्यक्षचित्रणमस्ति। सप्ताङ्कोपनिबद्धमिदं नाटकं न केवलं कालिदासनाट्यसाहित्ये अपितु विश्वनाटकसाहित्येऽपि श्रेष्ठं स्थानं भजते। अत्रत्यं शाश्वतिकं प्रकृतिचित्रणं प्रकृतिप्रेम, दुष्यन्तेन सह शकुन्तलाया: प्रेमप्रसङ्ग:, महर्षे: कण्वस्य शकुन्तलादिषयक: स्नेह: शकुन्तलाया: पतिगृहगमनकाले परिजनस्य वियोगदु:खं चेत्येतत् सर्वमपि सहृदयानां चेतस्स्पृशति।

नाट्यरचनायामस्यां शकुन्तला-गौतमी-अनसूया-प्रियंवदादिमाध्यमेन नारीसौन्दर्यं वर्णयता, स्त्रीणां महत्वं प्रतिपादयता, नारीशक्तिं प्रति आदरभावं प्रकटयता कविवरेण कालिदासेन नारीणां महन्महत्वं स्थापितमस्ति। नारीसौन्दर्यप्रदर्शने तु यादृश: कालिदासोऽतीव कुशल: न कोऽपि तादृशोऽन्य:। यथा-अनिन्द्यसुन्दर्या: शकुन्तलाया: लोकोत्तरं लावण्यं वर्णयन् कवि: दुष्यन्तमुखेन कथयति-

**अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-**

**रनाविद्धं रत्न मधु नवमनास्वादितरसम्।**

**अखण्डं पुण्यानां फलमिव च तद्रूपमनघं**

**न जाने भोक्तारं कमिह समुपस्थास्यति विधि:**[1]।

नारीसौन्दर्यपक्षे तु स: प्रकृतेराधारं गृहीत्वा निजकाव्यं चमत्कारजनकं रमणीयं च विदधाति। यथा च शकुन्तलाविषये वर्णयति-

**अधर: किसलयराग: कोमलविटपानुकारिणौ बाहू।**

**कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्।।**[2]

प्रायश: स्त्रीणां हृदयं प्रेमप्रधानं भवति। किन्तु कविना कालिदासेन स्वीये नाटके शकुन्तलाया: यत्स्वरूपं प्रकटितमस्ति तत्खलु असाधारणं पाठकानां चेतश्चमत्करोति च। तत्र शकुन्तला केवलं मानवमात्रं प्रति नापितु लता-वृक्ष-कुसुम-पशु-विहग-प्रकृत्यादिभि: सार्धमपि स्वानुरागं प्रकटयति।

अत्र हि कालिदासनाटकेषु प्रेमतत्त्वम् इति विचारे सर्वप्रथमं कालिदासनाटकानि स्मरणमार्गमायान्ति। अथ च समुपस्थितं भवति तत्र वर्णितं प्रेमतत्त्वम्। कवि: कालिदासो येनमार्गेण यैर्नाटकपात्रनायकादिभिश्च सिद्धो जातस्तत्र कारणवैविध्यमस्ति। तद्यथा- कवे: विश्वप्रसिद्धममरमजरं च नाटकं शाकुन्तलं वस्तुत: प्रेमाश्रितमेव। यत्र कवि: सर्वोत्कृष्टचित्रणेन प्रेमतत्वं प्रदर्शयति। प्रेम पदं हि रूपगुणरहितं, कामभावरहितं,

प्रतिक्षणं वर्धमानमेकं रसरूपं भवति। 'प्रेम' हृदयदेशसंस्थितो विशिष्टभाव:, नास्ति किमपि तेनास्पृष्टम्। भावरूपेण संस्थितमिदं विविधजन्मनि सौहार्दरूपं भवति येन एकधा जाता क्रिया पौन: पुन्येन स्मृतिपटलमायाति पुरातनं च स्मारयति। कालिदास:-

**रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्**
**पर्युत्सुको भवति यत् सुखितोऽपि जन्तु:।**
**तच्चेतसा स्मरति नूनमबोधपूर्वं**
**भावस्थिराणि जननान्तरसौहृदानि।।**[3]

'विक्रमोर्वशीयम्' महाकवेर्द्वितीयं विलक्षणं दृश्यकाव्यं वर्तते। अत्र पुरुरवा राजा, उर्वशी राज्ञी च मुख्यपात्रतां निर्वहत:। तयो: प्रणयसम्बन्धवर्णनेन कवि: यां भावनाम् अन्तश्चेतनायामुत्पादयति सा निश्चयेन यौवनकालिकसंवेदनासहगामिनीव प्रतिभाति भवति च तद्द्वारा यस्य कस्यापि हृदयाकर्षणम-मानन्दालाभाय। अत्र राजा पुरुरवा, दैत्यकेशीहस्तात् तामुर्वशीं मुक्तां कर्तुं सफलो भवति। विविधस्थानेष्ववसरेषु चापि भवति प्रेमतत्वस्य वास्तविकस्वरूपदर्शनसमर्थ:। उर्वशीं कथयति- प्रिये धैर्यं धृत्वा प्रात:कालिक-कमलिनी यथा विकसति तथैव निजनयने उद्घाटयतु। मनोरोचकमुदाहरणे तद् द्रष्टव्यं तावत्-

**'तदेतदुन्मीलय चक्षुरालयं निशावसाने नलिनीव पंकजम्'**[4]

अत्र द्वयोरपि काव्योश्चिन्तनं विशिष्टमेव। किं च प्रेमतत्ववर्णने यथा मति: कालिदासस्य वर्तते सा सर्वथा श्लाघ्याऽनुपमा च भवति। राजवैभवकथनप्रवीणस्य कालिदासकवे: सौन्दर्यकथनशैली इन्द्रियचरेव भवति। यतोऽत्र कविर्यथा कल्पनां करोति। तथैव कालान्तरस्य पठकोऽप्यनुभवतीति प्रमाणितं वच:। मूर्च्छिता उर्वशी यदा नयनयुगलं समुद्घाटयति तदा पुरुरवा तन्नयनयुगलोन्मीलनं तथैव पश्यति यथा खलु चन्द्रोदये रात्रि: अन्धकारान्मुक्ता भवति, प्रकाशिता रमणीया च भवति-

**आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि-**
**नैशस्यार्चिर्हुतभुज इव च्छिन्नभूयिष्ठधूमा।**
**मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा,**
**गङ्गारोध: पतनकलुषा गच्छतीव प्रसादम्।।**[5]

उर्वश्या: पूर्णस्वस्थत्वे राजा पुरुरवा चिन्तयति यत्- अस्या: पुनर्जीवनाय साक्षाद् ब्रह्मावतीर्ण:, अथवा स्वयं कामदेवोऽस्या एतत्सौन्दर्यसंरक्षणकारणभूतो जात: किमुत वसन्त आगत्यास्यां मृतप्रायमानवमूर्तौ प्राणानभरदिति-

**अस्या: सर्गविधौ प्रजापतिरभूच्चन्द्रो न कान्तिप्रद:**
**शृङ्गारैकरस: स्वयं नु मदनो मासो नु पुष्पाकर:।**

**वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलः,**

**निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः।।**[6]

तदानीमुर्वशीसौन्दर्याभिभूतो राजा तस्याः प्रेमजाले निबद्धो भवति। उर्वशी अपि राज्ञः साहसं धैर्यं चावलोक्य तत्प्रति आकृष्टा भवति। किं च सद्य एव उर्वश्याः इन्द्रपुरीं पुरुरवसः निजराजधानीं प्रति प्रस्थानं भवति। पुरुरवा कथयति- अहो! मदनोऽपि दुर्लभवस्तुप्राप्तुकामो भवित। सुन्दरीयमाकाशं गच्छन्ती बलपूर्वकं मम मनस्तथैवाकर्षति यथा काचिद् राजहंसी खण्डितकमलवृन्तस्य सूत्रमाकृष्य नयति-

**''अहो दुर्लभाभिलाषी मदनः''**

**एषा मनो मे प्रसभं शरीरात्पितुः पदं मध्यममुपषन्ती।**

**सुराङ्गना कर्षति खण्डिताग्रात्सूत्रमृणालादिव राजहंसी।।**[7]

महाकवेः अभिज्ञानशाकुन्तले समुपवर्णितं शृङ्गाररसपूर्णं प्रेम विलक्षणमेव वर्तते। नाटकस्य नायको दुष्यन्तः सम्मोहकस्वरूपस्य पवित्रप्रेमी विद्यते। स प्रणयस्य याचको भोक्ता चापि स्वयमेव भवति। नाटकस्याद्वितीयप्रतिमे चतुर्थाङ्के शकुन्तलायाः रूपवैभवमालोक्य दुष्यन्तः सन्देहं करोति यदैषा कन्यका ऋषि कन्यका तु नैवास्ति किं च भवितुमर्हति कस्याश्चिद्देवसुन्दर्याः कन्येति-

**''अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात्''**[8]

अपरिचितव्यक्तयेऽपि शकुन्तलाया हृदये प्रेम जागर्ति। इति खलु कालिदासस्य प्रेमवर्णनपाटवमेव, दृग्गोचरी च भवत्यत्र प्रकृतेरादिमा वासना। दुष्यन्तो भ्रमरमपि अवलोक्य तं भाग्यवन्त जानाति शकुन्तलासामीप्यभ्रमणकारणात्। तद्यथा-

**चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं,**

**रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।**

**करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं**

**वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती।।**[9]

महाकवेः मालविकाग्निमित्रमनाटकमप्यद्भुतमेव। नाटकस्यास्य द्वितीयाङ्के नायिका निजहृदयस्य सत्यभावान् नायकमग्निमित्रं प्रति प्रकटयति। कथयति च-

हे हृदय् प्रियतमदर्शनाशां परित्यज किं च वामाक्षि मम स्फुरतीदमनेनाशासे यत् किमपि ममेष्टमपि सेत्स्यतीति। प्रियतमे नैजं सर्वस्वमर्पयामि। तद्यथा-

**दुर्लभः प्रियो मे तस्मिन्भव हृदयनिराश-**

**महो अपाङ्गो परिस्फुरति किमपि वामः।**

**एषः चिरदृष्टः कथं पुनरूपनेतव्यो नाथ!**

**मां पराधीनां त्वां परिगणय सतृष्णाम्।।**[10]

महाकविकालिदासमते प्रेम न व्यष्टि- अधीनं तलु समष्टि-अधीनमेव। प्रेमतत्वे सर्वस्याप्यधि कारो निजसत्ता वापि भवति। कवेः प्रेमतत्वनिरूपणं 'वसुधैव कुटुम्बकम्' इति भावनासमन्वितं वर्तते। स प्रेमतत्वस्य शान्तस्वरूपमेव श्रेष्ठं मनुते। महाकविः सौन्दर्यवर्णनपण्डितो वर्तते। स सौन्दर्यं ब्रह्मानन्दसहोदरमिव ज्ञात्वा सर्वेषां ग्राह्यमिदं सौन्दर्यमिति घोषं करोति। एवं हि सौन्दर्ये सर्वस्यापि विश्वस्य समानाधिकारो निरन्तरं तिष्ठति।

अत्र निष्कर्षरूपेण कथयितुं शक्यते यत्कालिदासनाटकेषु एकमादर्शप्रेम समुपवर्णितमस्ति। तच्च नायकनायिकयोर्भवतु, प्रकृतिप्रेम भवतु अथाहो वसुधैवकुटुम्बकमिति भवनाभरितं प्रेम भवतु। स प्रेमतत्वमाध्यमेन राष्ट्रियैकताकाङ्क्षी वर्तते।

**सन्दर्भग्रन्थसूची-**


1. अभिज्ञानशाकुन्तलम् महाकविकालिदास प्रणीत- व्याख्याकार डा. कपिलदेव द्विवेदी आचार्य, प्रकाशक-रामनारायण लाल विजयकुमार 2 कटरारोड इलाहाबाद-211002, संस्करण-2015 पृष्ठ 115-2/10
2. तत्रैव, पृष्ठ 50, 1/21
3. तत्रैव, पृष्ठ 245, 5/2
4. विक्रमोर्वशीयम् महाकवि कालिदास प्रणीत- व्याख्याकार- पं. परमेश्वरेदीन पाण्डेय प्रकाशन, चौखम्बा सुरभारती प्रकाशन वाराणसी, 2009, 1/6, पृष्ठ-15
5. तत्रैव, पृष्ठ 18, 1/9
6. तत्रैव, पृष्ठ 20, 1/10
7. तत्रैव, पृष्ठ 37, 1/20
8. अभिज्ञानशाकुन्तलम् महाकविकालिदास प्रणीत- व्याख्याकार डा. कपिलदेव द्विवेदी आचार्य, प्रकाशक-रामनारायण लाल विजयकुमार 2 कटरारोड इलाहाबाद-211002 पृष्ठ 54-1अंक
9. अभिज्ञानशाकुन्तलम् महाकवि कालिदास प्रणीत- व्याख्याकार-श्रीकृष्णमणि त्रिपाठी, प्रकाशक- चौखम्भा सुरभारती प्रकाशन वाराणसी-221001 संस्करण-2009, पृष्ठ-43, 1/23
10. मालविकाग्निमित्रम्, महाकवि कालिदास प्रणीत, व्याख्याकार डॉ. रमाशंकर पाण्डेय, प्रकाशक-चौखम्बासुरभारती प्रकाशन वाराणसी 221001 संस्करण-2003, पृ. 45, 2/4



- शोधच्छात्र-साहित्यविभागः

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः),

लखनऊपरिसरः, लखनऊ


******

# ज्योतिषशास्त्रे अरिष्टविचारः

- शत्रुघ्नपाण्डेयः

ज्योतिषशास्त्रं नाम ग्रहनक्षत्रादीनां ज्योतिर्पिण्डानां सम्बन्धितं शास्त्रम्। एतच्छास्त्रानुसारेण ह्यस्मिन् अखिलब्रह्माण्डे संस्थितानां ज्योतिर्पिण्डानां गतिस्थित्यादीनां गणनाद्वारा किम्भूतं किम्भावि वेति ज्ञातुमायासो विधीयते।

वस्तुतः ज्योतिषशास्त्रस्य प्रथमप्रयोगोहि कालगणनायै एव कृतः इति वेदाङ्गज्योतिषे लगधाचार्यस्योल्लेखात् ज्ञायते तत्रोक्तं यथा-

**कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।**

**ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः**

**विप्राणां सम्मतं लोके यज्ञकालार्थसिद्धये।।**[1]

तत्र कः कालः कस्मिन् यज्ञे उपयुक्तः इति ज्ञातुं ज्यातिषशास्त्रस्य उद्भवो जातः। कालान्तरेण अस्मिन्नेव कालविधायकशास्त्रे महर्षीणां प्रवर्धितया जिज्ञासया, तद् विषयक-विविधक्षेत्रेषु कृतप्रयत्नेन अनुसन्धानेन च ज्यौतिषां नैकाः रहस्याः उद्घाटिताः। तत्र ज्योतिषसम्बन्धिविषयाणां वैविध्यत्वात् अध्ययनसौकर्यदृष्ट्या सिद्धान्तस्कन्धः संहितास्कन्धः होरास्कन्धश्चेतित्रिभागेषु विभक्तो वर्तते।

सिद्धान्तस्कन्धे अखिलब्रह्माण्डस्य स्थितिः, ब्रह्माण्डेऽस्मिन् विविधलोकानां तत्र तत्र स्थितानां विविधग्रहनक्षत्रादीनां ज्योतिर्पिण्डानां गतिस्थित्यादीनां गणनापद्धतिः विद्यते। अत्र ग्रहादीनां गणितभागस्य प्रयोगत्वात् अस्य स्कन्धस्य नाम गणितस्कन्धेति नाम सार्थकत्वं भजते।

संहितास्कन्धे विविधग्रहादिषु अकस्मादुत्पन्नानां विक्षोभादीनां भुवि प्रभावस्य अध्ययनक्रमः दत्तो वर्तते। अन्ये च ज्योतिषशास्त्राधारिताः विषयाः यथा वास्तुशास्त्रविषयाः पर्यावरणविज्ञानविषयाः संहितास्कन्धे वर्तते। सिद्धान्त-होरास्कन्धयोः वर्जिता सर्वे ज्योतिषशास्त्रसम्बन्धिताः विषयाः संहितास्कन्धे समाहिताः भवन्ति। तस्मादेव आचार्यवराहमिहिरेण संहितास्कन्धस्य परिभाषा तत्कार्स्योपनयस्य नाम मुनिभिर्सङ्कीर्त्यते'' संहिता इति दत्ता।

ज्योतिषशास्त्रस्य होरास्कन्धे ग्रहादीनां वैयक्तिकप्रभावो वर्णितोऽस्ति। प्रतिक्षणं संचरितानां ग्रहादीनां प्रभावो मनुष्ये कथं भवति इत्यस्याध्ययनमेव होरास्कन्धस्य विषयः। पूर्वजन्मसिद्धान्तानुयायिनां मतानुसारं मनुष्यः पूर्वजन्मनि फलस्वरूपेणैवास्मिन् जन्मनि शुभाशुभफलं भुङ्क्ते। होराशास्त्रेऽपि तथैव। मनुष्यः पूर्वजन्मनि कृतकर्मानुसारं जन्म प्राप्नोति ततः तथैव शुभाशुभफलं भुङ्क्ते तत्फलं ज्योतिषचक्षुषा द्रष्टुं (ज्ञातुं) शक्यते। वाराहमिहिरेण निर्दिष्टं यथा-

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तम्।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।**[2]

होराशास्त्रे जातकानां जन्मकालिकग्रहनक्षत्राणां स्थितिं ज्ञात्वा तस्य शुभत्वाशुभत्वं कालान्तरेण च आरोग्यानारोग्यं भूपतित्वं दरिद्रता दुष्टोदारेत्यादीनाम् स्वभावादीनामाकलनं कर्तुं विविधाः योगाः निरूपिताः सन्ति। तस्मिन् जन्मनि ग्रहादीनां विशेषदुर्योगेन अरिष्टयोगानामपि वर्णनं कृतं वर्तते।

**अरिष्टयोगः-**

नेष्टम् अनिष्टम् अरिष्टं वा। यस्मिन् योगे उत्पन्नजातकः सद्यः किञ्चित्कालानन्तर एव मृत्युं प्राप्नोति, स तस्मिन् जन्मनि तादृशो ग्रहसंयोगेव अरिष्टयोग इति नानाविद्वद्भिः उद्धृताः। यथा जन्मचक्रस्य षष्ठे-अष्टमे वा स्थिते शशिनि अरिष्टयोगो भवति। अस्मिन् उत्पन्नो जातकः न जीवति। उक्तञ्च-

**षष्ठाष्टरिष्टगश्चन्द्रः क्रूरैः खेटैश्च वीक्षितः।**
**जातस्य मृत्युदः सद्यस्त्वष्टवर्षैः शुभेक्षितः।।**[3]

अन्येपि बहवो तादृशाः अरिष्टयोगाः सन्ति यस्मिन् उत्पन्नो जातकः जीवने सुखं न प्राप्नोति। होराशास्त्रानुसारं जातकस्य जीवने विविधशुभाशुभफलविवेचनात्पूर्वम् अरिष्टयोगमवश्यं परीक्षणीयं भवति। यतोहि यदि कस्यचित् जातकस्य कुण्डल्यां ग्रहपरिस्थित्यनुसारं राजयोगाः स्युः अथवा अन्येऽपि योगाः परन्तु अरिष्टयोगकारणात् न जीवति चेत् अनन्तरं प्राप्यमाणानां अन्येषां योगानां फलं न भोक्तुं शक्नोति।

**ज्योतिर्विद्भिः पुरा सर्वैः कृतो निर्णय विस्तरः।**
**तत्वादि व्ययपर्यन्तं राशिचक्रे व्यवस्थितम्।।**[4]
**अपाश्यमरणं जीवं प्रणश्यन्ति शुभाशुभम्।**
**मरिष्यति यदा दैवात्कोभुङ्क्तेतच्छुभाशुभम्।।**[5]
**प्रयत्नेन आयुः स्थानं विचिन्तयेत्।**
**बालस्य जन्ममात्रेण जन्मारिष्टं विचारयेत्।।**[6]

वस्तुतः जातकशास्त्रे तु अरिष्टयोगानां प्रभावकालः चतुर्विंशतिवर्षं यावदिति निर्दिष्टमस्ति। अन्यतमे त्रिंशद्वर्षं। यथा-

**चतुर्विंशति वर्षाणि यावद् गच्छन्ति जन्मतः।**
**जन्मारिष्टं तु तावत् स्यादायुदायं न चिन्तयेत्।।**[7]
**चतुर्विंशति वर्षाणि यावद् गच्छन्ति जन्मतः।**
**तावद्रिष्टं च निश्चित्य आयुर्दायं न चिन्तयेत्।।**[8]

**नव नेत्राणि वर्षाणि यावद् गच्छन्ति जन्मतः।**
**तावद्रिष्टं विधातव्यं गुप्तरूपं न चान्यथा॥**[9]
**आद्वादशान्तरयोनिजन्मनां, आयुकलां निश्चयितुम् न शक्यते।**
**मात्रा च पित्रा कृतपापकर्मणा, बालग्रहै नाशमुपैति बालकः॥**[10]

**शोधपत्रस्य प्रासङ्गिकता-**

तस्मात् जातकशास्त्रे अरिष्टयोगज्ञानस्य महत्त्वपूर्णात्यावश्यकता च अनुभूयते। तथाऽपिप्राचीनकालतः आगता इयमवधारणा यत् एतेषु अरिष्टयोगेषूत्पन्नः जातकः म्रियते।

इति अद्यत्वे कियत् प्रासङ्गिकं भवति इति ज्ञानमावश्यकं भवति। यदा जीवनशक्तिवर्धकानामौषधानां प्रयोगः गर्भकालतः समये समये दीयते। उच्चचिकित्सालयः अपि सर्वत्र विद्यते। सुविधासम्पन्नेषु चिकित्सालयेषु गर्भिण्याः गर्भस्य च सम्यक् उपचारव्यवस्थादिकमस्ति तदपि किं पूर्वजन्मफलानुसारं जातकः अरिष्टयोगोत्पन्ने सति म्रियते वा इति जिज्ञासा मादृशानामपि स्यात्। अतः ''ज्योतिषशास्त्रोक्त अरिष्टयोगः'' जिज्ञासा मद्दृष्ट्योपयुक्ता एव।

पुनश्च सर्वेषां कार्याणां कारणं भवति। तथा प्रत्येकं कष्टस्य अपराधस्य च निवारणविधिः भवति इति दृष्ट्या यदि अरिष्टयोगोत्पन्नस्य जातकस्य मरणे विकृतौ वा तस्य कारणभूतस्य ग्रहस्य शान्त्यादिकर्मणा यदि अरिष्टयोगस्य शमनं भवेत् तर्हि लाभ एव। अतः तद्दृष्ट्यापि एतस्य शोधपत्रस्य उपयुक्तता दृश्यते।

**सन्दर्भसंकेतः-**

1. वेदाङ्गज्योतिषम् 2. लघुजातकम् 1.3 3. बृहत्पाराशरहोराशास्त्रम-10.3 4. पञ्चस्वरा 1/6
5. पञ्चस्वरा 1/7 6. पञ्चस्वरा 1/8 7. बृहत्पाराशर होराशास्त्रम्-10.2 8. पञ्चस्वरा-1.9
9. पञ्चस्वरा-1.10 10. जातकपारिजातः।

**सन्दर्भग्रन्थसूची-**

1.वेदाङ्गज्योतिषम् 2. बृहत्पाराशरहोराशास्त्रम् 3. लघुजातकम् 4. शब्दकल्पद्रुमः
5. पञ्चस्वरा 6. भारतीयज्योतिष 7. जातकपारिजातः

- शोधच्छात्र-ज्योतिषविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः),
लखनऊपरिसरः, लखनऊ

******

# द्वैतदर्शनसिद्धान्तः

-रामप्रवेशत्रिपाठी

द्वैतमतावलम्बि श्री मध्वाचार्यमते जीवस्तु सर्वथैव सदैव चास्ति। तस्माज्जगन्नियन्तुर्जगदीश्वरतो भिन्नः। जीवस्याल्पज्ञत्वधर्मावच्छिन्नत्त्वेन परमेश्वरस्य च सर्वज्ञत्वधर्मत्त्वावच्छिन्नत्वेन भेदस्तयोः सुस्पष्ट एवेति। **'जीवो ब्रह्मैव नापरः'**[1] इति शाङ्करवेदान्तसिद्धान्तानुसारं नास्त्यनयोर्जीवात्मपरमात्मनोस्तादात्म्यं प्रागुक्तविभिन्नधर्मावच्छिन्नत्त्वदर्शनात्। श्रुतेस्तु सार्थक्यं **'पुरोहितोऽयं राजा संवृत्त'**[2] इतिवद्विधेयमिति न कश्चिद्दोषः। अनयोः श्रीमध्वाचार्यः सेव्यसेवकभावसम्बद्धमङ्गीकरोति, आहोस्वित् पूज्यपूजकभावसम्बन्धं स्वीकरोति अथवा दास्यदासकभावसम्बन्धोऽपि भवितुमर्हति। कदाचित्तुल्यवित्तिवेद्यन्यायेन वक्तुं शक्यतेऽतो नहि कदापि तयोस्तादात्म्यं स्यात्। श्रीमध्वाचार्यमते सेव्यतावच्छेदककुक्षिनिक्षिप्तः पूज्यतावच्छेदककुक्षिनिक्षिप्तो वा चास्ति श्रीविष्णुरेव। स च भगवान्विष्णु सर्वथा लक्ष्मीयुक्तः। मध्वमते पञ्चवास्तविकभेदाः स्वीक्रियन्ते- (1) ईश्वरजीवभेदः (2) ईश्वरजडभेदः (3) जीवजडभेदः (4) एकजीवस्यापर जीवभेदः (5) जडपदार्थस्यापरजडपदार्थभेदः। सम्प्रदायानुसारमेतेषां पञ्चविधभेदानां परिणामो मुक्त्यर्थं साधको भवति। दर्शनस्यास्य प्रमेयपरिचयाय माध्वपदार्थमीमांसाज्ञानमपेक्षितं भवति। मध्वमते द्रव्यगुणकर्म-सामान्यविशेषविशिष्टांशीशक्तिसादृश्याभावाश्चेति दशपदार्थाः भवन्ति। एतेषु कतिपयपदार्थाः वैशेषिक-सम्मतपदार्थेभ्यो भिन्ना न सन्ति। अन्य पदार्थेषु च वैशिष्ट्यं लक्ष्यते। सर्वप्रथमं द्रव्याण्येव विंशतिधा स्वीकृतानि सन्ति परमात्मा, लक्ष्मीः जीवः, अव्याकृत-आकाश-प्रकृति-गुणत्रयं, महत्ततत्त्वं, अहङ्कारः बुद्धिः-मनः-इन्द्रियमात्रा, भूत-ब्रह्माण्ड-अविद्या-वर्ण-अन्धकार-वासना-काल-प्रतिबिम्बाश्च। आदितः द्रव्यत्रयं दार्शनिकदृष्ट्या विशेषमहत्त्वपूर्णानि सन्ति।

**गुणाः**- वैशेषिकगुणातिरिक्तशम-दम-कृपा-तितिक्षा-सौन्दर्यादीनां गणना पदार्थस्यास्यान्तर्गतं स्वीक्रियते।

**कर्म**- विहितनिषिद्धोदासीनभेदात् त्रिविधकर्माणि भवन्ति। उदासीनकर्मान्तर्गतं वैशेषिकसम्मत-पञ्चविधकर्मगणना भवति। विहितनिषिद्धकर्मसम्बन्धः- आचारशास्त्रतो वर्तते। सामान्य-सादृश्य एवमभाव-कल्पनायां किञ्चन नवीनत्त्वं नास्ति। भेदाभावेऽपि भेदव्यवहारस्य निर्वाहकपदार्थविशेषो मन्यते। यो जगतः सर्वपदार्थेषु स्थितः स एव परमेश्वरः इति स्वीक्रियते। परमेश्वरस्य शक्तिचतुष्टयं स्वीक्रियते।

(1) अचिन्त्यशक्तिः (2) आधेयशक्तिः (3) सहजशक्तिः (4) पदशक्तिश्च।

**परमात्मा**- अनन्तगुणसम्पन्नः परमात्मा लक्ष्म्यादीनामपेक्षा परमात्मज्ञानमनन्तगुणाधिको वर्तते। एतेषु श्रुताश्रुतविरुद्धा एते गुणा नित्यं वर्तमानं वर्तन्ते। अस्य ज्ञानं महाशुद्धं चितिस्वरूपं समस्तविशेषाणां स्पष्टरूपेण दर्शनात्मकं नित्यं सूर्यप्रभा इव निरन्तरं वस्तुमात्रप्रकाशकमभिमानादिदोषरहितं तथा सदैव

विकारहीनं वर्तते।[3] सृष्टिः, स्थितिः, संहारः नियमः अज्ञानं-बोधनं-बन्धः मोक्षश्चैतानि कार्याणि परमात्मा निरन्तरं करोति। अपरो कश्चिदपि एतानि नैव, कर्तुमर्हति। अत एव परमात्मा 'एकराट्' इत्युच्यते। सर्वज्ञेनैव एतानि कार्याणि कर्तुं शक्यन्ते। अतः स सर्वज्ञोऽस्ति।[4] प्रकृत्यादि-जडपदार्थाः ब्रह्मादयो जीवास्तथ महालक्ष्मीप्रभृतिभ्यः सर्वेभ्योऽयमत्यन्तभिन्नोऽस्ति। शरीरं विना परमात्माऽपि सृष्ट्यादि कार्याणि नैवकर्तुमर्हति, अतः परमात्मनोऽपि शरीरमस्ति। शरीरमिदं नित्यं, ज्ञानात्मकम् आनन्दात्मकम-प्राकृतिकञ्च वर्तते। अस्य प्रत्येकमङ्गानि आनन्दमयानि चितिस्वरूपाणि च सन्ति। अयं सर्वस्वतन्त्र एकश्चैवास्ति। प्रतिजीवं परमात्मा परिपूर्णरूपेण वर्तमानोऽस्ति। भगवतः स्वस्वरूपं तथाविर्भूतरूपं कैश्चिदपि देशकालगुणैश्च परिच्छिन्नो नास्ति।

सृष्टिः-प्रलयः-नियमनं-ज्ञानमज्ञानं-जीवबन्धनमर्थादिश्वरेच्छा-अविद्या-कामकर्म-लिङ्गशरीरं-त्रिगुणात्मकं-मन-स्थूलशरीरं तथा मोक्ष एते परमात्मनोऽधीनास्सन्ति।[5] मुक्तजीवः स्वेच्छया शुद्धसत्त्वमयशरीरं धृत्वा तेन यथेष्टं भोगानुभवं कृत्त्वा पुनः स्वेच्छया तत् त्यजति। शरीरेऽस्मिन्नजोगुणस्य तथा तमोगुणस्य चाभावत् तस्मिन् शरीरधारणजन्यबन्धनं न भवति। अयमेव 'लीलाविग्रहः' उच्यते। तथापीदं 'प्राकृत-शरीरम्' एवास्ति।[6]

**लक्ष्मी**- इयं परमात्मना भिन्ना किन्तु केवलं तस्याधीना वर्तते। ब्रह्मादिनो जीवाः लक्ष्मीपुत्राः सन्ति, प्रलयकाले चैते लक्ष्म्यामेव लीना भवन्ति। परमात्मकृपया बलवती लक्ष्मीः क्षणमात्रेणैव विश्वोत्पत्ति-स्थिति-लयः-महाविभूतिः-वृत्तिप्रकाशः-नियमावृत्तिः-बन्धनं-मोक्षं च सम्पादयति। हिरण्यगर्भादि जीवानामपेक्षया भगवत्प्रीतौ भक्त्यां ज्ञाने च लक्ष्मीः कोटिगुणाधिकास्ति। परमात्मा इव लक्ष्मीरपि नित्यमुक्ताप्तकामश्चास्ति। एवं सन्नपि इयं विष्णोः सदैव उपासनां करोति। लक्ष्मीविष्णवोः सम्बन्धः अनादिर्वर्तते। अतः युगलमिदमनादिनित्यम्, अनादियुक्तम्, अनादिमुक्तञ्चास्ति। अत एव एतयोः परस्परसंयोगेन सुखाभिव्यक्तिर्नैव भवितुमर्हति। तथापि एतयोः पतिपत्न्योः सम्बन्धस्वीकारे कारणमस्ति यत् भगवान् 'आत्मरमणः' सन्नपि लक्ष्मीं प्रत्यनुग्रहपूर्वकं लक्ष्म्यां स्वस्त्रीरूपे प्रविश्य पररूपे क्रीडति अर्थात् लक्ष्म्यां वर्तमानस्वरूपेण सह भगवान् क्रीडति। लक्ष्मीरपि चिद्रूपा अनन्ता चास्ति।

**जीवः**- अज्ञान-मोह-दुःखादिदोषयुक्तः संसारशीलश्च भवति। असौ प्राधान्येन त्रिप्रकारको भवति। येषु नित्यसंसारी तथा तमोयोग्यस्तु मुक्त्यधिकारी न भवतः। मुक्त्यधिकारी मुक्तियोग्यजीवाः भवन्ति। प्रत्येकजीवाः स्ववैशिष्ट्यं पृथक् स्थापयन्ति। ते अन्य जीवेभ्यः पृथग्भवन्ति। सर्वज्ञपरमात्मनस्तु सुतरां भिन्ना भवन्ति। जीवानामयं भेदः मुक्तावस्थायामपि विद्यमानं भवति। मुक्तपुरुषाः आनन्दमनुभवन्ति, परन्तु तेषामानन्दानुभूतमपि परस्परं तारतम्यं भवति- अयं मध्वाचार्यस्य विशिष्टमतमस्ति-

**मुक्ताः प्राप्य परं विष्णुं तद्देहं संश्रिता अपि।**
**तारतम्येन तिष्ठन्ति गुणैरानन्दपूर्वकैः॥**[7]
**दुःखाभावः परानन्दो लिङ्गभेदः समा मता।**

**तथापि परमानन्दो ज्ञानभेदात्तु भिधते।।**[8]

मध्वमते जगदुत्पत्यर्थं परमात्मा केवलं निमित्तकारणं भवति। उपादानकारणं तु प्रकृतिर्भवति। अयं विशिष्टसिद्धान्तोऽन्यवैष्णवमतेभ्य: पार्थक्यं सूचयति, परन्तु शुद्धसत्त्वस्य सत्तायां स्वीकृतायां सत्यां मध्वमतमन्यवैष्णवमतेभ्यो पश्चात्पदं नैवास्त। लक्ष्मीर्भगवता सह प्राय: समाना वर्तते। द्वावेव नित्यमुक्तौ अजन्मानौ देशत: कालतश्च समव्यापकौ स्त:।

**द्वावेव नित्यमुक्तौ तु, परमः प्रकृतिस्तथा।**

**देशतः कालतश्चैव, समव्याप्तावुभावजौ।।**[9]

जीवा: मोक्षाय भगवदाधीना भवन्ति। भगवतोनैसर्गिकानुग्रहाद्विना परतन्त्रजीवा: साधारणकर्मणामपि सम्पादनं नैवकर्तुमर्हन्ति, मोक्षस्तु दूरेऽस्ति। अपरोक्षज्ञानं परमाभक्ति:, परममनुग्रह: मोक्षादयसाधनस्येयं शृङ्खला वर्तते मध्वमते।

**सन्दर्भ-संकेत:**

1. दर्शनशास्त्रस्येतिहास: पृ. 68
2. द्रष्टव्य भारतीयदर्शन (आचार्यबलदेवोपाध्याय नीवनसंस्करण पृ. 404)
3. माध्वसिद्धान्तसार: पृ.सं.-23 (क)
4. माध्यसिद्धान्तसार: पृ.सं. 24 (2)
5. पदार्थसंग्रह, पृ. 147 (ख)
6. श्रीसम्प्रदायानुसारं शुद्धसत्त्वमयलीलाविग्रह: 'अप्राकृत' देह: अस्ति।
7. श्रीमद्‌भगवद्‌गीता-माध्वभाष्यम्
8. माध्वसिद्धान्तसार:
9. श्रीमद्‌भागवततात्पर्यनिर्णय:।

- शोधच्छात्र:-साहित्यविभाग:
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालय:),
लखनऊपरिसर:, लखनऊ

******

# शब्दतत्त्वसमासशक्त्योर्विवेचनम्

– अंकुशकुमारः

**समग्रशास्त्रसद्धाम वाङ्मलानां चिकित्सकम्।**
**प्रार्थये वाङ्मयज्योतिः शब्दब्रह्म सनातनम्॥**
**सकलशब्दमयी किल ते तनुः**
**यो वेद वेदवदनं सदनं हि सम्यग्**
**ब्रह्मम्या सवेदमपि वेद किमन्यशास्त्रम्।**
**यस्मादतः प्रथममेतदधीत्य विद्वान्**
**शास्त्रान्तरस्य भवति श्रवणेऽधिकारी॥**

इत्यादि महत्या श्रुत्या शब्दशास्त्रस्य किम्महत्त्वपूर्णं स्थानम्? कीदृशश्च कथमुपयोगः शास्त्रव्यवहारे? समग्रशास्त्रार्थसन्धारणतयोपकारकत्वञ्चान्यतमं महत्त्वमादधति शास्त्रज्ञाः। अस्य शब्दानुशासनस्य शास्त्रोपकारकतया कथं विधो विमर्शः प्रस्तोतव्य इति। शब्दप्रयोगस्यार्थावबोधमात्रफलकतया तस्य श्रोत्रेन्द्रियेणान्तरमुपपन्नतया तद्विचारः– काकदन्तपरीक्षेव निष्फलताम्भजते। अत एव ही भामतीकारेण श्रीवाचस्पतिमिश्रेण प्रोक्तमपि साधु– **''यदसन्दिग्धप्रयोजनञ्च न तत्प्रेक्षावत् प्रतिपित्सागोचरः''** इति। तथा चात्र संशयप्रयोजनयोरभावात् तद्विचारो भवितुं नार्हतीति सत्यम्। यद्यपि असन्दिग्धं निष्प्रयोजनञ्च वस्तु न जिज्ञास्यम्, तथापि सामान्यतया ज्ञातेऽपि विषये विशेष रूपेणाज्ञातं विशेषविषयिणी जिज्ञासां को निवारयितुमीशः– समर्थः। यथा मन्दान्धकारे उच्चैतस्तरत्वेन रूपेण सामान्यतया ज्ञातेऽपि पदार्थे स्थाणुर्वा पुरुषो वेति विशेषरूपेणावगन्तुं प्रयत्नः प्रवर्तते। तथा सति तद्धर्मावच्छिन्नविषयकं ज्ञानं तद्धर्मावच्छिन्नविषयिणीं जिज्ञासामुपशमयति, न त्वन्यविधां जिज्ञासाम्। अन्यथा प्रमेयत्वेन ज्ञाते सर्वस्मिन् पदार्थे विशेषजिज्ञासानुदयात् सर्वेषां शास्त्राणामनारम्भः सर्वेषाञ्च सार्वज्ञयं प्रसज्येत।

**''प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा शब्दं कुरु, शब्दं मा कार्षीः, शब्दे कार्यं माणवकः, इति ध्वनिं कुर्वन्नेवमुच्यते''**[1] इति महाभाष्ये पस्पशाह्निके प्रोक्तम्। **''तपरस्तत्कालस्य''** इति सूत्रे तु **''स्फोटः शब्दः ध्वनिः शब्दगुण''**[3] इति उक्तम्। तदभिप्रायस्तु ध्वनिः शब्दोपकारको व्यञ्जकतया न स्वयं शब्द इति। एवं रूपेण विरुद्धार्थप्रतिपादनेन विप्रतिपत्तिमूलकः संशयो निराबाधस्सम्यक् तिष्ठत्येव।

अथ च **''एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः शास्त्रान्वितः स्वर्गे लोके च कामधुग् भवति''**[4] इति भाष्यवचनेन अपि सः स्फोटात्मको हि शब्दो ज्ञातव्यो विमृष्टव्यश्चेति, अत

आपामरसहृदयहृदयानुकारि प्रथिताचारचर्चा चर्च्यते। तद्यथा- व्यवहारस्तावद् द्विविध: प्रवर्तते लौकिक: शास्त्रीयश्च। उभयविधोऽपि व्यवहार: शब्दमन्तराऽशक्य एव अतश्शब्दाधीनो व्यवहार: सुनिश्चित एव। यद्यपि मूकानां बधिराणाञ्च सकलोऽपि व्यवहार: शब्दं विनाऽपि शब्दार्थबोधमन्तरापि प्रचलति, नात्र संशयलेश:, तथापि तेषामपि त्यक्तवाचामुच्चारणाभावेऽपि शब्दार्थाग्रहेऽपि सूक्ष्म वाय्वभिघातजन्याभिमतोपांशु अव्यक्तशब्दसत्वात्, स्वनिष्ठसंस्कारसमवायित्वाच्च तत्रापि शब्दाधीन एव व्यवहार: प्रवर्तमान: सङ्गच्छते। एवञ्च सकलव्यवहारसाधक: श्रोत्रेन्द्रियग्राह्यत्वसमानाधिकरणगुणत्वविशिष्टो हि शब्दो भवति। स शब्दो द्विविधो वर्णात्मको ध्वन्यात्मकश्च। संस्कृतभाषादिरूपो वर्णात्मक:, भेरीमृदङ्गादिजन्यो ध्वन्यात्मक: इति।

शब्दस्य नित्यत्वं शाब्दिकैरङ्गीक्रियते मीमांसकैश्चापि, अनित्य इति नैयायिकादय:। तत्र नैयायिकास्तु घटमानयेत्यादिवाक्योच्चारणकाले ये घकारादयो वर्णा: कण्ठादिस्थानेषु वायुसंयोगेनोत्पद्यन्ते ये च श्रवणेन्द्रियविषयतामापद्यन्ते त एव शब्दा:, तल्लक्षण एव च शब्द: कम्बुग्रीवापृथुबुध्नादिमत: पदार्थस्य प्रत्यायको न ततो वर्णात्मनो व्यतिरिक्त: कश्चिदस्ति। अथवा शब्दोऽनित्य: कारणबलात्, संयोगविभागजन्यत्वादिन्द्रियजन्यप्रत्यक्षविषयत्वाच्च। तथानुमानप्रयोग इत्थमपि शब्दोऽनित्यो बहिरिन्द्रयग्राहय:, प्रत्यक्षविषयत्वाद् रूपादिवत्। वैयाकरणास्तु य उच्चरित: संश्रयते नासौ शब्द:। स तु वर्णजन्यो ध्वनि: ध्वनिश्चानर्थकोऽनित्य:। उत्पन्नप्रध्वंसित्वात्। यश्च वर्णाभिव्यङ्ग्यो वर्णव्यतिरिक्त:- स्फोटाख्यो नित्योर्थस्तस्य तस्य पदार्थस्य प्रत्यायक: स शब्द इति प्रतिपन्न:। अतोऽत्र वैयाकरणानां प्रक्रियाक्रम: अत्र नित्यत्वादिनां वैयाकरणानां शबदनित्यत्वसाधनप्रक्रिया प्रथमं सामान्यतयैवोच्यते। यथा ते स्फोटवादिन: शाब्दिका: शब्दानित्यत्ववादिनां नैयायिकानां मतेऽनन्तवर्णकल्पनं तद्द्वारा तद्ध्वसप्रागभावादिकल्पनम्, पदादीनां बोधकत्वसिद्धये तत्प्रयोजकस्मृतिस्वीकारे च महद्गौरवमाशङ्कन्ते। स्फुट्यते ध्वनिभिरभिव्यज्यते स्फुरति वाऽस्मादर्थ इत्युभयथा स्फोटशब्दं निराहु:। तथाचोक्तं भगवता पस्पशाह्निके- (**येनोच्चारितेन सास्नालाङ्गूलककुद्खुरविषाणिनां सम्प्रत्ययो भवति स: शब्द इति।**[5]) ननु स्फोटस्यार्थप्रत्यायकत्वं न घटते। स्फोटो ह्यभिव्यक्त: सन्नर्थं प्रत्याययतीति तेऽभिमतम्। तत्रेदं भवाञ्शब्दवित्तम: प्रष्टव्य: किं वर्णा: प्रत्येकमभिव्यञ्जयन्ति संभूय वा। पक्षद्वयोपि वर्णानां वाचकत्वे भवता ये दोषा: विभाविस्तास्ते स्फोटभिव्यञ्जकत्वेऽपि प्रतिविधातव्या:। तदुक्तं भट्टाचार्यैमीमांसाश्लोकवार्तिके-

**यस्यानवयव: स्फोटो व्यज्यते वर्णबुद्धिभि:।**
**सोऽपि पर्यनुयोगेन नैकेनापि विमुच्यते।।**[6] इति।

तस्मात् स्फोटाभिव्यक्तिपक्षो नितरामञ्चति घटाग्। यच्चास्मत्पक्षे आशङ्कितं वर्णेषु समूहासंभवात्पदत्वबुद्धिर्नोत्पत्तुमर्हतीति तत्रोच्यते गौतमेन तावत् ते विभक्त्यन्ता: पदमिति वर्णेष्वेव पदसंज्ञा विहिता।

नैयायिका: शब्दस्य अनित्यताविषये ब्रुवते यत् प्रथमक्षणे वर्ण उत्पद्यते, द्वितीयक्षणे तिष्ठति, तृतीयक्षणे पूर्ववर्णो नश्यति, द्वितीयो वर्णस्तिष्ठति, तत्रैव वर्णान्तरमुत्पद्यते, द्वितीयश्च नाशमुपैति।

तत्रेदमाशङ्क्यते यदेवविधस्य शब्दस्यानित्यस्य श्रवणेनिद्रयेण प्रत्यक्षत्व कथं भवति? यतो भेर्यादिदेश शब्दो जायते, श्रोत्रं तु पुरुषदेशेऽस्ति, तदुपरि समाधानमिदमुच्यते तैर्यद् भेरीदेशे जातः शब्दो 'वाचितरङ्गन्यायेन, कदम्बमुकुलन्यायेन' वा सन्निहितं शब्दान्तरमारभते, स च शब्दः शब्दान्तरमिति क्रमेण श्रोत्रदेशे जातः।

अन्त्यः शब्दः श्रोत्रेण गृह्यते, नाद्यो न वा मध्यमः। भेरीशब्दो मया श्रुत इति मतिस्तु भ्रान्तिरेव। तथाहि-

शब्दोऽनित्यः, सामान्यत्वे सति अस्मदादिबाह्येन्द्रियग्राह्यत्वात् पटवत्। यथा घटो मठो वा घटत्वजातिमान्, मठत्वजातिमान् बाह्येन्द्रियेण चक्षुषा गृह्यते, तस्मादनित्यः, तथैव शब्दोऽपि शब्दत्वजातिमान् बाह्येन्द्रियेण गृह्यते, अतः सोऽप्यनित्य इति तार्किकाः प्रतिपादयन्ति। न्यायमूलानुगामिनो वैशेषिकास्तु शब्दस्य अनित्यत्वमित्त्थं समर्थयन्ति यद् गुणस्य सतोऽपवर्गकर्मभिः साधर्म्यम्, सतो नित्यस्य शब्दस्य लिङ्गाभावात् शब्दनित्यत्वसाधकप्रमाणाभावादनित्यत्वम्। यत्त्वसौ नोपपद्यते, तदैतस्य सत्त्वे न किञ्चिदपि प्रमाणमस्ति। तस्मादेव शब्दोऽनित्योऽनेकश्चेति वैशेज्ञिका मीमांसका वेदान्तिनः सांख्या योगिनश्च शब्दानां नित्यत्वं स्वीकुर्वन्ति। गौरित्यत्र वर्णा एव शब्दास्तेषामेवार्थेन शक्तिरूपः सम्बन्धः। न च स्फोटात्मक शब्दः, कुतः? वर्णत्रयातिरिक्तस्य बुद्धवप्रतिभासमानत्वेन तदभावात्। अर्थप्रतीतिरूपकार्येण स्फोटस्य सिद्धिर्नार्हति, कथम् इति चेत्, अन्योन्याश्रयदोषप्रसङ्गात्। अन्योन्याश्रयाणि न भवन्ति, न नौर्नाविकद्वारा इतरत्राणाय कल्पते। यतः स्फोट रूपकारणसिद्धौ अर्थप्रतीतिरूपकार्यसिद्धिः। अर्थप्रतीतिरूप-कार्यसिद्धौ स्फोटावगतिरित्यन्योन्याश्रयः सुव्यक्त एव। तस्मान्नास्ति स्फोटाख्यः कश्चन वर्णातिरिक्तोऽन्यपदार्थ इति मीमांसकाः स्वीकुर्वन्ति।

समसनम् इति, समम् आस इति वा 'समास' पदस्य व्युत्पत्तिः। 'सम' शब्दस्य 'आस' शब्देन समासे जाते निष्पन्नः 'समास' शब्दो योगरूढः, प्रकृतिप्रत्ययो समम् आसे सत्यपि तत्र समासत्वाभावात्। समासत्वञ्च पाणिन्यादिसङ्केतसम्वन्धेन समासपदवत्त्वम्। इदञ्च लक्षणं व्याकरणशास्त्रविषयकमेव। अतोऽनयत्रास्य विपरीतार्थकत्वेऽपि न क्षतिः। अत एव चेदं पारिभाषिकपदमित्यपि वक्तुं शक्यते। अथ-अर्थबोधफलकविभक्त्यव्यवहितपूर्ववर्तित्वप्रकारकज्ञानाविषयपूर्व पूर्वपदघटितनामसमुदायत्वं समासत्वम्। समासत्वं च समासपदशक्यतावच्छेदकतया सिद्धं जातिविशेषरूपं, कारणतावच्छेदकतयेव शक्यता-वच्छेदकतयाऽपि जातिसिद्धेः स्वीकृतत्वात्। समासपदसङ्केतश्च न "**प्राक्कडारात्समासः**"[7] इत्येवं विधोऽपि तु घटादिपदसङ्केत इव अशेषसमासात्मक लक्ष्यसङ्ग्रहको विलक्षणं एव।

समासः षडविध इति कौण्डभट्टप्रभृतिप्राचीना वैयाकरणाः। तदुक्तम्-

**सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां[8] तिङा।**

**सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः॥**

सुपां सुपा-पदद्वयमपि सुबन्तम्- 'राजपुरुषः' इत्यादि। सुपां तिङा पूर्वपदं सुबन्तम् उत्तरपदं तिङन्तम्- यथा 'पर्य्यभूषयत्' अनुव्यचलत्। "**गतिमतोदात्तवता तिङाऽपि[9] समासः**" इति वार्तिकात्समासः। स च "**गतिकारकोपपदानां कृद्भि[10] सह समासवचनं प्राक् सुबुत्पतेः**" इति

परिभाषया भवति सुबुत्पत्तेः प्राक्, अत्रोत्तरपदे सुबुत्पत्तेः प्रागित्यर्थात्। अन्यथा- चर्मक्रीती इत्यादौ नलोपानापत्तेः। सुपां धातुना-उत्तरपदं धातुमात्रम्, न तिङन्तम् यथा 'कटप्रूः' 'आयतस्तूः'' '**क्विब्वचिप्रच्छ्यायतस्तु कटप्रजुश्रीणां दीर्घश्च**[11]'' इति वार्तिकात्।

तिङां तिङा - 'पिबतखादता' 'पचतभृज्जता' इत्यादि ''**आख्यातमाख्यातेन**[12] **क्रियासातत्ये**'' इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्। तिङा सुबन्तेन-पूर्वपदं तिङन्तमुत्तरं सुबन्तम्-जहिस्तम्बः', **जहिकर्मणा**[13] **बहुलमाभीक्ष्ण्ये कर्तारञ्चाभिदधाति**' इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्। स्पष्टञ्चेदं- '**सह**[14]**सुपा**' इति सूत्रे भाष्ये इति भाष्ये शब्दकौस्तुभादिषु च। स्वयं भाष्यादिसिद्धम्, समासभेदं व्युत्पाद्य प्राचीनवैयाकरणोक्त-विभागस्याव्यात्यादिभिः प्रायिकनिरूप्यते।

तदुक्तम् - **समासस्तु चतुर्द्धेति प्रायोवादस्तथापरः।**
**योऽयं पूर्वपदार्थादि प्राधान्यविषयः स च॥**
**भौतपूर्व्यात् सोऽपि रेखागवयवदास्थितः॥**[15]

विशेषसंज्ञारहितविशेषसंज्ञासहित भेदेन समासस्य द्वैविध्येऽपि विशेषसंज्ञायुक्तस्य अव्ययीभाव-तत्पुरुषबहुव्रीहिद्वन्द्वभेदेन चतुर्विधत्वमपि। तदेवं समासस्य पञ्चविधत्वं ज्ञेयम्। पूर्वपदार्थप्रधानकत्वोत्तरपदार्थ-प्रधानकत्वान्यपदार्थप्रधानकत्वोभयपदार्थप्रधानकत्वस्वरूपधर्मचतुष्टयेन नास्ति क्रमतोऽव्ययीभावादिलक्षणम्, अपितु समासविभाजकतावच्छेदकधर्ममात्रं तत्। अव्ययीभावादिसमान्यलक्षणं तु अव्ययीभावादि तत्तदधिकारान्तर्गविध्यनुशिष्टत्वमेवाभिप्रेतम्। पूर्वपदार्थपेधानोऽव्ययीभावः' इत्याद्युक्तिस्तु प्राचुर्यस्य बोधनाय। संज्ञाकरणस्य लघ्वर्थतवात्- 'अव्ययीभवे'ति महत्याः संज्ञायाः करणं संज्ञाया अन्वर्थतासूचकम्। अन्वयर्थता च यत्राव्ययात्मकं पूर्वपदम् उत्तरपदं वा, अनव्ययं वा, तथोत्तरपदम प्रविश्य अनव्ययं स्वघटितसमुदायम् अव्ययतामापादयति असौ समासविशेषणात्मकः समुदायविशेषोऽव्ययीभाव इति। मुख्यमुदाहरणम् 'अधिहरि' इत्यादि।

त्रिभिर्धर्मैरत्यायीभावस्य भेदत्रयं कर्तुं शक्यम्। अधिहरि सूपप्रति, उन्मत्तगङ्गम् एते प्रयोगाः अव्ययीभवभेदत्रयोदाहरणानि। अव्ययीभावसामान्यलक्षणं तु पूर्वपदार्थप्रधानकतद्व्यक्तिवृत्तिसमाससंज्ञा-व्याप्यसंज्ञावत्वमेव। एवमेव कृष्णाश्रितः, पीताम्वरः, शिवकेशवावित्यादिषु क्रमतस्तत्पुरुषवहुव्रीहिद्वन्द्वानां मुख्यतमोदाहरणव्यक्तिमादायोत्तरपदार्थप्रधानकादि-तत्तदव्यक्तिवृत्ति-समास संज्ञाव्याप्यसंज्ञावत्त्वम्, तत्पुरुषदेर्लक्षणतया ज्ञेयम्। 'तत्पुरुष' इति महतीयं सञ्ज्ञापि अन्वर्थसूचिकेव। अन्वर्थता च उत्तरपदार्थ-प्रधानके एव। तत्पुरुषसमासे-स चासौ पुरुषः तत्पुरुषः, तस्य पुरुषस्तत्पुरुषः- इत्युभयथापि उत्तरपदार्थ-प्रधानतैवायाति।

स च तत्पुरुषसमासो व्यधिकरणसमानाधिकरणभेदेन द्विविधः। विजातीयविभक्तिकानेक-पदकतत्पुरुषसमासो 'राजपुरुष' इत्यादिरूपो व्यधिकरणतत्पुरुषः। सजातीयविभक्तिकानेकपदको नीलोत्पलमित्यादिरूपः समानाधिकरणतत्पुरुषः। अयमेव समानाधिकरणतत्पुरुष **तत्पुरुष समानाधिकरणः कर्मधारयः**[16]'' इत्यादिपाणिनिसूत्रेण ''कर्मधारय'' नाम्ना व्यपदिश्यते। 'कर्मधारय' इति समस्तम् एकं

पदम्, समासश्च तत्र 'कर्म' 'धारय' इत्यनयोः पदयोः। समानाधिकरणतत्पुरुष एव कर्मधारयः, नीलोत्पलादिवत्। 'कर्मधारय' घटकं 'कर्म' पदं सामान्येन क्रियाकर्मणोर्बोकम् 'धारय' इति तु ण्यन्ताद् 'धरि' इत्यस्मा् ''**अनुपसर्गाल्लिम्पविन्दधारिपारिणेद्युदेजिचेतिसाति साहिभ्यश्च**'' इति सूत्रेण कर्मणि 'श' प्रत्ययेन निष्पद्यते ततश्च पूर्वोत्तरपदोपस्थितयोः सामान्यक्रियाकर्मधारणाक्रिया- कर्मणोरभेदो युक्त एव। नीलोत्पलादिरूपस्य समानाधिकरणतत्पुरुषात्मक 'कर्मधारय' पदवाच्यस्यार्थस्य 'कर्मधारय' इति संज्ञाकर्तृकक्रियाकर्मत्वाद्धारयार्थधारणक्रियाकर्मत्वाच्चान्वर्थत्वोपपत्तिः।

बहुव्रीहिघटक 'बहु' शब्दो बहुत्वसंख्यावत् सङ्ख्येयार्थकः 'व्रीहि' शब्दश्च धान्यविशेषार्थकः। बहवो व्रीहयो यस्येति व्युत्पत्तौ बहुव्रीहिसमासेन नित्पन्नो- 'बहुव्रीहि' शब्दोऽप्यन्वर्थकतया अन्यपदार्थ-प्रधानबोधको योगरूढ एव। स च बहुव्रीहिः समानाधिकरण व्याधिकरणभेदेन द्विविधः। सजातीयविभक्त्यन्त-पदावयवको बहुव्रीहिः समानाधिकरणः, यथा 'लम्बकर्णमानये'त्यादौ। विजातीयविभक्त्यन्तपदावयवको बहुव्रीहि र्व्यधिकरणः, यथा कण्ठेकालः इत्यादौ। एतयोरपि तद्गुणसंविज्ञानातद्गुणसंविज्ञानभेदेन द्विविधः भेदः। बहुव्रीहयर्थस्य अन्यपदार्थस्य विशेषणानि यत्र विधेयान्वयीनि भवन्ति स एव तद्गुण सविज्ञानः, यथा ''**सर्वादीनि सर्वनामानि**[17]'' इत्यत्र सर्वादीनि इति पीताम्बरमानय इत्यादीनि वा। तद्गुणविपरीतो-ऽतद्गुणसंविज्ञानः, तथा लम्बकर्ण भोजय चित्रगुमानयेत्यादीनि। यदधिकरणबहुव्रीहिरयं ''**सप्तमीविशेषणे बहुव्रीहौ**[18]'' इत्येतद् ज्ञापकादेव सिद्धो, न सार्वत्रिकः, नापि- 'कण्ठेकाल' इव प्रथमान्तपदसहकृतके-वलसप्तम्यन्तपदावयवकः अपितु प्रथमान्तपदसहकृत-चतुर्थी-पञ्चमी-षष्ठ्याद्यन्यविभक्त्यन्तपदावयवकोऽपि 'सप्तमीविशेषणे' इत्यादिज्ञापकस्य सामान्यविषयकत्वमेव ज्ञापकत्वोपगमात्। अत एव 'अग्निहोत्रं जुहोति' इत्यत्र अग्नये होत्रं यस्मिन् इति अग्निहोत्रशब्दस्य व्युत्पत्तिसङ्गतिः, 'तद्गुणसंज्ञानपदस्य 'तद्गुणानां सविज्ञानं यत्र' इति तथा 'इन्द्रपीत' शब्दस्य 'इन्द्रेण पीतो यस्मिन् इति साध्याभाववद् वृत्तित्वमित्यत्र च साध्याभाववतो न वृत्तिर्यत्र इति व्युत्पत्तिः सङ्गतिश्च।

तन्न समीचीनमित्याहुर्वैयाकरणाः। व्यपेक्षावादस्यैव भाष्यविरुद्धत्वात्, तन्मूलक 'पूर्ववदार्थप्रधान' इत्याद्युत्सर्गस्याप्ययुक्तत्वात्। तदुक्तं कौण्डभट्टेन-

**समासे खलुभिन्नैव शक्तिः पङ्कजशब्दवत्**[19]।
**बहूनां वृत्तिधर्माणां वचनैरेव साधने॥**
**स्यान्महद् गौरवं तस्मादेकार्थीभाव आश्रितः॥**

अयं भवः - समासेऽवयवशक्त्यैव निर्वाहे पङ्कजशब्देऽपि पङ्कजनिकर्तुरपि योगादेवोपस्थिता समुदायशक्तिर्न सिद्ध्येत्। तत्रावयवशक्तिवादिमतेऽपि समुदायशक्तिरेव। न च पद्मत्वरूपेणोपस्थितयो सा कल्प्यते इति वाच्यम्, राजपुरुषादिपदेऽपि तद्विशिष्टत्वादिरूपेणोपस्थितये तत्कल्पनावश्यकत्वात्। लक्षणयैव तथोपस्थितिरिति चेत्? पङ्कजपदेऽपि सा सुवचोऽतः समासेऽतिरिक्तैव शक्तिः पङ्कजशब्दवदिति। यत् ''**पदार्थः पदार्थेनान्वेति**[20]'' इति ''**वृत्तस्य विशेषणयोगो ने**''[21]ति च वचनद्वयेन ऋद्धस्येत्यादि-विशेषान्वयो नेति तदपि तुच्छम्, समासे एकार्थीभावे स्वीकृतेऽवयवानां निरर्थकत्वेन विशेषणान्वयासम्भवात्

फलितार्थपरमस्माकम्। किञ्च विशिष्टशक्त्यस्वीकारे 'धवखदिरौ' 'निष्कौशाम्बि' 'गोरथः' 'धृतघटः'' 'गुडधानाः' 'द्विदशा' 'सप्तपर्णा' इत्यादावितेरतरादिरूपार्थो वाचनिको वाच्य इति महद् गौरवं स्यात्। तदाह-

**चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्[22]।**

**कर्तव्यन्ते न्यायसिद्धान्त्वस्माकं मदिति स्थितिः॥**

**अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना।**

**क्लृप्तत्यागश्चास्ति तव तत्किं शक्तिं न कल्पयेः॥** इति

किञ्च समासे शक्त्यस्वीकारे तस्य ''**अर्थवदधातुरप्रत्ययः प्रातिपदिकम्**[23]'' इत्यनेन प्रातिपदिक संज्ञादिकं न स्यादर्थवत्त्वाभावात्। न चोत्तरसूत्रेण सिद्धिः, तत्रत्यसमासग्रहणस्य नियमार्थत्वात्तेन राज्ञः पुरुष इत्यादिसिद्धिः।

ननु वृत्तौ विशिष्टशक्तिस्वीकारे वैयाकरण इत्यस्य व्याकरणमधीते इति, पाचक इत्यस्य पचतीति कथं विग्रहो वृत्तिसमानार्थकत्वादिति चेन्न-

**आख्याततद्धितकृतोर्यत् किञ्चिदुपदर्शकम्[24]।**

**गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः॥** इत्युक्ते।

तद्धितकृतोर्यत्किञ्चिदर्थबोधकं विवरणमाख्यातम्, तत्र विपर्ययो दृष्टः। तथा हि 'आक्षिकः कुम्भकारः' इत्यत्राक्षकरणकव्यापाराश्रय इति बोधः। अक्षैर्दीव्यति, कुम्भं करोति इत्यत्राक्षरणिका देवानुकूला भावना, कुम्भोत्पत्त्यनुकूला भावनेति बोधात्। कृत्प्रत्यये कारकाणाम्, आख्याते च भावनायाः प्राधान्यं वदतो मीमांसकस्यापि गुणप्रधानभावांशव्यत्यासो न विवरणत्वबाधक इति नात्र पाक्षिकस्य चित्राः गावो यस्य इत्यादेर्विग्रहत्वे बाधकमस्तीति तत्त्वम्। एवम् स्वीकर्तव्या सर्वत्र समासे विशिष्टा शक्तिः, अस्तु च तथा विग्रहस्तथापि षष्ठीतत्पुरुषकर्मधारययोः शक्तिमत्त्वाविशेषान्निषादस्थपत्यधिकरणसिद्धान्त-सिद्धिर्नस्यादित्यत आह- कौण्डभट्टः वैयाकरणभूषणसारे-

**पर्यवस्यच्छाब्दबोधाविदूर[25] प्राक्क्षणस्थिते।**

**शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम्॥**

पर्यवस्यश्चासौ शाब्दबोधश्च तस्मादविदूरश्चासौ प्राक्क्षणश्च तदानीन्तनलाघवमादायाधिकरणाविरोध इत्यर्थः।

यद्यपि शब्दशक्तिविचारे शाब्दिकमतमेव प्रथममुपतिष्ठते। शाब्दिकानां चैकार्थीभावः सिद्धान्तभूतः सर्वस्वमेव व्यञ्जनैवालङ्कारिकाणाम्, परन्तु यथैकार्थीभावपक्षो महाभाष्याब्धिप्रमाणमूलकस्तथैव व्यपेक्षापक्षोऽपि पक्षान्तरत्वेन तत्प्रमाणारूढ एव, न तु शाब्दिकेतरस्य, एवं कपोलकल्पनामात्रं तत्, व्यपेक्षसामर्थ्यस्यापि '**समर्थ**'[26] सूत्र भाष्यैणैव समुपलब्धत्वात्।

अतश्च- शाब्दिकैरपि व्यपेक्षापक्षे गौरवमेवाक्षिप्तम्, ''**स्यान्महद्गौरवं**[27] **तस्मादेकार्थीभाव आश्रितः**'' इत्यादिना, न तु भाष्यविरुद्धत्वमपि। महर्षिपाणिनेर्महाविभाषाधिकारसूत्र '**विभाषा**'[28] इति महर्षिकात्यायनस्य '**सविशेषणानाम् वृत्तिर्न**[28] **वृत्तस्य च विशेषणयोगो न**' इति- वार्तिकात्मिका स्मृतिश्च व्यपेक्षापक्षमेव दृढयतः। कोशेषु राजपुरुषादिपदानामनुपन्यासोपि व्यपेक्षापक्षमेव पोषयति। 'राज'-पद 'पुरुष' पदयोः पूर्वापरीभावात्मकक्रमव्यत्यासेन समासे 'पुरुषराज' इत्येवं समुदायस्य स्वरूपपरिवर्तने विशिष्टशक्तिभेद इत्येकार्थीभावपक्षे गौरवं द्योतयति। अतः व्यपेक्षापक्षोपि न कपोलकल्पनामात्रम् अपितु भाष्यसिद्धमेव। उभयत्रापि गौरवमपि सम्भवति, तथापि फलमुखागौरवन्नैव दोषाधायकम्। अतो युक्तायुक्तत्वन्तत्रसमीक्ष्यैकार्थीभावव्यपेक्षयोरेकार्थीभावपक्षे एव भाष्यकारेण- **परार्थाभिधानंवृतिरि'ति**'[29] लक्षणलक्षितैकार्थीभावात्मिका विशिष्टा शक्तिः संसाधितेत्यभिप्रायः **समर्थः पदविधिः**[30] सूत्रस्यपूर्वापरभाष्यपर्यालोचनेन सिद्ध्यति।

**सन्दर्भग्रन्थसूची-**


1. पतञ्जलिः-म.भा. पस्पशाह्निकम्
2. पाणिनिः-अष्टाध्यायी
3. पतञ्जलि-म.भा. 1.1.91
4. पतञ्जलिः-म.भा. पस्पशाह्निकम्
5. पतञ्जलिः-म.भा.प. शब्दतत्त्वविमर्शप्रसंगे
6. श्लोकवार्तिकम्
7. पाणिनीः अष्टाध्यायी 2.1.3
8. कौण्डभट्टः-वै.भू. समासशक्तिनिर्णय का. 28
9. पतञ्जलिः-व्याकरणमहाभाष्य
10. नागेशभट्टः-परिभाषेन्दुशेखर परि.व्या.महा.
11. भट्टोदीक्षितः-वै.सि.कृन्दन्तप्रकरण अष्टा. 3.2.78
12. पाणिनिः-गणपाठः मयूरव्यंसकादयश्च
13. पाणिनिः-गणपाठ तत्रैव
14. पाणिनिः-अष्टा. 2.1.41
15. कौण्डभट्टः- वै.भू. समासशक्तिनिर्णय का. 29.5
16. पाणिनिः-अष्टाध्यायी 5.1.28
17. पाणिनिः-अष्टाध्यायी 1.1.27
18. पाणिनिः-अष्टाध्यायी 2.2.35
19. कौण्डभट्ट-वै.भू.समासशक्तिनिर्णयः का. 31-32
20. पतञ्जलिव्याकरणमहाभायम्-2.1.आ.सू.
21. तत्रैव 2.1 आ. 1 सू.
22. कौण्डभट्टः-वै.भू.समासशक्तिनिर्णयः का. 33-34
23. पाणिनिः-अष्टाध्यायी 2.2.24
24. कौण्डभट्टः-वै.भू.समासशक्तिनिर्णयः 35
25. कौण्डभट्टः-वै.भू.समासशक्तिनिर्णयः 36
26. पाणिनिः-अष्टाध्यायी 2.1.1
27. कौण्डभट्टः-वै.भू.समासशक्तिनिर्णयः 31-32
28. पाणिनिः-अष्टाध्यायी 2.1.11
29. पतञ्जलिः-व्याकरणमहाभाष्यम् 2.1 सू.
30. पाणिनिः-अष्टाध्यायी 2.1.1



- शोधच्छात्र-व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः),
लखनऊपरिसरः, लखनऊ


******

# उपनिषद्वाङ्मये ब्रह्मचिन्तनम्

– मंजूलता

उपनिषद्- उप-नि-उपसर्गपूर्वकात् विशरण-गत्यवसादनार्थकात् षदलृ (सद्) धातोः क्विपि उपनिषत्-शब्दो निष्पद्यते। उप-समीपे नि-निश्चयेन, सद्-स्थानम् इति, तत्त्वज्ञानार्थं गुरोः समीपे सविनयं स्थितिः उपनिषद् इत्युच्यते। तत्त्वज्ञानप्रतिपादनाद् एतद्विषयका ग्रन्थाः अपि उपनिषद् इत्युच्यन्ते। उपनिषद्- शब्दार्थे ब्रह्मविद्येत्यपि गृह्यते। सद्धातोः अर्थत्रयम् आश्रित्य उपनिषच्छब्दार्थो निरुप्यते यद् या संसारबीजभूताम् अविद्यां नाशयति, यया ब्रह्मप्राप्तिः ब्रह्मज्ञानं वा भवति, यया च मानव-दुःखावसादो भवति, सा उपनिषदिति। अतएव श्रीशंकराचार्यः आविद्यानाशनं दुःखनिरोध ब्रह्मप्राप्ति च इत्यर्थत्रयम् आश्रित्य उपनिषद्शब्दं ब्रह्मविद्योतकत्वेन स्वीकरोति। गौण्या वृत्त्या च ब्रह्मविद्याप्रतिपादका ग्रन्था अपि उपनिषच्छब्दवाच्याः।

**उपनिषत्सुअध्यात्मम्** उपनिषदो हि अध्यात्मविद्यायाः स्रोतः स्वरूपाः। एतदुद्भूता नानाशास्त्र-धर्मशास्त्र-आचारशास्त्र-नीतिशास्त्रादि- रूपेण सकलमपि भुवनं भागीरथीप्रवाह इव पावयन्ति। अध्यात्मप्रधानायां प्रस्थान- त्रय्याम् उपनिषदो मूर्धन्यभूताः। प्रस्थानत्रय्याम् अन्यद् द्वयं ग्रन्थरत्नं गीता ब्रह्मसूत्रं चेति परिगण्यते।

मुण्डकोपनिषदि वेदादीनां गणना अपराविद्यायां वर्तते, उपनिषदां पराविद्यायाम्। अपरा विद्या लौकिकविषयप्रधाना, परा च ब्रह्मज्ञानप्रधाना। अतएवोच्यते-

**तत्रापरा ऋग्वेदो यजुर्वेदः, अथ परा यथा तदक्षरमाधिगम्यते।**[1]

उपनिषत्सु भारतीयतत्त्वज्ञानां सात्त्विकचिन्तनस्यप्रायशः सकलोऽपि संग्रहः समुपस्थाप्यते। उपनिषत्सु मुख्यत्वेन वर्णिता विषयाः समासतः सन्ति- किं ब्रह्म क ईश्वरः, जीवात्मनः किं स्वरूपम्, जीवात्मनः किं लक्ष्यम्, जीवो ब्राह्मणो भिन्नोऽभिन्नो वा, कथं च भिन्नत्वम् अभिन्नत्वं वा, सृष्टे मूलरूपं किम्, कथं जगतः प्रादुर्भावः, कथं जगतः प्रलयः अध्यात्मज्ञानस्य आवश्यकता, अध्यात्मने किं साध्यते, अध्यात्मने च कथं मोक्षवाप्तिः, कानि च मोक्षस्य साधनानि, निवृत्तिमार्गस्य काऽऽवश्यकता, ज्ञानमार्गेण किं साध्यते, ब्रह्मसाक्षात्कारस्य के लाभाः इत्यादयाः।

जीवनेऽस्मिन् यदि ब्रह्मज्ञानं न स्यात् तर्हि जीवनं निष्फलमेव। तत्त्वज्ञानेन ब्रह्मदर्शनेन च जीवो मुक्तिं लभते-

**इह चेदवेदीदथ सत्यमस्ति, न चेदिहावेदीन्महती विनष्टिः।**
**भूतेषु भूतेषु विचिन्त्य धीरः, प्रेत्यास्माल्लोकादमृता भवन्ति॥**[2]

**ब्राह्मणः स्वरूपम्** – आधिव्याधिपरिपीडितो जराजन्म-मरणादि दु:ख-दावाग्नि दग्धः क्लेशायासविषण्णः, अज्ञानान्धतमसनिमीलितनयनः, भौतिकविषयस्य च अस्यान्तरो जीवानन्दावाप्तये मोक्षाधिगमाय त्रिविधतापविनाशाय मोहापहाराय च जगच्छरण्यं शुद्ध-बुद्ध-मुक्त-स्वभावं जगदीश्वरम् आश्रयते। जगदीश्वरो वेदान्तमतेन ब्रह्मेत्याख्यायते। तस्य ब्रह्मणः स्वरूपम् उपनिषत्सु बहुधा प्रतिपाद्यते। माण्डूक्योपनिषदि तत्स्वरूपं निगद्यते यत्-

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभावस्य हि भूतानाम्। नान्तः प्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञं अदृष्टमव्यवहार्यमग्राह्यम् एकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मास विज्ञेयः।।[3]

स परमात्मा अद्वितीयः सर्वव्यापकः सर्वान्तर्यामी साक्षी चैतन्यस्वरूपो निर्गुणश्चेति। न तत्समश्चाभ्यधिकश्च कश्चन। अस्य शक्तिरपूर्वा विविधगुणमयी च। स एव ऊर्णनाभ इव मायया सकलं जगत् सृजत्यवति संहरति च। उक्तं च

**एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।**
**कार्याध्यक्षः सर्वभूताधिवासः साक्षी चेता निर्गुणो निष्क्रियश्च।।**[4]
**न तस्य कार्यं करणं च विद्यते व तत्समश्चाभ्यधिकश्च दृश्यते।**
**परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।।**[5]
**यस्तूर्णनाभ इव तन्तुभिः प्रथानजैः स्वभावतः।**
**देव एकः स्वमावृणोति स नो दधातु ब्रह्माव्ययम्।।**[6]

तस्यैव तेजसा निखिलं जगद्द्योतते। स एव प्रकाशानामपि प्रकाशः तेजसां तेजश्च सूर्यचन्द्रतारकादयो न तस्य प्रकाशने प्रभवः। अग्न्यादीनां तु का कथा।

**न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।**
**तमेव भान्तमनु भाति सर्वं तस्य भासासर्वमिदं विभाति।।**[7]

स एवैको विश्वरूपः सर्वदेवमयश्चेतिबहुधा वर्ण्यते। उक्तं च-

**अग्निर्थको भुवनं प्रविष्टो रूप रूपं प्रतिरूपो बभूव।**
**एकस्तथा सर्वभूतान्तरात्मा रूप रूपं प्रतिरूपो बहिश्च।।**[8]
**तदेवाग्निस्तदादित्यस्तदवायुस्तदु चन्द्रमाः।**
**तदेव शुक्रं तद्ब्रह्म तदापस्तत् प्रजापतिः।।**[9]

**ब्रह्मसत्यम्** – किं सत्यं किम् असत्यं मिथ्या वा, इति जिज्ञासायाम् आचार्य श्री शंकरोऽभिधत्ते यद्- 'यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरित तत् सत्यम्'। अर्थात् यद्वस्तु शाश्वतिकं परिवर्तनरहितम्

अविनश्वरं च तत् सत्यम्, अतोऽन्यदसत्यं मिथ्या वा। एवं चिन्तनेन सिध्यति यद् जगद् असत्यं जगतः परिवर्तनशीलत्वात्। ब्रह्म च सत्यं शाश्वतिकमपरिवर्तनशीलम् अतः तस्य सत्यता न केनापि रूपेणाक्षेप्तुं शक्या।

वेदान्तदर्शने ब्रह्मनिर्विकल्पं निरूपाधि निर्विकारं चेति उररी क्रियते। तद् ब्रह्म द्विविधं निर्गुणं सगुणं च। निर्गुणं ब्रह्मपरमार्थदृष्ट्या सच्चिदानन्दस्वरूपम्। तदेन जागतः प्रकाशकम्। तत्सत्तयैव सूर्यचन्द्रादिकं प्रकाशते। अज्ञानोपाध्यवच्छिन्नं ब्रह्म सगुणरूपताम् आपद्यते। तदेव नाम रूपादि भेदेन नानादेवतारूपताम् आसादयति। तथा च कठोपनिषदि स्वीक्रियते–

**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च।**

**एकं रूपं बहुधा यः करोति॥**[10]

तस्य ब्रह्मणोऽविद्योपाध्यवच्छिन्नं कारण शरीरं समष्टिरूपेण 'ईश्वरः' व्यष्टिरूपेण च 'प्राज्ञः' जीवो वा मन्यते। तस्यैव ज्ञानेन सर्वं विज्ञायते। तदेव जगति ओतं प्रोतं च। ब्रह्मैकत्वज्ञाने च न मोहो न शोकः। न च तदन्यद् वस्त्वन्तरम् एतदेव श्रुतिषु बहुधा प्रतिपाद्यते– **'ईशवास्यमिदं सर्वम्'**[11] 'ऐतदात्म्यमिदं सर्वम्' यस्मिन् विज्ञाते सर्वं विज्ञातं भवति' स आत्मा तत्त्वमसि श्वेतकेतो[12] तत्र को मोहः कः शोकः एकत्वमनुपश्यतः[13] मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।

**जगन्मिथ्या**– वेदान्तानुसारं जगन्मिथ्येति मन्यते। विषयेऽस्मिन् बह्व्यो विप्रतिपत्तयो वर्तन्ते। वेदान्तानुसारं मायायाः शक्तिद्वयमावरणविक्षेपनामकम्। आवरणशक्तिर्ब्रह्मणः शुद्धस्वरूपमावृणोति। विक्षेपशक्तिश्च तत्राकाशादिप्रपञ्चं सृजति। विशदीकृतं चैतद्दृग्दृश्यविवेके–

**शक्तिद्वयं हि मायाया विक्षेपावृतिरूपकम्।**

**विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेत्॥**

**अन्तर्दृग्दृश्योर्भेदं बहिश्च ब्रह्मसर्गयोः।**

**आवृणोत्यपराशक्तिः सा संसारस्य कारणम्॥**[14]

मायैव अविद्या–अज्ञान–अध्याय–अध्यारोप–विवतीदिशब्दैर्व्यवह्रियते। अज्ञानोः पाध्यवच्छिन्नं स्थूलं शरीरं व्यष्टिरूपं सद् विश्वं जगद् वा भवति। तत्त्वदृशा चिन्तनेन परिवर्तनशीलतत्वाद् विनाशित्वाच्च जगद् मिथ्येत्युच्यते।

वेदान्तानुसारं त्रिविधा सत्ता स्वीक्रियते– प्रातिभासिकी, व्यवहारिकी, परिमार्थिकी च। प्रातिभासिकी सत्ता किंचित्कालावस्थायिनी, पश्चात् प्रतिबाधिता च। यथा– रज्जौ सर्पबुद्धिः, शुक्तौ रजतबुद्धिश्च। व्यावहारिकी सत्ता जगद्– व्यवहारप्रधाना। नामरूपात्मकं जगद् व्यवहारदृष्ट्यैव सत्यम्, परमार्थदृष्ट्या असत्यं मिथ्या वा। जगद् विपरिणामि नश्वरं परिवर्तनधर्मि अशाश्वतं चेति अवधार्य असत्यं मिथ्या वेत्युच्यते, न तु लौकिक–ज्ञानानर्मूलताऽऽपदनाय पारमार्थिकी सत्ता सा या न क्वचिद् व्यापद्यते

विहन्यते वा। यत् तत्त्वतोऽक्षरं शाश्वत वा तदेव पारमार्थिकं सत्यम्। एवं ब्रह्मैव केवलं पारमार्थिकी सत्ता। तात्त्विकदृष्ट्यैव जगन्मिथ्येति वेदान्तविदाम् अभिमतम्। व्यवहारदृष्ट्या तु तदनुभूतिर्न निर्मूला।

**जीवो ब्रह्मैव नापरः** - अज्ञानोपाध्यवच्छिन्नं व्यष्टिरूपं सत् कारणशरीरं प्राज्ञो जीवो वेत्याख्याते। समष्टेरीश्वरस्य व्यष्टिरूपो जीवः। सर्वज्ञत्वाल्पज्ञत्वादिभेदेन ब्रह्माजीवात्मनोर्भेदः। आत्मतत्त्वरूपेण चैतन्यरूपेण च तयोरभेदः। अतएव 'तद् त्वमसि' इति महावाक्येन जीव-ब्राह्मणौरेक्यं प्रतिपाद्यते। सर्वत्वाल्पपज्ञत्वादिभेदवारणेन तयोरैकात्क्यम्। एकस्यैव तत्त्वस्य समष्टि व्याष्टिरूपेण नामान्तरं ब्रह्मजीवात्मनौ इति। ब्रह्मसाक्षात्कारे द्वयोरैक्यस्यानुभूतेः 'तत् त्वमसि' इति संगच्छते। अत्र भागलक्षणाया जहदजहल्लक्षणाया वा स्वीकाणाद् ब्रह्मजीवयोरेकत्वं साध्यते। सुरेश्वराचार्यो नैष्कर्म्मसिद्धौ एतदेव प्रतिपादयति- **सामानाधिकरण्यं च विशेषणविशेष्यता।**

**लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम्॥**[15]

पञ्चदशयां विद्यारण्यः 'तत्त्वमसि' इत्यस्य महावाक्यस्य अखण्डैकरसत्वमेव वाक्यार्थ विवृणुते। उक्तं च- **संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।**

**अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः॥**[16]

कठोपनिषद् ब्रह्मप्राप्तेः साधु साधनं वर्ण्यते। रूपकम् आश्रित्याभिधीयते- यत्- शरीरेऽस्मिन् आत्मा रथी, शरीरं रथः, बुद्धिः सारभिः, मनः, प्रग्रहः, इन्द्रियाणि हयाः, संयमेनेनिद्रयाश्वान् वशे कृत्वा रथिनम आत्मानं प्रेक्षते-

**आत्मानं रथिनं विद्धि, शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि, मनः प्रग्रहमेव च॥**

**इन्द्रियाणि हयान्याहुर्विषयांस्तेषु गोचरान्। आत्मन्द्रियामनोयुक्तं भोक्तेत्माहुर्मनीषिणः॥**[17]

ज्ञान्तकर्ममार्गयोः समन्वमैनैव सुखसाधनत्वं सिध्यति- **अविद्यया मृत्युं तीर्त्वा, विद्यमाऽमृतमश्नुते।**[18]

उपनिषत्सु वेदानां सारभागः सरलयाऽभिव्यक्ता प्रश्नोत्तररूपेण आख्यायिकासमन्वयेन च रुचिरां शैलीम् आश्रित्य प्रतिपाद्यते। जीवने शान्तिप्रदायिकाः, आधिव्याधिनिरोधिकाः, मनसः शान्तिदाः, आत्मनश्च प्रसादिकाः अविद्यान्धतमसविनाशनात् ज्ञानप्रभाप्रसारिकाः, सर्वशास्त्रं मूर्धन्यत्वेन समादृताश्च सन्तीति एतासां महत्वम् अक्षुण्णं निर्विवादं च।

सन्दर्भ-संकेतः

1. मुण्डको. 1.1.5 2. केनो. 2.3 3.माण्डूक्योपनिषद् 71 4.श्वेता. 6.11 5. श्वेता. 6.1 6. श्वेता. 6.10 7. श्वेता. 6.14 8. कठो. 2.5.9 9. श्वेता. 4.2 10.कठ.2.5.22 11. ईश. 2 12. छान्दोग्य. 13. ईश. 7 14.दृग्दृश्य. श्लोक 13,15 15.नैष्कर्म्यसिद्धि 3.3 16.पञ्चदशी 74 17.कठ. 1.3.3-4 18.ईश. 11

-शोधच्छात्रा-साहित्यविभागः

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) लखनऊपरिसरः,



******

# अर्वाचीनसंस्कृतकाव्येषु ''राष्ट्रभावना''

-अनुपमदेवी

अर्वाचनीयसंस्कृतकाव्यशास्त्रनिरवछिन्नधारा प्रवाहिता। एषु अनेकमहाकवयः नाटककाराः, गीतिकाराः, कथाकाराश्च प्रवर्त्तमानाः विद्यन्ते। ऐषु काव्येषु प्राचीनरूढिः न दृश्यते अपितु समसामयिक-राष्ट्रस्थितीनां, जनभावनानां, प्रभृतीनां च चित्रणमभिधया व्यङ्ग्या च विलोक्यते। समत्वसमन्वित, राष्ट्रसेवया, जनकल्याणभावनाश्च समुद्भावनं सर्वत्र प्राप्यते। राष्ट्रियैकताया, राष्ट्रचेतनायाश्च संवर्धः, परेषां-भावनानां व्यवहारिकप्रयोजनरूपेणानुभूयन्ते। राष्ट्रवादिस्वरैः सह सहृदयसंवेद्याऽह्लादकता कान्ता-सम्मितोपदेशेषु सर्वात्मना सुरक्षितः।

भावना कश्चित् मनुष्यप्रधानो धर्मः भवति या मनुष्यान् पशुभ्यः पृथक् करोति। केवलं सद्भावनया मनुष्यः मनुष्यवान् भवति।[1] राष्ट्रस्याभ्युन्नतये या खलु सद्भावना सैव राष्ट्रभावना। भारतीयपरिवारे स्वराष्ट्रेवं समाजस्य कल्याणाय प्रियाति-प्रिय स्वसदस्यन दत्वा परं सुखामनुभवति।[2] सीताचरित महाकाव्ये सीता विश्वकल्याणाय स्वयं वनगमनप्रस्तावं स्वीकरोति।[3] भारतीयसंस्कृते भारतस्य राष्ट्ररक्षायैः स्वातन्त्र्यस्य च भावनायाः सामान्य-जीवनस्य रागात्मकचित्रणराष्ट्रकल्याणस्य सर्वोदयस्य च भावनायाः प्रेरणात्मकं हृदयग्राहि वर्णनं सर्वत्र दृश्यते। भारतीयता नैतिकपतनं कथमपि कविरयं न सहते। तस्य हृदयेजायमाना पीड़ा काव्यगद्यमाध्यमेन प्रस्फुटितः।

(1) प्रो. राधावल्लभत्रिपाठी महोदयस्य मुखात् निस्सृतः राष्ट्रभावना 'रोटिकालहरी' जनतालहरी इत्यादिषु लघुकाव्येष्वस्य नदति विप्लवात्मकः स्वरः। अस्मिन् काव्येकविः श्रमिकस्यान्तिरकी दशां विषयीकरोति या रोटिका धनिकेभ्यः सवहुमानं दीयते, सैव कश्चिद् बालस्य कृते कथमाकाशकुसुमिव दुर्लभा जायते इति। तत्र कविः दैनिकश्रमिकस्य करुणगाथां श्रमिकहृदयहृदयेन एव ब्रूते। कविः संस्कृतेऽत्यन्तं स्वाभाविकशब्दैः साधारणजनतारूपेणात्मानं परिणनयन् तद् व्यथां कथयति।[4]

(2) उदीयमाननारीकवयत्रीषु पं. क्षमारावेण 'सत्याग्रहगीता' इति रचना कृता। यस्मिन् राष्ट्रिय महात्मागान्धिनिर्देशेन संचालिता सत्याग्रहात्मकम् आन्दोलनम् चित्रितम्।[5] कवियत्री स्वयमपि राष्ट्रभावनाभिः प्रेरिता सतीकाव्यमिदं संसर्जेति तस्यास्वाभिमतं प्रकटीकरोति।[6] सा सत्याग्रहगीता उत्तरसत्याग्रहगीता, स्वराज्यविजय, इत्यादिनि ग्रन्थेषु स्वराष्ट्रभावनास्योद्गारं व्यक्ता।

(3) भारतस्य जाज्वल्ल्यमाननक्षत्रः डा. रेवाप्रसादमहाभागः समाजस्य पुरतः 'सीताचरित' इति महाकाव्ये भारतीयसंस्कृतिप्रीतिं प्रस्तावयति।[7] अस्मिन् महाकाव्ये सीता हि भारतवर्षस्य राष्ट्रदेवतारूपेण तामाश्रित्य कृतमिदं काव्यं भारतीयेभ्यो परमं श्रद्धेयं वर्तते। एवं हि विश्वबन्धुत्वविधृताराष्ट्रियताऽत्र पदे-पदे व्यपदिष्टा। ''स्वतन्त्रसम्भवम्'' इति 33 सर्गात्मकमहाराष्ट्रस्य ख्यापयति। यत् स्वतन्त्रमङ्गलं

हृदि निधाय महाकविः कृतवानिदं महाकाव्यं तत्स्वातन्त्र्यं स परिभाषते। इदं 'स्वतन्त्रसम्भवं' नाम भारतीयस्वान्त्र्यगौरवगानरूपं न केवलं अपितु सहृदयानां साहित्यरसिकानां परम प्रीतये प्रभवतीति मे दृढविश्वासः।[8]

डा. रमाकान्तशुक्लमहोदयेन 'भाति में भारतम्' नामेदं शतककाव्यं रचितवान्। यस्मिन् काव्ये भारतराष्ट्रस्य वैशिष्ट्यानां वर्णनं विधाय भारतीयजनेषु आत्मनिष्ठां राष्ट्राभिमान भावान् प्रोद्दीपयितुम अचेष्टत्। भारतराष्ट्रविश्वस्य सर्वैरेव राष्ट्रैः सार्धं बन्धुतायाः भावानां रक्षति, समस्त संसारेकं परिवारमिव मन्यते।[9] भारतमेव एतादृशं राष्ट्रमस्ति, यत्र हिंसायांहिसाया विजयो भवति। हिंसकाः नराः निजर्दुष्कृत्यैः स्वमेव निस्सत्वा भूत्वा नश्यन्ति। साधुजनाः सर्वान् मानवान् साम्यभावं पश्यन्ति।[10] स्वमात्र भूमेः रमणीयतायाः प्रकाशनेऽपि कविनिष्ठो राष्ट्रप्रेम, राष्ट्राभिमानो वा एव प्रधानहेतुरस्ति। स्वस्व राष्ट्रियाणि पर्वाणि प्रति तु कविना भूयानुत्साहः प्रदर्शितोऽस्ति। भारतीय गणतन्त्र दिवसोत्सवमुपलक्ष्यीकृत्य आत्मनिष्ठमुल्लासमभिव्यञ्जता तेन लिखतिमस्ति।[11] 'भाति मे भारतं' इति काव्ये विविध-प्रकारेण स्वराष्ट्रियभावनां प्रशंसा वद्भिवचनैः प्रकटीकरोति।

अत्याधुनिकयुगे परिगणितेषु काव्येकारेष्वन्यतमो राष्ट्रियकर्णधारः मिश्रोऽभिराजराजेन्द्रमहोदयस्य को न जानाति? कविरयं स्वकीय भावनाया अभिव्यक्तिकरणेन सहैव स्वराष्ट्रस्य विश्वमङ्गलकामनामपि प्राकट्य्य, 'अभिराजसप्तशती' खण्डकाव्येलब्धस्थानेषु नव्य भारतशतकम्, प्रभातमङ्गलशतकम्, भारतदण्डकखण्डेषु राष्ट्रियतायाः उदात्त चिन्तनमकुर्वन्।

सः मातृ भूमिः भारतदेशं वैदेशिकशासनपाश्चात् मोचकान् देशभक्तान् प्रति अपार समादरो वर्तते। सः तान् प्रति कृतज्ञतामभिव्यनक्ति गर्वं च करोति। सहैव राष्ट्रस्य साम्प्रतिकी स्थितिं प्रति कवीनां वैकल्यमपि सन्दृश्यते। कविरसौ नव्य भारतस्य पतनं दैन्यश्च दर्शं दर्शं विलपति।[12] ये वीरा युद्ध यज्ञे प्राणैरपि आहुतिं दत्वा आहुति दत्वा राष्ट्रस्य सम्मानं रक्षन्ति। तेषां कृते न कोऽपि चिन्तयन्ति।[13] वाग्वधूटी इति काव्ये राष्ट्रियभावात्मकः कवितासंग्रहः प्रणीतवान्। राजेन्द्रमिश्रविरचिते स्वदेशवन्दनगीते राष्ट्रियचेतना स्वदेशं प्रणमन्ती तद् गौरवं दृगगोचरी भवति।[14]

अत एव अभिनव राष्ट्रिचेतना, उदात्तमानवमूल्यानां स्थापना समयानुरूपम् विविध विषयाणां वस्तुरूपेण ग्रहणं, व्यापकलोकस्वभावाभिञ्जनं प्रभृति वैशिष्ट्यम् एतेषां काव्यानां युगचेतना संवलितत्वं द्योतयति। आधुनिकसंस्कृतसाहित्यसंसारे राष्ट्रजागरूकाणां साहित्किानां या सुविस्तीर्णा काव्ययात्रा निरन्तर गतिशीला वर्तते। तस्यैव काव्यात्रायां- अम्बिकादत्त-व्यासकृत-शिवराजविजयः, श्रीपादशास्त्री हसूरकरकृत-पृथ्वीराजचह्वाणचरितम्, गंगाप्रसाद उपाध्यायकृत-आर्योदयम्, मथुराप्रसाददीक्षितकृत-भारतविजयनाटकं, नारायणपतित्रिपाठीकृत-भारतमातृमाला, डा. सत्यव्रतशास्त्रीकृत-इन्दिरागाँधीचरितम्, डा. के.एस. नारायणकृत-भारतवैभवम्, कपिलदेवद्विवेदीकृत-परिवर्तनम्, डा. के. एस. नागराजनकृत-भारतवैभवम्, कपिलदेवद्विवेदीकृत-राष्ट्रगीताञ्जलिः, डा. रमाकान्तशुक्लकृत-विंशशताब्दिकं संस्कृतनाटकम्, तथाश्च

बटुकनाथशास्त्री-प्रेमनारायणद्विवेदी-डा.विन्ध्येश्वरीप्रसादमिश्रः प्रभृतयः साहित्यमुपासकाः मनीषी सारस्वतसेवायां संलग्नः। एतेषां कवीनां काव्येषु प्रबलराष्ट्रभावन परिव्याप्ता विद्यते।

**सन्दर्भसूची-**

1. साहित्यसंगीतकलाविहीनः साक्षात् पशुः पुच्छ विषाण हीनः। - नीतिशतकम्-
2. मदेकपुत्रं न हि केवलं शिवं परं महाराष्ट्रधरानभोमणिम्।
   सुमेधसः सन्नयथ प्रभोज्ज्वलं तमोऽन्तयोऽभिभवेन्न तद्रूचम्।। - क्षत्रपतिचरितम्-8/50
3. अस्तु मे भवदीप्सिता गतिर्यत्र क्वचन कानने वने।
   विश्वमानवमशल्यतां व्रजेत काममद्य सहकीर्तिभिस्तव।। - सीताचरितम्-
4. एषा सा सहजा विभावितगुणा मे मानसे संस्थिता।
   व्यक्तिं स्वस्य करोति चैव जनता वाग्भिर्ममैषा ध्रुवम्।। - जनतालहरी-12
5. (क) दुर्बला ननु गण्यन्ते शान्तिमार्गावलम्बिनः।
   परं सत्याग्रहाद् विद्धि नास्ति तीव्रतरं बलम्।। -सत्यग्रहगीता 10/25
   (ख) देशभक्तो निजप्राणान् मन्यते यस्तृणोपमान्
   ताडनात्तस्य किं दुःखं बन्धनात्तस्य किं भयम्।। - सत्याग्रहगीता 12/31
6. तथापि देशभक्त्याहं जातास्मि विवशी कृता।
   अत एवस्मि गातुमुद्यता मन्दधीरपि।। -सत्याग्रहगीता-1/03
7. न राक्षसीं संस्कृतिमार्य संस्कृतौ।
   कृतस्थितिः कोऽपि भजेत सन्मतिः।। - सीताचरितम्-1/17
8. स्वातन्त्र्यं कोऽपि संस्कारो यतः संवित्प्रतानिनी।
   प्रसोतं कुशलानर्थान् नृषु कल्पलतायते।। - स्वातन्त्र्यसम्भवम्-1/39
9. विश्वबन्धुत्वमुद्घोषयत्पावनं विश्ववन्द्यैश्चरित्रैर्जगत्पावयत्।
   विश्वमेकं कुटुम्बं समालोकयत् भूतले भाति मेऽनारतं भारतम्।। - भाति में भारतम्- पद्य सं.-1
10. यत्र हिंस्रः स्वपापैः स्वयं हिंस्यते यत्र साधुः समत्वाद् भयान्मुच्यते।
    यत्र सत्यं जयं जयाति नैवानृतं भूतले भाति तन्मामकं भारतम्।। - भाति में भरतम्-पृ. सं. 75
11. जन्वरीमासषड्विंशके वासरे इण्डियागेटपार्श्वस्थितो दर्शकः।
    यस्य शोभाप्रवाहे मुदा मज्जति भूतले भाति तन्मामकं भारतम्।। - भाति में भारतम्- पृ. सं.-59
12. राष्ट्रं यदभवत्क्वापि कार्तस्वरविहङ्गमः।
    लुण्ठितं मुषितं छिन्न तद्गतं ननु दीनताम्।। - नव्यभारतशतकम्- पद्य सं.-8
13. किमावाप्तं सुखं भूमौ दारपुत्रविभूतिजम्।
    तैस्तैरमृतपुत्रैर्ये प्रथमे वयसि निर्गताः।।

किन्तु येषां कृते प्राणास्त्यक्तास्तैस्तु हुतात्मभिः।
त एव निष्ठुरीभूय जानन्ति न कृतं क्वचित्।। -नव्यभारतशतकम्-15, 16

14. वन्दे सदा स्वेदशम्,
गङ्गा पुनाति मालं रेवा कटि प्रदेशम्,
वन्दे सदा स्वदेशं एतादृशं स्वदेशं।। -वाग्वघूटी-पृ. 12

तथा च-

सलिलं सुधामधुरितं पवनोऽपि गन्धवाही।
चरितं विकल्पकलितं धर्मो दयावगाही।।
यत्प्राङ्गणं शबलितं कौतूहलैरशेषम्।
वन्दे सदा स्वदेशम्, एतादृशं स्वदेशम्।। -वाग्वधूटी-

आधारग्रन्थसूची-


1. नीतिशतकम्
2 आधुनिकसंस्कृतसाहित्यश्रीः-श्रीमद्रामज्युपाधयायाभिनन्दनग्रन्थः, सम्पादकौ-राधावल्लभः रमाकान्तपाण्डेयः, प्रथमसंस्करण-2001, प्रतिभाप्रकाशनम्, 29/5 शक्तिनगरम् दिल्ली-110007
3. सीताचरितम्-डा. रेवाप्रसादद्विवेदी-प्रथमसंस्करण-1978, चौखम्भा सुरभारती प्रकाशन वाराणसी।
4. संस्कृत साहित्य में राष्ट्रिय भावना- डा. हरिनारायण दीक्षित संस्करण-द्वितीय 2006 ई., प्रकाशन-ईस्टर्न बुक लिंकर्स 5825 न्यू चन्द्रावल जवाहर, दिल्ली-7
5. भाति में भारतम्- डा. रमाकान्त शुक्ल, संस्करण प्रथम-1979 देव वाणी परिषद 6, वाणी विहार नई दिल्ली-110059
6. अर्वाचीन संस्कृत साहित्य परिचयः (प्रथमखण्डः) सम्पादकः- रमाकान्तशुक्ल, संस्करण प्रथम- 1982, प्रकाशक-देववाणी-परिषद, दिल्ली-6, वाणी-विहार, नयी दिल्ली-110059
7. अभिराजसप्तशती-अभिराजराजेन्द्रमिश्र, प्रथम संस्करण जनवरी 1987, प्रकाशक-वैजयन्त प्रकाशनम्, 8 बाघम्बरी मार्ग, इलाहाबादम्
8. वाग्वघूटी-अभिराजराजेन्द्रमिश्र- अक्षयवट प्रकाशन, 8 बाघम्बरी मार्ग इलाहाबाद, प्रथम संस्करण-1979



- शोधच्छात्रा-साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः),
लखनऊपरिसरः


******

# मुनित्रयमते शिक्षाव्यवस्था

-प्रदीपचन्द्रढौंडियाल:

शिक्षाशब्द: संस्कृतव्याकरणे ''शिक्ष् विद्योपादाने'' धातो: ''गुरोश्च हल:'' इति पाणिनीय सूत्रेण अ प्रत्यये सति निष्पन्नो जायते। अस्यार्थो भवति विद्याग्रहणमिति। तत्र तदरचितग्रन्थेषु शिक्षाया: महत्वस्य विभेदस्य विभिन्नोद्देश्यानां च प्रतिपादनं विशदीकृतं विद्यते। एषा हि सर्वदात्री कल्पलतेति रूपेणाख्याता वर्तते। ज्ञानं बुद्धिरपि शिक्षाया अर्थे प्रयुक्तो भवति। ज्ञानं हि मानवस्य तृतीयनेत्रं मन्यते। सा शिक्षा सद्बुद्धिर्वा कामधेनु रूपेणाख्याता।

''शिक्षयति या सा शिक्षा'' शक्तुं शक्तो भवितुमिच्छा शिक्षा'' इति च द्वे व्युत्पत्ती शिक्षा शब्दस्य वर्तेते। षड्षु वेदाङ्गेषु शिक्षा स्वप्रमुखस्थानं भजते। शिक्षाविकासस्य परिष्कारं सम्पादयति। प्राचीनकाले शिक्षाया: धारणेयमासीत् शिक्षानाम नैका कुशलता प्रत्युत बह्वीनां कुशलतानां समन्वयो वर्तते साम्प्रतिके युगे धारणेयं परिवर्तिता परिवर्धिता च। यतोहि बालकानां सर्वाङ्गीणविकास एव सम्प्रति शिक्षेति स्वीक्रियते। शिक्षया छात्र: समाजस्य उपयोगिसदस्यरूपेण अवदानं करोतीति सुशिक्षाद्वारा एव विवेकशीलस्य बुद्धेर्विकासो जायते। ज्ञानस्य वृद्धिर्जायेत कर्तव्यपालने रुचिरुत्पद्यते ईश्वरीयालौकिक शक्तिषु विश्वास: सम्भवति, महत्सु सम्मानभावो जागर्ति मानव: सत्कर्मसु सद् प्रवर्तते। स्वदेशगौरवरक्षणे च मन: प्रवर्तते इति।

प्राचीनकाले दीयमानाया: शिक्षाया: प्रथमगुणो यत् शिक्षा गुरुकुलप्रणाल्या: प्रचलनचासीत्। अष्टमे वयसि वटवो मातृपितृभ्यां अध्ययनाय गुरुगृहे गच्छन्ति स्म। तत्र ब्रह्मचारिवेशमादाय छात्रा: पञ्चविंशतिवर्षपर्यन्तमध्ययनरता: सम्पूर्ण विद्यार्थी जीवनं यापयन्ति स्म। ब्रह्मचारिस्वरूपं चेत्थं ''चरणे ब्रह्मचारिणि''[1] सूत्रानुगमनेन ब्रह्म-वेद:, तदध्ययनार्थं व्रतमपि ब्रह्म, तच्चएतीति ब्रह्मचारी ''वेदतत्वं तपो ब्रह्म'' इत्यमरकोशानुसारं व्रतमपि ब्रह्मशब्देन गौण्या वृत्या विवक्षितम्। तद् व्रतमनुतिष्ठतीत्यर्थे 'सुप्यजातौ णिनिस्ताच्छील्ये'[2] सूत्रेण णिनिप्रत्यान्तोब्रह्मचारिशब्दो निष्पद्यते। गुरुकुलप्रणाल्यां छात्राणां गुरुवर्मानसपिता भवति स्म, यश्छात्रेभ्य: शिक्षां ददन् तेषां भरणपोषणादिना सहैव वस्त्रादीनां व्यवस्थां करोति स्म। 'समर्थ: पदविधि:'[3] इति सूत्रस्थं गुरुकुलपदं कथं संगच्छते इति भाष्ये लिखितम्। देवदत्तस्य गुरुकुलम्। इत्थं गुरुकुलप्रणाल्यां गुरोर्गृहं छात्रेभ्य: स्वगृहस्य विद्यालयस्य च बोधकं भवति स्म।

**उपनयनसंस्कार**: - उपनीय तु य: शिष्यं वेदमध्यापयेत् द्विज:[4] इति मनोरनुसारं कालेस्मिन् उपनयनसंस्कारस्य विशिष्टं महत्त्वमासीत् उपनयनादनन्तरम् अध्येतारश्छात्रा अध्ययने प्रवृत्ता: भवन्ति स्म-

**वेदान्नो वैदिका: शब्दा: सिद्धा: लोकाश्च लौकिका:।**[5]

तदानीं जन्मना जायते शूद्रः संस्कारात् द्विज उच्यते[6] इति

मनुस्मृतिसिद्धान्तमनुसृत्य उपनयनसंस्कारस्य प्राधान्यमासीत्। उपनयनसंस्कारोत्तरं छात्राणां नूतनस्य जीवनस्यारम्भो जायते स्म।

पाणिनिपतञ्जलिकात्यायनादित्रिमुनिमते मानवानां जीवने धर्मस्य महत्त्वपूर्ण स्थानमासीत्। तात्कालिकी शिक्षाऽपि धार्मिकतत्वैः समाविष्टा। यथा- प्रार्थना सन्ध्या यज्ञपूजादिभिः परिपूर्णा शिक्षा दीयते स्म। गुरुकुले छात्राः धार्मिककृत्यान् सम्पादयन्तो जीवनं यापयन्ति स्म।

'धर्मं चरति'[7] इति पाणिन्युपदिष्टेन सूत्रेण धार्मिकशब्दो निष्पद्यते।

कालेस्मिन् शिक्षा बाल्यावस्थामेव आरम्भा भवति स्म। यतोहि बाल्यकाले बालकानां सर्वव्यवहारहेतुर्गुणीभूता बुद्धिग्रहणशीला[8] स्मृतिश्च[9] प्रखरमनश्च[10] संस्कारग्राहकं भवति। यः बालकेभ्यः शिक्षाप्राप्त्यावसरं न दत्तवान्। सः शत्रुतुल्यः मन्यते स्म।

**माताशत्रु पिता वैरी येन बालो न पाठितः।**

**न शोभते सभामध्ये हंसमध्ये वको यथा।**[11]

**गुरुशिष्यसम्बन्धः-**

तस्मिन् काले गुरुशिष्यसम्बन्धः तादृशः भवति स्म। यादृशः सम्बन्धः पितापुत्रयोर्मध्ये भवति। 'शिष्या मानसपुत्रत्वेन गुरुणाङ्गीकृतास्ते गुरोराज्ञां'[12] प्रेम्णाऽङ्गीकृत्य कर्तव्यपालनं कुर्वन्ति स्म। इत्थमेव गुरुरपि मानस पितृत्वेन शिष्याणां भरणपोषणं योग[13] क्षेमा'[14] दीनाञ्च पूर्णध्यानं ददाति स्म। वास्तुतस्तस्मिन् काले गुरुशिष्ययोः[15] सम्बन्धो यादृशो मधुरः[16] पवित्रः[17] आसीत् सः सम्बन्धोऽधुना शिक्षालयेषु न दरीदृश्यते।

कालेस्मिन् शिक्षोद्देश्यं केवलं जीविकोपार्जनमेव नाऽसीत्, प्रत्युत शिक्षकैविद्यार्थिनां चरित्र[18] व्यक्तित्वयोर्विकासोपरि विशिष्टं ध्यानं दीयते स्म। ब्राह्ममुहूर्ते जागरणम् नित्याति सन्ध्यावन्दनादीनि सदा सत्यभाषणं[19] सरलजीवनं सर्वैः प्रेम्णा व्यवहार पालनम्, इन्द्रियनिग्रह, आत्मसंयमः, आत्मविश्वासादीना-मुद्देश्यमासीत्।

**निःशुल्कशिक्षा-**

मुनित्रयकाले शिक्षाव्यवस्थायाः एतादृशी मान्यताऽसीत् यत् सर्वेभ्यः मानवेभ्यः स्त्रीभ्यो ब्राह्मणक्षत्रियवैश्येभ्यश्च यदि शिक्षाग्रहणयोग्यता विद्यते तर्हि सर्वेभ्यः शिक्षा अवश्यमेव प्रदेया। समेभ्यः सार्वजनीना शिक्षादर्शपूर्तये शुल्करहिता शिक्षा दीयते स्म। समेषामध्ययवेच्छुकानां छात्राणां भोजनादि व्यवस्थाभिक्षाटनेन[20] भवति स्म समाप्तौ च शिक्षायां शिष्या गुरुभ्यः स्वक्षमतानुसारं दक्षिणामपि ददति स्म मनुस्मृत्यनुसारं गृहीतपि घश्छात्राः स्वगुरवे गावः अन्नानि अश्वादयश्च दातुं प्रभवन्ति स्म।

अनेन प्रकारेण शोधपत्रेस्मिन् परमवैयाकरणमुनित्रयपाणिनि-पतञ्जलिकात्यायनैः सूत्रवृत्तिवार्तिकेषु प्रतिपादित शिक्षायाः निर्देशनं प्रस्तुतं कृतं वर्तते। अनेन ज्ञातं भवति यत् एतादृशी शिक्षाप्रणाली प्राचीनभारते प्रचलिताऽसीत्।। वयं भारतीयाः स्वभारतीयतायामेव शिक्षाग्रहणं कर्तुमच्छामः परञ्च कथनमिदं सम्प्रति असंगतेः द्योतकम्। यतोहि ऋषिभूमिभारते अपसंस्कृतिपोषक एवं प्रचारकेभ्यः गौराङ्गेभ्यः प्रदत्तशिक्षां ग्रहणकर्तुं स्वमहानतायाः प्रयासं कुर्मः। परञ्च इदं भारतीयऋषिपरम्परासंस्कृतिसंस्काराणां विरूद्धोऽस्ति। यथा जलाऽभावे धान्यवपनम् एवं समये तस्य वृद्धिः एवं सुफलस्थ आकांक्षा कुतः सिद्ध्यति। अतः भारतीयशिक्षा भारतीयविधि द्वारा पाठ्येत् तर्हि छात्रेषु सामाजिक-नैतिक-चारित्रिक विकासो भविष्यति एवं राष्ट्रस्य विकासो भविष्यति।

**सन्दर्भसंकेतः-**

1. पा.सू. 6.3.86 2. पा.सू. 3.2.78 3. पा.सू. 2.1.1
4. मनु. 2.140 5. मा.भा. पास्पाह्निकम् 6. मनुस्मृति
7. म.भा. 4.4.41 8. सर्वव्यवहारहेतुगुणो बुद्धिर्ज्ञानम्। तर्कसंग्रह
9. संस्कारमात्रजन्यज्ञानं स्मृति। तर्कसंग्रह प्रत्यक्षखण्ड
10. सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। -तर्कसंग्रह प्रत्यक्षखण्ड
11. हितोपदेश मित्रलाभ 12. गुरोराज्ञा गरीयसी। 13. अलब्धलाभो योगः।
14. लब्धस्य परिरक्षणं क्षेमम्। 15. पा.सू. एतिस्तुशास्वृहजुषः क्यप 3.1.109
16. पा.सू. ऊषसुषिमुण्डकमद्यो रुः 5.2.107 17. पा.सू. पुवः संज्ञायाम् 3.2.185
18. पा.सू. अर्तिलूघूसूखनसहचर इत्रः। 3.2.184
19. सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्। -मनुस्मृति
20. एव हि दृश्यते लोक... द्वितीयां भिक्षां समासाध पूर्वां न जहाति। सञ्चयायैव प्रवर्तते। - म.भा. 2.1.1
   भिक्षाणां समूहो भैक्षम- काशिका 4.2.38
   भिक्षां चरतीति भिक्षाचरः। - सिद्धान्तकौमुदी 3.2.17
   भिक्षामट गां चानय, भिक्षाटनस्यैव प्राधान्यम्। -काशिका 2.2.29

- शोधच्छात्र-शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
लखनऊपरिसरः, लखनऊ

******

# विद्यालयीयपरिवेशे व्यक्तित्वम्

– गोकुलानन्दतिवारी

अद्यतने युगे मनोवैज्ञानिकाः मनोविज्ञानस्य क्षेत्रे सर्वाधिकं महत्वं ददति। यतः व्यक्तित्वस्य अध्ययनेन सम्पूर्णमानवस्य अध्ययनं कर्तुं शक्यते। शिक्षामनोविज्ञानं व्यवहारस्य अध्ययनं करोति। व्यवहारः व्यक्तित्वस्य अभिव्यक्तिः वर्तते। मानवः यथा व्यवहारं करोति तस्य व्यक्तित्वं तथैव प्रकटितं भविष्यति। प्रत्येकस्मिन् समाजे विद्यालये च बालकानां व्यक्तित्वविकासो रोचते। अतः विद्यालयीयशिक्षायाः प्रमुखोद्देश्यं बालकानां समुचितविकसनं वर्तते। व्यक्तित्वस्य समुचितविकासः योग्यतायाः समायोजनस्य च क्षमतां पुष्णाति।

**व्यक्तित्वपदस्यार्थः ( Meaning of Personality ) –**

व्युत्पत्तिदृष्ट्या वि उपसर्ग पूर्वकात् अञ्ज् धातोर्निष्पन्नं व्यक्तिरिति पदम्। व्यक्तित्वपदमाङ्गल भाषायाः पर्सनालिटी (Personality) इति पदस्य रूपान्तरणं वर्तते। पदमिदं मुखावरणार्थकात् पर्सोना (Persona) इति ग्रीकभाषात् निष्पन्नं पुराः नराः स्वगृहीतपात्रानुगुणं मुखावरणं धारयन्ति स्म। मुखावरणवाचि पदमिदं पश्चात् तत्पात्रगुणवाचि अभवत्। कालक्रमेण मानवानां। ये असाधारणाः गुणाः वर्तन्ते तद्वाचि जातम्।

**'व्यक्तित्वम्'** इति शब्दः अनेकेषु अर्थेषु प्रयुक्तः आलपोर्ट मनोविज्ञानी, तेन व्यक्तित्वं स्वकीय ग्रन्थे पञ्चाशत् (50) लक्षणैः लक्षितम्। अस्य पदस्यार्थस्तु विपुलो वर्तते। मानवस्य शोभनमाकरं किञ्चिद् सूचयति। मानवः स्वसाधारण्या प्रक्रियया कार्यं करोति अन्यैः सह व्यवहरति च, इत्थं क्रियमाणः व्यवहारः मानवस्य व्यक्तित्वं प्रकाशयितुमलं भवति। मानवेषु केचन निर्भीकाः केचन भीताः केचन क्षमावन्तः केचन निर्दयाः भवन्ति। केचन व्यक्तित्वस्याभिप्रायः मानवस्य बाह्यशारीरिकाकारेण मन्यते। एषा व्याख्या न समीचीना। तत्सम्बन्धानि अनेकानि उदाहरणानि द्रष्टुं शक्यन्ते, यत् बाह्याकृतिः तु आकर्षका परन्तु तेषां व्यक्तित्वम् उच्चं न भवति। अतः वक्तुं शक्यते यत् व्यक्तित्वं केवलं बाह्यसंरचनया एव निर्धारितं न भवति अपितु तस्मै केचन आन्तरिकगुणाः अपि अपेक्षिता, आन्तरिकगुणान् बिना श्रेष्ठव्यक्तित्वं न सम्भवति।

**व्यक्तित्वस्य परिभाषाः ( Defination of Personality ) –**

**1. ऑलपोर्ट महोदयानुसारम्** – 'व्यक्तित्वं मनोदैहिक व्यवस्थानां तत् गत्यात्मकसङ्घटनं वर्तते यत् वातावरणेन सह तस्य अपूर्व समायोजनं निर्धारितं करोति'[1]।

**2. बुडवर्थ महोदयः लक्षयति**– 'व्यक्तित्वेन तदव्यवहारस्य बोधो भवति यः एकस्य कृते प्रियः तथा अन्यस्य कृते अप्रियः'[2]।

**3. बोरिंग महोदयानुसारम्**- 'वातावरणेन सह अपूर्व स्थायि च समायोजनमेव व्यक्तित्वमस्ति'[3]।

**व्यक्तित्वस्य प्रभावककारकाणि ( Inffuencing Factors Of Personality )** -

व्यक्तित्वस्य प्रभावककारकाणि निम्नलिखितानि सन्ति।

**1. शारीरिकप्रभाव:** - शरीरस्य स्नायुमण्डलस्य क्रियाणाञ्च व्यक्तित्वस्य विकासे अप्रत्यक्षरूपेण प्रभावो भवति। शारीरिकदोष: मावस्य व्यक्तित्वं प्रभावयति, मानवस्य बुद्धि:, मानसिकयोग्यता, मानसिक आरोग्यता च व्यक्तित्वविकासे सहायिका भवन्ति। दुर्बलमानवस्य व्यक्तित्वं पूर्णरूपेण विकसितं न भवति। तथैव शारीरिक संरचना अपि व्यक्तित्वं प्रभावयति।

**2. वंशानुक्रमस्य प्रभाव:** - मनोवैज्ञानिकानां मतानुसारै: व्यक्तित्वविकासे वंशानुक्रमस्य प्रभाव: अनिवार्यरूपेण भवति। वंशानुक्रमस्य कारणेनैव मानवानां शारीरिकं मानसिकञ्च लक्षणेषु भिन्नता दृष्टिगोचरा भवति।

**स्किनर महोदयानुसारम्** "मानवस्य व्यक्तित्वं स्वाभाविकविकासस्य परिणाम एव नाऽस्ति अपितु पितृभि: केचन शारीरिक-मानसिक-संवेगात्मक-व्यावसायिक शान्ति: प्राप्नुवन्ति" केचन मनोवैज्ञानिका: कथयन्ति यत् मानवस्य विकासे वंशानुक्रम: विशेषरूपेण योगदानं ददाति।

**3. वातावरणस्य प्रभाव:** - व्यक्तित्वविकासे सर्वाधिकप्रभाव: वातावरणस्य भवति। मानव: जन्मना एव निश्चितवातावरणे निवसति। स: यादृशं वातावरणं प्राप्नोति, तादृशमेव तस्य व्यक्तिवविकासो भविष्यति।

**4. सामाजिकवातावरणम्** - सामाजिकवातावरणस्य प्रभाव: सर्वाधिक्येन दृश्यते **लारेंस महोदयानुसारम्** - संस्कृति: सा आधारभूमि: वर्तते यया व्यक्तित्वं विकसितं भवति। एकेन मनोवैज्ञानिकेन उक्तं यत्- 'मानवस्य व्यक्तित्वं वातावरणेन गुम्फितं भवति। बालक: जन्मकाले भाषा-आचार-व्यवहार इत्यादिषु विषयेषु आपरिचितो भवति। परन्तु सामाजिक वातावरणस्य सम्पर्के आगत्य शनै:-शनै: सर्वं जानाति।

**5. सांस्कृतिकवातावरणम्** - समाज: व्यक्तित्वस्य निर्माणं करोति, संस्कृति: तस्य स्वरूपं निश्चितं करोति, संस्कृतिविशेषस्य स्व-आचार-व्यवहारा: धार्मिककार्याणि च भवन्ति मानव: यस्यां संस्कृतौ उत्पन्नो भवति, पालन-पोषणं च भवति। तद्नुरूपमेव तस्य व्यक्तित्वस्य स्वरूपं निश्चितं भवति। अत: व्यक्तित्वं सांस्कृतिक वातावरणं प्रभावयति।

**6. पारिवारिकवातावरणम्** - व्यक्तित्वनिर्माणस्य कार्यं प्रथमतया परिवारे एव भवति, यादृशं परिवारस्य स्वरूपं भवति तथैव बालकस्य व्यक्तित्वस्य विकासो भवति। उदाहरणार्थं यदि एक: परिवार: शिक्षितो भवति। शिक्षितपरिवारे जना: सभ्या: शिष्टाश्च भवन्ति। तर्हि तस्मिन्नैव परिवारे उत्पन्न: बालकोऽपि शिष्ट: सभ्यश्च भविष्यति। परिवारस्य सदस्यानां मध्ये सम्बन्ध: तेषां शिक्षा, आचारव्यवहार: जीवनयापनस्तर: सामाजिकार्थिकस्थिति: इत्यादय: बालकस्य व्यक्तित्वं प्रभावयन्ति।

**7. विद्यालयस्य प्रभावः** – विद्यालयस्य वातावरणम् अध्यापकानां छात्राणाञ्च व्यवहारः पाठ्यक्रमश्च बालकानां व्यक्तित्वनिर्माणे सहाय्यं कुर्वन्ति। येषु विद्यालयेषु वातावरणं सहानुभूतेः परस्परकार्यकरणस्य भावनायाश्च शिक्षणं दीयते। तेषां बालकानां व्यक्तित्वविकासं समीचीनं भवति। एतेन वातावरणेन समूहभावना विकसिता भवति विद्यालयेषु यदि मनोरञ्जनस्य साधनानि, क्रीडाप्रबन्धः, उच्चादर्शाः शिक्षाव्यवस्था, पुस्तकालयः, वाचनालयश्च सुवर्द्धनं भवति तर्हि तत्र बालकानां व्यक्तित्वविकासः सम्यग्रीत्या भविष्यति। अतः वक्तुं शक्यते यत् व्यक्तित्वविकासे विद्यालयस्य महत्वपूर्णा भूमिका भवति।

प्रायः शिक्षायाः प्रमुखोद्देश्यं व्यक्तेः सर्वाङ्गीणविकासः वर्तते। सर्वाङ्गीणविकासेन व्यक्तित्वस्य विकासोऽपि भविष्यति। अतः शिक्षाशास्त्रिणां कृते व्यक्तित्वस्याध्ययनं महत्वपूर्णं वर्तते। व्यक्तित्वविकासेन अनेक शक्तीनां सङ्गटनं भवति। अनेकप्रत्ययानां स्पष्टीकरणं भवति। विश्वासः आत्मविश्वासश्च विकसितो भवित। अतः औपचारिकशिक्षाप्राप्त्यर्थं विद्यालयं महत्वपूर्णसाधनं मन्यते। विद्यालयं समाजस्य एका महत्त्वपूर्णसंस्था वर्तते। अनया संस्थाया छात्राः उन्नतिपथे अग्रेसरन्ति। विद्यालयः छात्राणां कृते एतादृशं स्थानं भजते यत्र तेषं स्कन्धेषु राष्ट्रस्य भविष्यभारं वर्तते। विद्यालयाः बालकानां कृते वातावरणस्यापि निर्माणं कुर्वन्ति। यस्मिन् उषित्वा ते सुनागरिकाः स्युः। **भारतीयशिक्षा आयोगेन- 1964-66** तमे वर्षे इयं संस्तुतिः प्रदत्ताः **''भारतस्य भविष्यं तस्य कक्षायां निर्मितं भवन्नास्ति।''**[4] अतः छात्राणां व्यक्तित्व विकासार्थं तेषु आत्मविकासः, आत्मसम्मानं, शैक्षिकावधारणा इत्येतादृशान् सद्गुणान् उत्पादयिकं इदानीं विद्यालयीयशिक्षायाः नितान्त आवश्यकता दरीदृश्यते। औपचारिकशिक्षाया आवश्यकता विषये निम्नबिन्दव अत्र प्रस्तूयन्ते। तद्यथा-

1. सुव्यवस्थितव्यक्तित्वविकासाय।
2. संयमितशैक्षिकवातावरणनिर्माणाय।
3. शैक्षिक-सामाजिक-सांस्कृतिक-शारीरिक-मानसिकविकासाय।
4. सुव्यवस्थित-जीवनयापनाय।
5. ऐक्यभावनायाः विकासाय।

**विद्यालयी परिवेशः** – **'नास्ति विद्यासमं चक्षुः'**[5] कमपि विषयं अधिगन्तुं तस्य पदस्य शाब्दिकार्थं ज्ञातुं सर्वेषां जिज्ञासा भवति, को नाम विद्यालयः? इति विद्याशब्दः विद् धातोः क्यप् टाप प्रत्यये कृते सति सिद्ध्यति। यस्यार्थः भवति ज्ञानम्। आलयः इत्यस्य गृहमित्यर्थः। अर्थात् विद्यायाः गृहम्, 'परिवेश' इत्यर्थः वातावरणम्। अर्थात् विद्यालयस्य वातावरणम्। विद्यालयस्य वातावरणेन तात्पर्य जायते यत् निश्चितोद्देश्य प्राप्यर्थं तत्रत्यः सम्पूर्णव्यवस्थादिकं भवनमित्यादीनां सम्पादनमिति सर्वं विद्यालयीय परिवेशे आगच्छन्ति। वस्तुतः विद्यालयः तत् सरस्वतीमन्दिरमस्ति यत्र बालकानां अन्तर्निहितशक्तीनां पूर्णविकासाय सर्वाधिक प्रयत्नः क्रियते। तेषां मनमस्तिष्कस्य पूर्णविकासाय

सक्रम: व्यवास्थितश्च प्रयास: क्रियते। विद्यालये तेषां शारीरिक-मानसिक-रचनात्मक-संवेगात्मक-सर्जनात्मक-बौद्धिक-सामाजिक-सांस्कृतिक-विकास: भवति।

अत: विद्यालयस्य सम्पूर्णवातावरणं अनेन प्रकारेण निर्मीयेत् येन छात्रान् पूर्णसन्तुष्टि: प्राप्येत। छात्राणां मनोबलशक्तिं उन्नतार्थं विद्यालयस्य स्थिति: कृत्रिमो न भूत्वा स्वाभाविकी भवेत्।

**कूप्पूस्वामी महोदयानुसारम्** -

''एक: सुसम्यक् विद्यालय: एतादृश: वातावरणं प्रस्तौति य: छात्राणां रुच्यावश्यकतानाञ्च पूर्त्यर्थं विभिन्न क्रियाभि: सह परिपूर्णं भवति। एतादृश: विद्यालय: स्वस्थ्यमानसिकविकासस्य एकं वास्तविकं कारणं वर्तते''।[6]

अधुना शैक्षिकावश्यकता प्राचीनकालाद् भिन्ना वर्तते, पुरातने समये तु गुरुव: वृक्षाणां छायासु शिष्यान् पाठयन्ति स्म। बालका: अनुशासनपूर्वकं पठन्ति स्म। निश्चितरूपेण विद्यालयस्य एतादृशं वातावरणम् आसीत्। यत्र बालक: अनुभवति स्म। यत् स: एकस्मिन् परिवारे वसन्नस्ति येन तेषु सामूहिकभावनाया: विकास: स्यु:।

**जे.डी. हॉल** महोदयानामभिमतमस्ति यत् ''एकस्मिन् शब्दे विद्यालयसंघटनस्य तात्पर्यं कथ्यते चेत् समन्वय:। अर्थात् उपलब्धभौतिकाभौतिकसाधनानां समुचितव्यवस्था तथा तेषु सामञ्जस्य स्थापनम्। आवश्यकसाधनानां प्राप्यते पर्याप्त प्रयासश्च संघटनमस्ति येन अधिकाधिक शैक्षिकोद्देश्यानां प्राप्ति: भवति।[7]

यदि विद्यालय: सुव्यवस्थित: अस्ति तत्र जायमान: कार्यक्रम: सुनियोजित अस्ति। उद्देश्या-धारितश्चास्ति तर्हि निश्चितरूपेण तस्य शिक्षासंघटनस्य शैक्षिकवातावरणमुन्नतं भवति। किन्तु आधुनिके विकटेस्मिन् युगे विज्ञानस्य मनोविज्ञानस्योन्नते: कारणात् शिक्षणविधौ अपि जटिलता आगता। साम्प्रतं विद्यालयाय विषयं विशिष्टोपकरणानि शिक्षणार्थं अपेक्ष्यन्ते। परन्तु अस्माकं देशे सहस्रशा: विद्यालया सुविधापूर्णसौन्दर्ययुक्तवातावरणे नास्ति। कोलाहले स्थानके, गहनान्धकारे अस्माकं विद्यालया: स्थापिता वर्तन्ते अतएव एतादृशेषु विद्यालयेषु छात्राणां शारीरिकं-मानसिकं-चारित्रिकं च विकासं कथं कर्तुं शक्नुम: प्राय: विद्यालयेषु वर्तमान समयानुकूलावश्यकता सम्पूर्त्तये अवकाश एव नास्ति।

**डीवी महोदयानुसारम्** - The School is a special environment where a certain quality of life and certain types of activitis and accupations are provided with the object of securing childs devlopment along desirable lines.[8]

लेविन महोदयेनऽपि पर्यावरणस्य त्रय: आयामा: ज्ञापिता:। येन विद्यालयस्य सुसमीचीनं वातावरणं निर्मीयते, विद्यालये समृद्धं शान्तश्च वातावरणं क्रीडाङ्गणे पाठ्येतरक्रियाणामायोजनं प्रोत्साहपुरस्सरं भवेत्।

कर्ट लेविनमहोदयानुसारेण-

भौतिकपर्यावरणम्	सामाजिक तथा सांस्कृतिक पर्यावरणम्	मनोवैज्ञानिकपर्यावरणम्

Physical environment	Social cultural environment	Psycnological environment

**निष्कर्षः** - निष्कर्षरूपेण वक्तुं शक्यते यत् सुव्यवस्थितं विद्यालयीय वातावरणमेतादृशं भवति यत्र शिक्षकाः छात्राश्च औपचारिक अनौपचारिकरूपेण अंतःक्रिया कुर्वन्तः दृश्यन्ते। वस्तुतः बालकाः स्वकीयामूल्यं समयं तु विद्यालये एव यापयन्ति यथा शिक्षणप्रक्रियायामध्यापकः छात्रः, पाठ्यक्रमः, प्रमुखः भवति तथैव वातावरणमपि प्रमुखं भवति। विषयेऽस्मिन् तु अस्माकं शास्त्रमपि कथयति यत् **'संसर्गजादोषगुणाः भवन्ति'**। जनाः यादृशं वातावरणं प्राप्नुवन्ति तादृशं स्वकीयं व्यवहारं परिशोधयन्ति अर्जयन्ति च। एतदर्थं वातावरणमप्येकं मुख्यं कारकं भवति शिक्षणे। अत एव यादृशः विद्यालयः भवति तादृशः एव तत्रत्यानां छात्राणां व्यवहारः भवति। बालकानां सर्वाङ्गीणविकासाय विद्यालयस्य स्वरूपं, व्यवस्था, वातावरणं, प्रशासनं च महत्वपूर्णं भवति। एतदेव एकं सुव्यवस्थितं उत्तमं विद्यालयीय वातावरणं वक्तुं शक्यते यस्मिन् छात्राणां सम्पूर्णं व्यक्तित्वविकासो भवति।

**सन्दर्भग्रन्थसूची:-**


1. Personality is the dynamic organisation within the individual of those Psychophisical systems the determine his uniqul adjustment to his eonvironment,- Allport-Psycilogical interpretaion new York; Henry Holt.
2. Personality refers Behavior which is pleading or offensive to thers - Wood Worth.

3 Boring.	4. भारतीय शिक्षा आयोग	5. महाभारत 12.319.6	6. कूप्पूस्वामी

7. J.D. Hall, School manegement, Prof, Madan Mohan Jha.
8. John Diwiee


**सहायकग्रन्थसूची-**


1. Developmental Psychology	2. आधुनिक शिक्षामनोविज्ञानम्।	3. विद्यालयप्रबन्धनम्।

4. शिक्षामनोविज्ञानम्।	5. प्राच्यशिक्षादर्शनम्।



- शोधच्छात्र-शिक्षाशास्त्रविभागः

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः),

लखनऊपरिसरः, लखनऊ


******

# उपनिषद्वाङ्मये सृष्टिक्रमवर्णनम्

– नीलम

भारतीय-वाङ्मये उपनिषदां स्थानमत्यन्तं महत्वपूर्णमस्ति। वैदिक-सूक्तेषु यस्या: दार्शनिक विचारधाराया: प्रारूपं प्राप्यते तस्य विकसितं रूपम् उपनिषत्सु दृष्टिगोचरं भवति। यदि वेदरूपवृक्षस्य ब्राह्मणानि शाखा: पुष्पाणि सन्ति तर्हि इदमपि स्वीकरिष्यते यत्तदारण्यकरूप पुण्यस्य सुगन्धरूपा उपनिषद् एव अस्ति। सर्व दार्शनिक-धार्मिक सम्प्रदायानां जन्मभूमि: उपनिषद् एव अस्ति। उपनिषत्सु एवंविधा: मौलिकविचारा: उपदेशाश्च निर्दिष्टा: सन्ति। ये अद्यापि मानवस्य दार्शनिकी-जिज्ञासां शमयितुं तथा परमं सत्यं दर्शयितुं समर्था: सन्ति।

गुरोरतिसामीप्ये उपविश्य यद्ज्ञानं लभ्यते तद् 'उपनिषत्' कथ्यते। आचार्यशंकरेण उपनिषद् व्याख्यानमित्थं कृतमस्ति- ''ये मनुष्या: भक्त्या श्रद्धया च सह आत्मभावेन ब्रह्मविद्यां प्राप्नुवन्ति सा विद्या तेषां गर्भवासं जन्ममरणादिक- रोगाद्यनर्थं विनाशयति परब्रह्मणश्च प्राप्तिं कारयति तथा अविद्यादिसंसारकारणानि समूलं नाशयति। प्राचीनकाले अस्या उपनिषद् विद्याया अध्ययनमध्यापनं रहसि अर्थात् एकान्ते स्थानेऽभवत्, अत उपनिषद्-ज्ञानं रहस्य-विद्या इति नाम्ना ज्ञायते। इत्थं ग्रन्थेषु रहस्यात्मक ज्ञानस्य, ब्रह्मविद्याया: चर्चा क्रियते, ते 'उपनिषद्' कथ्यन्ते।

छान्दोग्योपनिषद् प्राचीनताया: गम्भीरताया: एव ब्रह्मज्ञानप्रतिपादनस्य दृष्ट्या उपनिषत्सु नितान्तं प्रौढा, प्रामाणिकी, प्रमेयबहुला चास्ति। अत्र अष्ट अध्याया: सन्ति। प्रथमे विविध विद्यानाम्, साम्नस्तथा ओङ्कारस्य स्वरूपस्य मार्मिकं विवेचनम्, द्वितीय शैल-उद्गीय, तृतीये देवमधुरूपे सूर्योपासना, गायत्री- वर्णनम् तथा अंगिरसहारा श्रीकृष्णाय अध्यात्मशिक्षा एवमन्ते अण्डात्सूर्यस्य जन्म वर्णितमस्ति। चतुर्थे रैक्वस्य दार्शनिकानि तथ्यानि, सत्यकामजाबाले: कथाया: विस्तृतं वर्णनम् अस्ति। पंचमे प्रवाहण-जैबले: दार्शनिका: सिद्धान्ता: तथा केकय-अश्वपते: सृष्टि-विषयकतथ्यानां वर्णनमस्ति। षष्ठे आरूणे: दार्शनिकताया: अत्यन्त रोचकं विवेचनं कृतमस्ति। सप्तमे सनदत्कुमारस्य तथा नारदस्य विश्व-विश्रुतौ वृतान्त: उपस्थापित: अस्ति। अष्टमे अध्याये इन्द्रविरोचनाख्यानम् एवम् आत्मावगते: व्यावहारिकोपायानस्य दर्शनं भवति। तेषां जीवविष्टानां रवतवेषां पक्ष्यादीनां भूतानामेषामिति प्रत्यक्षनिर्देशात्न तु तेज: प्रभृतीनां तेषां त्रिवृत्करणस्य वक्ष्यमाणत्वादसति त्रिवृत्करणे प्रत्यक्षनिर्देशानुपपत्ति: देवताशब्दप्रयोगाच्च तेज: प्रभृतिषु ''इमास्ति स्त्रो देवता'' इति। तस्मात्तेषां खटवेषां भूतानां पक्षिपशुस्थावरादीनां त्रीण्येवनातिरिक्तानि बीजानि करणानि भवन्ति। कानि तानित्युच्यन्ते। आण्डजमण्डाज्जात मण्डजमण्डजमेवाऽऽणऽजं पक्ष्यादि। पक्षिसर्पादिभ्यो हि पक्षिसर्पादयो जायमाना दृश्यन्ते। तेन पक्षिणां बीजं सर्प: सर्पाणां तथाऽन्यदप्यण्डाज्जातं तज्जातीयानां बीजमित्यर्थ:। नन्वण्डाज्जातमण्डजमुच्यतेऽतोडण्डमेव बीजमिति युक्तं, कथमण्डजं बीजमुच्यते? सत्यमेवं स्याद्यादि त्वादिच्छातन्त्रा तु श्रुतिर्यत आहाऽऽण्डजाद्येव बीजं नाण्डादीति दृश्यते

चाण्डजाद्यभाव तज्जातीयसंतत्यभवो नाण्डाद्यभवे। अतोऽण्डजादीन्येन बीजान्यण्डजादीनाम् तथा जीवाज्जातं जवजं जरयुजमित्येतत्पुरुषादि। उद्भिज्जमुद्भिनत्तीत्युद्भित्स्थावरं ततो जातमुद्भिज्जं धानावोद्भित्ततो जायत इत्युदिज्जं स्थावरं स्थवराणां बीजमित्यर्थः। स्वेदजसंशोक जयोरण्डजोद्भिज्जयोरेण यथा संभवमन्तर्भवः। एवं ह्यवधारणं त्रीण्येव बीजानीत्युपन्नं भवति।

सेयं प्रकृता सदाख्या तेजोऽबन्नयोनिर्देवतोवतैक्षतेक्षितवती यथापूर्व बहु स्यामिति। तद्रेण बहुभवनं प्रयोजनं नाद्यापि निवृत्तमित्यत ईक्षां पुनः कृतवती बहुभवनमेव प्रयोजनुररीकृत्य। कथम्। हन्तेदानीमहमिमा यथोक्तास्तेन आद्यास्तिस्त्रो देवता अनेन जीवतेति स्वबुद्धिस्थं पूर्वसृष्ट्यनुभूतं प्राणधारणमात्मानमेव स्मरन्त्याहानेन जीवेनाऽऽत्मनेति। प्राणेधारणकर्त्रात्मनेति वचनात्स्वात्मनोऽव्यतिरिक्तेन चैतन्यस्वरूपतयाऽविशिष्टे नेत्येतदर्शयति। अनुप्रविश्य तेजोऽबन्नभूतमात्रासंसर्गेण लब्धविशेषविज्ञाना सती नाम च रूपं च नामरूपे व्याकरणाणि विस्पष्टमाकरवाण्यसौ नामाऽयमिदं रूप इति व्याकुर्यामित्यर्थः।

ननु न युक्तमिदमसंसारिण्याः सर्वज्ञाया देवताया बुद्धिपूर्वकमनेक- शतसहस्रानर्थाश्रयं देहमनुप्रविश्य दुःखमनुभविष्यामीति संकल्पनमनुप्रवेशच स्वातन्त्र्ये सति? सत्यमेवं न युक्तं स्याद्यादि स्वेनैवाविकृतेन रूपेणानुप्रविशेषं दुःखमनुभवेयमिति च संकल्पितवती न त्वेवम्। कथं तर्हि। अनेन जीवनाऽऽत्मनाऽनुप्रतिश्येति वचनात्। जीवो हि नाम देवताया आभासमात्रम्। बुद्धयापि भूतमात्रा संसर्गजनित आदर्श इव प्रविष्टः पुरुषप्रतिबिम्बो जलादिष्विन च सूर्यादीनाम् अचिन्त्यानन्तशक्तिमत्या देवताया बुद्धयादिसम्बन्धश्चैतन्याभासो देवतास्वरूपविवेकाग्रहणनिमित्तः सुखी-दुःखी मूढ़ इत्याद्यनेकविकल्पप्रत्ययहेतुः। छायामात्रेण जीवरूपेणानुप्रविष्टत्वाद्देवता न दैहिकेः स्वतः सुखदुःखादिभिः संबध्यते। यथा पुरुषादित्यादय आदर्शोदकादिषुच्छायामात्रेणानुप्रविष्टा आदर्शोदकादिदोषैर्न संबध्यते, तद्वदेवताऽपि।

**सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्वाह्यदोषैः।**

**एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन वाह्यः॥**[1]

सैव तिस्रो देवता अनुप्रविश्य स्वात्मावस्थे बीजभूते अव्याकृते नामरूपे व्याकरणवाणी तीक्षित्वा-तासां च विसृणां देवतानामेकैकां त्रिवृत त्रिवृतं करवाणि। एकैकस्यास्त्रिवृत्करणं एकैकस्याः प्राधान्यं द्वयोर्द्वयोर्गुणभावो, अन्यथा हि रज्ज्वा इवैकमेव त्रिवृत्करणं स्यात्। न तु तिसृणां पृथक्पृथक्तिवृत्करणमिति। एवं हि तेजोऽनन्नानां पृथङ्नामप्रत्ययलाभः स्यान्तेज इदमिमा आपोऽन्नमिदमिति च पृथङ्नामप्रत्ययलाभे देवतानां सम्यग्व्यवहारस्य प्रसिद्धिः प्रयोजनं स्यात्। एवमीक्षित्वा सेयं देवतेमास्तिस्त्रोदेवता अनेनैव यथोक्ते नैव जीवेन सूर्यबिम्ब वदन्तः प्रविश्य वैराजं पिण्डं प्रथमं देवादीनां च पिण्डानुप्रविश्य यथा संकल्पमेव नामरूपे-व्याकरोदसौ-नामाऽमिदं रूपं इति।

**तपसा चीयते ब्रह्म ततोऽन्नमभिजायते।**

**अन्नात् प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्॥**

ब्रह्मणः विश्वोत्पात्तप्रकार उच्यते-तपसा चीयते ब्रह्म। तपसा-ज्ञानेन। यस्य ज्ञानमयं तपः इति

वक्ष्यमाणत्वात्। चीयते-उपचीयते। इति संकल्परूपेण ज्ञानेन ब्रह्म सृष्टयुन्मुखं भवतत्यर्थः। ततोऽन्नमभिजायते। अद्यतेऽति च भूतानि इति भोग्यभोक्तृरूपचेतनाचेतनसंघातलक्षणमन्याकृतं परस्मात् ब्रह्मणो जायत इत्यर्थः। अन्नात् प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्। तस्मात् समविष्टरूप चिदचित्संघातात्मकात् अन्नशब्दितादव्याकृतात्, मुख्यः प्राणः, अन्तःकरणम्, सत्यसत्यशब्दितो भोक्तृवर्गः, स्वर्गादयो लोकाः, कर्मसु आयत्तममृतं च, अमृतत्वसाधनं कर्मेति यावत्। अथवा कर्मसु इति निर्धारणे सप्तमी। कर्ममध्ये मोक्षार्थ कर्मेत्यर्थः। एतत् सर्वमभिजायत इति पूर्वेणान्वयः। एतत् सर्वं भाष्य-श्रुतप्रकाशिकयोः स्पष्टम्।

एतेन संकल्परूपाधिष्ठानशक्तयुपचिताक्षरब्रह्माणा अधिष्ठतात् प्रधानादेव भोग्यभोगोपकरण-भोगस्थानरूपमिदं विविधविश्वमुत्पद्यते कृमेणैतेनेति भूतोपादानत्वमक्षरस्य समर्थितं भवति।

**यस्सर्वज्ञस्सर्ववित् यस्य ज्ञानमयं तपः।**
**तस्मादेतद्ब्रह्म नामरूपमत्रं च जायते।।**[2]

उक्तं विश्वसम्भवमनुवदस्ताप: शब्दं विवृणोति-साधारणैः असाधारणैश्च प्रकारैः यः सर्व जानाति, यस्य सिसृक्षोः तपः संकल्पात् नातिरिच्यते, तसमादक्षराद्यत्सर्वस्य मूलं प्रधानं ब्रह्मशब्दवाच्यं तज्जायते। ननुः अनादेरनन्तस्यास्य जनिः कथमित्यत्राह- नाम रूपं जायते- नामरूपान्तरविशिष्टतया जायत इति व्यपदेशः योग्य इति भावः।

ननु किं रूपान्तरम्, येन नामान्तरं तत्राह- अन्नं च जायते-भोग्यपृथिव्याद्याकारविशिष्टं भवतीति यावत्। चकाराद्भोगोपकरभोगस्थानाद्यात्मना परिणतिः सङ्ग्रह्यते। परे तु- पूर्वमन्त्रेऽपि ब्रह्मशब्दः प्रधानपर एव। यथा बीजामंकुरावस्थातः प्राक्पृथित्पतरेवोच्छूनतां प्राप्नोत्यधिष्ठानमहिम्ना, तथा तपोलक्षणेनाधि ष्ठानमहिम्नाच्छूनतां प्राप्नोति इत्युच्यते- तपसा चीयते ब्रह्म इति। एतेन प्रधानस्य महदवस्थातः प्राक्तनमक्षराव्यक्तावस्थाद्वयमुक्तं भवति। ततः प्रधानादुपचयं प्राप्तादन्नं महदादिपृथिव्यन्तं समष्टितत्त्वं जायते ततश्च यथासम्भवं प्राणादि। ननु चीयतां नाम तपसा संकल्पलक्षणेन प्रधानम्, नैतावता दृष्टान्त इव दार्ष्टान्तिके अधिष्ठानोपादानत्वलाभः, - परिणाम्युपादान हि बीजादि पृथिव्याद्यधिष्ठानमहिम्नोपचीयमानं तदधिष्ठितं सदेव अंकुरात्मना परिणमति, न चेह तथेत्याशं कामपनुदन्नाह- तस्मादिति। न केवलं परस्य ब्रह्मणः संकल्पेनोपचितमनन्याधिष्ठितं परिणमति येन निमित्तत्वमात्राशंका स्यात्, किन्तु पृथिवीतः बीजमिवौषध्यात्मनोर्णनामित ऊर्णेव तत्त्वात्मना तस्मात्सर्वज्ञात् तत्संकल्पेनोपचितं प्रधानं विभक्तनाम-रूपमन्नाद्यात्मना आविर्भवति। तस्मादित्यपादाने पञ्चमीति प्राहुः।

सन्दर्भसंकेतः - 1. छान्दोग्योपनिषत्- पृष्ठ 251 2. मुण्डकोपनिषद्-पृष्ठ संख्या- 44, 45, 46, 48

संदर्भग्रंथसूची-

1. छान्दोग्योपनिषत्- श्रीमत्स्वामी विद्यानन्दगिरि जी महाराज, प्रकाशक- श्री कैलास विद्या प्रकाशन- कैलास आश्रम, कैलास गेट, ऋषिकेश द्वारा कैलास विद्यातीर्थ, आदिशंकराचार्य स्मारक, नई दिल्ली-110001
2. शैव-उपनिषद : आ0 महादेवशास्त्रिणा, प्रकाशक- ओरियण्टल बुक सेण्टर, जवाहरनगर दिल्ली-110007, प्रथम संस्करण-2008 -

शोधच्छात्रा-साहित्यविभागः राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) लखनऊपरिसरः,

# पुराणवाङ्मयेषु सृष्टिः

– बृजेशचन्द्र उपाध्यायः

सृष्टिः पुराणानां पञ्चलक्षणेष्वाद्यं लक्षणम्। पुराणेषु सृष्टिविद्यायाः वैशद्येन सह वर्णनं कृतमस्ति। यथोक्तम्–

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंश्यानुचरितं चेति पुराणं पञ्चलक्षणम्।।**[1]

सृष्टिरेव सर्गशब्देनात्राऽभिहिता वर्तते। पुराणेषु संसारस्य रचना कथमभवत्, सृष्टेः किं कारणम्, इत्यादि–विषया वर्णिताः सन्ति। श्रीमद्भागवते उक्तं यद् यदा प्रकृतिस्त्रिभिर्गुणैः साम्यावस्थायां भवति तदा प्रकृतेः त्रिगुणसाम्यावस्थायां क्षोभ उत्पन्नः भवति। क्षोभात् महत्तत्त्वस्याविर्भावः भवति। महत्तत्त्वादहङ्कारोऽहङ्कारादेकादशकरणानि पञ्चतन्मात्राश्च जायन्ते। पञ्चतन्मात्राभ्यश्च पञ्चमहाभूतानि समुत्पद्यन्ते। एवं संसारस्य रचना भवति। अयमेव सर्ग (सृष्टि) इत्युच्यते पुराणेषु। यथोक्तं श्रीमद् भागवतमहापुराणे–

**अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः।**
**भूतामात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते।।**[2]

पौराणिकसृष्टिविज्ञाने सांख्यदर्शनद्वारा निर्दिष्टा सृष्टिविद्या विशेषतः अवलम्ब्यते समाश्रयते च। सांख्यस्य प्रभावः पुराणेषु विशेषरूपेण आपतितोऽस्ति। पुराणेषु वर्णितं, सृष्टितत्त्वं महाभारतस्य तथा मनुस्मृतेः एतद्वर्णनान्तरं कृतमस्ति। पुराणकालीनं सांख्यं निरीश्वरं दर्शनं न सत् सेश्वरं दर्शनमस्ति। आलोचकेन अल्पप्रयासेनैव प्रतीयते। ध्यातव्यं तत्त्वमिदमेव यत्पुराणे सृष्टिप्रसरणमवश्यमेव सांख्येन सातिशयं प्रभावितं विद्यते। किन्तु पौराणिकं सृष्टितत्त्वं सांख्यीयसृष्टितत्त्वस्याक्षरशः अनुवादो नास्ति। पौराणिकसृष्टितत्त्वस्य स्वकीया पृथग् महत्ता स्वतन्त्रताऽस्ति। सांख्यमतेन प्रभावितत्वादपि तत्र स्वकीयं व्यक्तित्त्वमस्ति।

सांख्ये सृष्टेः विकासः प्रधानस्य पुरुषस्य च एतयोः उभयोः तत्त्वयोः पारस्परिकप्रभावस्य तथा संयोगस्य परिणतं फलमस्ति। सांख्ये एतौ उभौ एव अनादिनी नित्यतत्त्वे स्तः, परन्तु पुराणे तौ उभावेव विष्णोः द्वे रूपे अभिमते स्तः, अर्थात् एतयोः उत्पत्तिः विष्णो अस्तित्त्वेश्रिताऽस्ति। विष्णुपुराणस्य स्पष्टं कथनमस्ति यद् विष्णोः परमस्वरूपात् प्रधानं पुरुषश्च द्वे रूपे उद्भवतः तथा विष्णोः तृतीयरूप द्वारा एतौ उभौ सृष्टिसमये संयुक्तौ भवतः। तथा प्रलयदशायां वियुक्तौ भवतः। भगवान् विष्णुः कालशक्तिद्वारैव विश्वस्य सृष्टिं तथा प्रलयं करोति। कालस्तु स्वयमनादिः अनन्तः निर्विशेषश्च विद्यते। तमेव निमित्तं विधाय भगवान् विष्णुः लीलयैव (बालक्रीडा इव) आत्मानमेव सृष्टिरूपेण

प्रकटयति।

पुराणेषु नवविधसृष्टेः वर्णनं प्रायेण प्राप्यते। उदाहरणार्थम्- पद्ममपुराणस्य सृष्टिखण्डस्य तृतीयेऽध्याये 76 अध्यायतः 81 अध्यायान् यावत् पद्यानुसारं वर्णनमित्थं प्राप्यते। ये मुख्यरूपेण त्रिषु पदेषु विभज्यन्ते- 1. प्राकृतसर्गः 2. वैकृतसर्गः, 3. प्राकृत-वैकृतसर्गः। प्राकृतसर्गस्य संख्या-एकैवाऽस्ति। एवं सर्गाणां सम्मिलितसंख्या नव अस्ति। यथोक्तं शिवपुराणे-

**प्राकृताश्च त्रये पूर्वे सर्गास्तेऽबुद्धिपूर्वकाः।**

**बुद्धिपूर्वं प्रवर्तन्ते मुख्याद्याः पञ्च वैकृताः।।**[3]

विषयप्रतिपादनस्य सौकर्यार्थम् एवं सौविध्यार्थं सृष्टिप्रक्रियायाः अधोलिखिताः भेदाः कर्तुं शक्यन्ते।

**1. आदिसृष्टिः -**

मूलतत्त्वादारभ्य दक्षपर्यन्ता सृष्टिः, अस्य विभागस्यान्तर्गता भविष्यति। पुराणेषु प्राप्यते यत् दक्षस्य अनन्तरा सृष्टिः मैथुनी सृष्टिरुच्यते। तथा पूर्वस्य (पूर्ववर्तिनी) मानसी सृष्टिः। मानसिक-सृष्टिः अभिप्रायः वर्तते यत्केवलमेकतत्त्वस्यैव विकासः यत्र वर्णितः स्यात्। द्वयो तत्त्वयोः योगेन सम्पद्यमाना सृष्टिः मैथुनी सृष्टिः अभिधीयते। मिथुनं नाम द्वयोः संयोगस्य नाम अस्ति।

**2. लोकसृष्टिः अथवा भूतसृष्टिः -**

अत्र स्वयंभूः परमेष्ठी सूर्यः चन्द्रः पृथिवी चेत्पञ्चमण्डलानां सृष्टिविवरणमस्ति विद्यावाचस्पतिः इमामेव भूतसृष्टिं मन्यते।

**3. प्राणिसृष्टिः -**

प्राणिसृष्टौ बहुविधप्राणिनां निर्माणस्य समाधानं पुराणेभ्यः प्राप्यते। प्राणिषु असुराः सुराः पितरः तथा मनुष्याः प्रमुखाः सन्ति। अतैव एषामुत्पत्ते प्रकारोऽपि अतिशयसौन्दर्येण सह पुराणेषु कथितोऽस्ति।

**4. अध्यात्मसृष्टिः -**

इयं पुराणेषु अनुग्रह-सर्ग-अभिधीनेन उक्ताऽस्ति। आसां सर्वसृष्टीनां तात्त्विकविवरणं मूलरूपेण श्रुतेष्वेव (वेद-मन्त्रेषु) अस्ति। अन्यशास्त्रेषु श्रुत्याधारेण आसां विस्तारः अस्ति। यज्ञकर्मणः अंगरूपेण तथा यज्ञस्य प्रशंसायाभासां सृष्टीनां यत्र तत्र ब्राह्मणेषु प्रतिपादनमस्ति यत्क्रमिकरूपेण तत्र नोपलभ्यते। उपनिषत्सु भूतसृष्टिः प्राणसृष्टेः च अत्यन्तं संक्षिप्तं वर्णनं प्राप्यते। मनुस्मृतेः प्रथमेऽध्याये अत्यन्तं संक्षेपतो लोकसृष्टेः प्राणसृष्टेश्च वर्णनं प्राप्यते। इत्थं सृष्टेर्विवरणं सर्वेषु शास्त्रेषु आगतमस्ति, परन्तु सृष्टेः क्रमबद्धं विस्तृतवर्णनं पुराणेष्वेव द्रष्टुं शक्यते।

महत्तत्त्वस्य सर्गः ब्रह्मणः प्रथमः सर्ग उच्यते। ब्रह्मणः सृष्टौ सर्वप्रथमस्य तत्त्वस्याऽविर्भावो

भवति। तस्यानन्तरं पञ्चतन्मात्राणि उत्पद्यन्ते। इदमेव भूतसृष्टिः। इन्द्रियसम्बन्धिनी तृतीयसृष्टेः संज्ञा वैकारिकी अस्ति। एषा सृष्टिः प्रकृतेः समुद्भूतास्ति। अत्र सर्वप्रथमं स्थानं बुद्धेरस्ति। चतुर्थी सृष्टिः मुख्या सृष्टिः कथ्यते। पञ्चमसर्गः तिर्यग्-योनेः मन्यते। षष्ठः सर्गः देवतानामस्ति। अस्यानन्तरं मानुषी सृष्टिरागच्छति। पूर्वसर्गोऽपि ब्रह्मणः सृष्टौ पुरुषार्थस्य असाधक एव जातः। अतैव सत्यसंकल्पब्रह्मा स्वध्यानादेकनवीनप्राणिवर्गस्य निर्माणम् करोत्, ये पृथिव्यामेव भ्रमणशीलाः जीवाः आसन्। उक्तञ्च यथा श्रीमद्भागवते-

**सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या**

**वृक्षान् सरीसृपपशून् खगदंशमत्स्यान्।**

**तैस्तैरतुष्टहृदयः पुरुषं विधाय**

**ब्रह्मावलोकधिषणं मुदमाप देवः॥**[4]

अष्टमसृष्टिः 'अनुग्रह'- नाम्ना ज्ञायते। विष्णुपुराणेन इमां सात्विक-तामसरूपेणोक्त्वा, केवलं सामान्यः संकेतः कृतः। एका अन्तिमा सृष्टिः नवमी सृष्टिः मताऽस्ति या प्राकृत-वैकृतरूपास्ति। एषा कौमारसृष्टिः कथ्यते। एषा अन्तिमा प्राकृत-वैकृत-उभयात्मिका उक्ता। 'कौमारसृष्टिः' इत्यत्र कौमारशब्देन सनत्कुमारादीनामुदयस्य संकेतः प्राप्यते यतो भागवतपुराणे 'कौमारसर्गः' इत्यत्र कौमारशब्दस्य प्रयोगः अस्मिन्नेवार्थे कृतोऽस्ति। अर्थात् अस्मिन् सर्गे ब्रह्मणः मानसपुत्रः सनक-सनन्दन-सनातन-सनत्कुमार-नामधेयाः सदैव पञ्चहायनयुक्ताः कुमारा बालयोगिनः समुत्पन्ना अभवन्। यथोक्तम्-

**स एव प्रथमं देवः कौमारं सर्गमास्थितः।**

**चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम्॥**[5]

विष्णुपुराणानुसारम् अविद्यासर्गः ब्रह्मसर्गान्तर्गत अस्ति। द्वितीयो भूतसर्गः। तृतीयः तन्मात्राणां सर्गः। इमे त्रयः प्राकृतसर्गाः उच्यन्ते। अस्यानन्तरं प्राणिनां सृष्टिर्भवति। एते उत्पद्यमानाः प्राणिनः वृक्षाः पशवः देवाः मनुष्याश्च सन्ति। अत्र इयद् वैशिष्ट्मस्ति यत् पुराणेषु वृक्षाणामुत्पत्तिरपि प्राणिसर्गः कथितः। वर्तमानवैज्ञानिकयुगस्य प्रारम्भिकाः विज्ञानवेत्तारः वृक्षलतादिषु प्राणशक्तेः सञ्चरणं स्वयन्त्रैः अभिज्ञातुमसमर्थाः अभवन्। अतस्तैः वृक्षलतादिषु सजीवप्राणिवत् व्यवहारस्य वर्णनकर्तुः पुराणसाहित्यस्य कथानकानि कपोलकल्पितानि साधयितुं प्रयासः कृत् आसीत्। किन्तु केचिद् विद्वांसः नवीन-अनुसन्धान-मनुसृत्य साधितवन्तः यद् वृक्षेषु भूयमानया मनुष्यवत् अनुभूतिक्रियया तेषामवयवेषु संकोचः एवं विस्तारः भवति। एषा पुराणविज्ञानस्य महती उपलब्धिः विजयश्चास्ति।

पद्मपुराणस्य एवं विष्णुपुराणस्यानुसारतः सृष्टेः नवविभागाः अनेकेषु पुराणेषु प्राप्यन्ते। किन्तु श्रीमद्भागवतस्य तृतीयस्कन्धन्दशमोध्यायानुसारं सृष्टिविभागे किमपि वैलक्षण्यमस्ति। तदनुसारेण षट् विभागाः कथ्यन्ते। यथोक्तम्-

**यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम्।**
**सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः।।**[6]

**प्राकृत सर्गः -**

(1) महान्, (2) अहंकारः, (3) भूतानि (तन्मात्राणि), (4) इन्द्रियाणि, (5) देवः, (6) तमः।

**वैकृत सर्गः -**

यः मुख्याः सर्गोऽपि कथितः एवमस्ति (1) वृक्षः, (2) तिर्यक्, (3) मनुष्यः।

इत्थं सर्वा मिलित्वा नवद्या सृष्टिर्भवति। प्रकृते विकृतेः च द्वयोः मिश्रणेन निर्मितः कौमारसर्गः यदि गण्यते तर्हि सृष्टिभेदानां संख्या दश सम्पद्यते। एषाम् अन्यावन्तरभेदानामुल्लेखः भागवते सम्प्राप्यते।

विष्णुपुराणस्य द्वितीयेऽध्याये सृष्टेः संक्षिप्तं वर्णनमस्ति। तदनन्तरं तृतीये अध्याये शक्तेः स्वरूपं प्रभावितं विद्यते। अस्मिन्नेव प्रसङ्गे ब्रह्मणः आयुः वक्तुं कालविभागानामपि तत्र निरूपणमस्ति। चतुर्थे अध्याये वाराह-अवतारस्य वर्णनम् पञ्चम-अध्याये पुनः सृष्टेः विस्तारेण विवरणं प्राप्यते। पंचम अध्याये प्राणिनां सृष्टि-कथनेन पूर्वमेव अविद्यायाः सृष्टिरुक्ता।

सन्दर्भग्रन्थः


1. कूर्मपुराणे (पू0) 1/12)
2. भागवते 12/7/11
3. शिवपुराणे, वायवीयसंहितायां, 1/12/18
4. भागवते 11/9/28
5. भागवते, 1/3/6
6. भागवते, 3/10/13



- शोध छात्र (साहित्य विभाग)

राष्ट्रिय संस्कृत संस्थान,

लखनऊ परिसर, लखनऊ (उ0प्र0)

E-mail: brijesh.chandra2014@gmail.com


****

# भाषा शिक्षणशास्त्र के सन्दर्भ में कौशल विकास के उदीयमान मुद्दे एवं चुनौतियाँ

– प्रो0 लोकमान्य मिश्र

मानव को अन्य प्राणियों से अलग करने के अनेक कारणों में से प्रमुख उसकी भाषा ही है। भाषा विचार विनिमय का अन्यतम साधन है। विचारों की अभिव्यक्ति एवं विचार ग्रहण भाषा के माध्यम से ही सम्भव है। वस्तुतः भाषा भावों, विचारों तथा अनुभवों को व्यक्त करने का सांकेतिक साधन है। अंग संचालन, चित्र प्रदर्शन एवं विभिन्न क्रियाओं द्वारा भी भाव प्रकाशन होता है। किन्तु इनसे अभिव्यक्ति की पूर्णता व्यंजित नहीं होती, जैसी कि ध्वनि संकेतों के द्वारा होती है। वास्तविक अर्थ में ''विचारों की अभिव्यक्ति के लिए किसी समाज द्वारा स्वीकृत जिन ध्वनि–संकेतों का व्यवहार होता है, उसे भाषा कहते हैं।''

अभिव्यक्ति जब लिखित रूप में होती है तो उसे लिखित भाषा तथा मौखिक रूप से होने पर उसे मौखिक भाषा की संज्ञा से अभिहित किया जाता है। भाषा के विकास क्रम को देखने पर हम यह पाते हैं कि, भाषा का एक तीसरा रूप है, जिसे साङ्केतिक भाषा की संज्ञा दी जाती है। साङ्केतिक भाषा में अभिव्यक्ति तथा ग्रहण, संकेतों के माध्यम से होते हैं। वर्तमान में गुप्तचर संगठनों द्वारा तथा अन्य भाषा–भाषी क्षेत्रों में अभिव्यक्ति तथा ग्रहण हेतु सांकेतिक भाषा का प्रयोग देखने को मिलता है। बालक के व्यक्तित्व के सर्वाङ्गीण विकास में भाषा का महत्त्वपूर्ण योगदान माना जाता है। बालक के सोचने, समझने व अनुभवों की अभिव्यक्ति हेतु भाषा महत्त्वपूर्ण है।

कई विभाषाओं में व्यवहृत होने वाली एक शिष्ट परिगृहीत विभाषा ही भाषा कहलाने की अधिकारिणी होती है। जैसे हिन्दी की अनेक बोलियाँ या विभाषाएँ –ब्रज, अवधी, बुन्देली, कन्नौजी, भोजपुरी, मैथिली, राजस्थानी, छत्तीसगढ़ी आदि बोलियाँ हैं। ये बोलियाँ भाषा की शब्दावली के विकास में सहयोग देती हैं।

**भाषा के दो आधार होते हैं- भौतिक एवं मानसिक।**

**भौतिक आधार** – इसमें ध्वनियों को उच्चारण करने वाले अंग (कण्ठ, तालु, नासिका से युक्त मुख) सुनने वाले अंग (कान), ध्वनियों को व्यक्त करने वाले वर्ण, ध्वनि संकेतों को धारण करने वाली सामग्री (कागज, तख्ती, बोर्ड आदि), ध्वनियों को पढ़ने वाली सामग्री (आँख, मुख, नासिका आदि) और ध्वनियों को लेखबद्ध करने वाली सामग्री (लेखनी, स्याही, कागज आदि) आते हैं। भाषा सीखने के लिए आवश्यक सामाजिक पर्यावरण भी भाषा के भौतिक आधार में आता है।

**मानसिक आधार** – वस्तुत: भौतिक आधार तभी कार्य करते हैं जब उन्हें मस्तिष्क आज्ञा देता है। सुनने, बोलने, पढ़ने लिखने के लिए जिन मानसिक क्रियाओं की आवश्यकता होती है, उसे भाषा का मानसिक आधार कहते हैं। इसके अतिरिक्त विचार भी भाषा के मानसिक आधार हैं।

भाषा और विचार का अटूट सम्बन्ध है। भाषा अर्जित सम्पत्ति है। यह परिवर्तनशील होती है। भाषा का सम्बन्ध परम्परा से होता है। यह एक पीढ़ी से दूसरी पीढ़ी द्वारा ग्रहण की जाती है। यही कारण है कि, इसमें चाहे जितना परिवर्तन होता चले, लेकिन उसके मूल रूप के दर्शन उसमें अवश्य होते हैं।

